शासनशिरताजसूरिरामचन्द्रदीक्षाशताब्दीग्रंथमाला-३



समर्थशास्त्रकारशिरोमणिसूरिपुरन्दरपूज्याचार्य-
श्रीहरिभद्रसूरीश्वरादिसूरिश्रेष्ठविरचितयोगग्रन्थ-
तट्टीकान्तर्गत

# योगग्रन्थ व्याख्यासंग्रहः

सम्पादन-सङ्कलनकाराः
तपागच्छाधिपति-दीक्षायुगप्रवर्तकपूज्यपादाचार्यवर्य-
श्रीमद्विजयरामचन्द्रसूरीश्वरचरणरेणुगच्छगौरव-
वर्धमानतपोनिधिपूज्याचार्यश्रीमद्विजयगुणयशसूरीश्वरविनेयाः
प्रवचनप्रभावकपूज्यपादाचार्यश्रीमद्विजयकीर्तियशसूरीश्वराः

शासनशिरताजसूरिरामचन्द्रदीक्षाशताब्दीग्रंथमाला-३

समर्थशास्त्रकारशिरोमणिसूरिपुरन्दरपूज्याचार्य-
श्रीहरिभद्रसूरीश्वरादिसूरिश्रेष्ठविरचितयोगग्रन्थ-तट्टीकान्तर्गत-

# योगग्रन्थव्याख्यासंग्रहः

• सम्पादन-सङ्कलनकाराः •

तपागच्छाधिपति-दीक्षायुगप्रवर्तकपूज्यपादाचार्यवर्यश्रीमद्-
विजयरामचन्द्रसूरीश्वरचरणरेणु-वर्धमानतपोनिधिपूज्यपादाचार्य-
श्रीमद्विजयगुणयशसूरीश्वरविनेयाः प्रवचनप्रभावकपूज्यपादाचार्य-
श्रीमद्विजयकीर्तियशसूरीश्वराः

• प्रकाशिका •

शासनशिरताजसूरिरामचन्द्रदीक्षाशताब्दीसमिति

ग्रन्थनाम : योगग्रन्थव्याख्यासंग्रहः

ग्रन्थकर्तारः : समर्थशास्त्रकारशिरोमणिपूज्याचार्यश्रीहरिभद्र-सूरीश्वरादिसूरिश्रेष्ठाः

सङ्कलनकर्तारः : पूज्याचार्यश्रीमद्विजयकीर्तियशसूरीश्वराः

प्रकाशिका : शासनशिरताजसूरिरामचन्द्रदीक्षाशताब्दीसमिति

आवृत्तिः : प्रथमा, वि.सं. २०६८, वी.सं. २५३८, इं.सं. २०१२

प्रतयः : ५००

मूल्यम् : रूपकाणि ८०-००

## प्राप्तिस्थानम्

अहमदाबाद : सन्मार्गप्रकाशनम्
जैनआराधनाभवन, पाछियानी पोळ,
रिलीफरोड, अहमदाबाद-३८०००१

अक्षरांकन : विरति ग्राफिक्स, अहमदाबाद
मो. : ८५३०५२०६२९, ९८७९३८८४९०

## खाससूचना

આ પુસ્તક જ્ઞાનખાતામાંથી છપાયેલું હોવાથી ગૃહસ્થોએ ઉપયોગ કરવો હોય તો સંપૂર્ણ કિંમત જ્ઞાનખાતામાં ચૂકવી પછી જ માલિકી કરવી અથવા યોગ્ય નકરો જ્ઞાનખાતામાં ભરીને ઉપયોગ કરવો.

# દીક્ષાયુગપ્રવર્તકશ્રીજીના શ્રીચરણે આદરભરી અંજલિ

ન્યાયાંભોનિધિ પૂજયપાદ આચાર્યદેવ શ્રીમદ્ **વિજયાનંદસૂરીશ્વરજી (આત્મારામજી)** મહારાજાના સ્વર્ગવાસના વર્ષે જન્મી ચૂકેલા પાદરાના મા **સમરથ** અને પિતા **છોટાલાલ રાયચંદ**ના એકમેવ સુપુત્રરત્ન **ત્રિભુવનકુમારે** દીક્ષા માટેની સાર્વત્રિક વિપરીત અવસ્થાઓના વાદળાંઓને સ્વપુરુષાર્થથી વિખેરી ભરૂચ પાસેના **ગંધારતીર્થ**ના આંગણે પૂ.મુ.**શ્રીમંગલવિજયજી** મહારાજાના વરદહસ્તે રજોહરણ પ્રાપ્ત કરી પૂ.મુ.**શ્રી પ્રેમવિજયજી** મહારાજ (ત્યાર બાદ સૂરીશ્વરજી)ના પ્રથમ પટ્ટશિષ્યરૂપે પૂ.મુ.**શ્રી રામવિજયજી** મહારાજનું નામ ધારણ કર્યું. એ વખતે દીક્ષિતો અને દીક્ષાર્થીઓને દીક્ષાનું પ્રદાન-આદાન કરવા માટે જે ભીષણ રીતે ઝઝૂમવું પડતું હતું તે પરિસ્થિતિમાં પૂર્વ-પશ્ચિમ જેવો પ્રચંડ પલટો લાવવાનો દૃઢ સંકલ્પ કરી એનાં મૂળ કારણો શોધી એને ધરમૂળથી ઉખેડવાનો ભીષ્મ પુરુષાર્થ તેઓ શ્રીમદે આદર્યો.

એ પુરુષાર્થની પાયાની શિલા **'પ્રવચનધારા'** બની. અનંત તીર્થંકરોને હૃદયમાં વસાવી, જિનાજ્ઞા-ગુર્વાજ્ઞાને ભાલપ્રદેશે સ્થાપી, કરકમળમાં આગમાદિ ધર્મશાસ્ત્રો ધરી, ચરણદ્વયમાં ચંચલા લક્ષ્મીને ચાંપી, જીહ્વાના અગ્રભાવે મા શારદાને સંસ્થાપિત કરી આ મહાપુરુષે દીક્ષાવિરોધની સામે ભીષણ જેહાદ જગવી દીધી. અનેક બાળ, યુવા, પ્રૌઢ અને વૃદ્ધોને દીક્ષા આપી. એક સામટા પરિવારો દીક્ષિત થવા લાગ્યા. હીરાબજારના વેપારીઓ, મીલમાલિકો, ડૉક્ટરો, એન્જીનીયરો અને ચાર્ટર્ડ એકાઉન્ટન્ટો પણ તેઓશ્રીની વૈરાગ્ય ઝરતી વાણીને ઝીલી વીરશાસનના ભિક્ષુક બન્યા.

આ કાર્ય કાળ દરમ્યાન તેઓ શ્રીમદ્ને કેઈ ઝંઝાવાતો, અપમાનો, તિરસ્કારો, કાચની વૃષ્ટિઓ અને કંટકોની પગથાર, કાળા વાવટાઓ, સ્થાન અને ગામમાં પ્રવેશ પણ ન મળે તેવા કારસ્તાનોનો સામનો કરવો પડ્યો. પાંત્રીસથી વધુ વાર તો તેઓશ્રીને સિવિલ કે ક્રિમીનલ ગુનાના આરોપી બનાવી જૈન વેષધારીઓએ જ ન્યાયની કોર્ટ બતાવી. મા સમરથના જાયા, રતનબાના ઘડતરપાયા, સૂરિદાનની આંખની કીકી અને સમકાલીન સર્વ વડીલ ગુરુવર્યોના હૃદયહારરૂપે સ્થાન પામેલા પૂજ્યશ્રીએ જિનાજ્ઞા અને સત્યવાદિતાના જોરે એ બધાં જ આક્રમણોને ખાળી વિજયશ્રી પ્રાપ્ત કરી. પૂ.મુ.**શ્રી રામવિજયજી** મહારાજામાંથી પૂ.આ.શ્રી. વિજય**રામચંદ્રસૂરીશ્વરજી** મહારાજાના રૂપે વિખ્યાત બનેલા તેઓ શ્રીમદ્ વ્યાખ્યાનવાચસ્પતિ, પરમશાસનપ્રભાવક, મહારાષ્ટ્રાદિદેશોદ્ધારક, દીક્ષાયુગપ્રવર્તક, જૈનશાસન-શિરતાજ, તપાગચ્છાધિરાજ જેવા ૧૦૮થી ય વધુ સાર્થ બિરુદોને પામી જૈનશાસનને આરાધના, પ્રભાવના અને સુરક્ષાના ત્રિવેણી સંગમથી પરિસ્નાત કરતા રહ્યા.

કટ્ટરમાં કટ્ટર વિરોધી વર્ગને પણ વાત્સલ્યથી નિહાળતા અને પોતાના પ્રત્યે ગંભીર ગુનો આચરનારને પણ ઝટ ક્ષમાનું દાન કરતા તેઓશ્રીએ પોતાના ૭૭-૭૮ વર્ષના સુદીર્ઘ સંયમપર્યાયમાં મુખ્યત્વે દીક્ષાધર્મની સર્વાંગીણ સુરક્ષા-સંવર્ધના કરી એનાં બીજ એવાં સુનક્ષત્રમાં વાવ્યાં કે તેઓશ્રીનાં નામ સાથે પુણ્ય સંબંધ ધરાવતા એક જ સમુદાયમાં આજે આશરે ૧૪૦૦ જેટલા સંયમીઓ સાધનારત

છે. અન્ય અન્ય સમુદાયો, ગચ્છો અને સંપ્રદાયોમાં દીક્ષાપ્રવૃત્તિના વેગમાં પણ તેઓ શ્રીમદ્ અસામાન્યકારણરૂપ છે એમ કોઈ પણ નિષ્પક્ષપાતીને કહ્યા વિના ચાલે તેમ નથી.

પૂજ્યપાદશ્રીજીના દીક્ષાસ્વીકારની ક્ષણ **વિ.સં. ૨૦૬૮ના પોષ સુદ ૧૩**ના દિને **'શતાબ્દી'**માં મંગલ પ્રવેશ કરી રહી છે અને પૂરા વર્ષભર એ નિમિત્તે **દીક્ષાધર્મ**ની પ્રભાવનાનાં વિધવિધ અનુષ્ઠાનોની હારમાળા સર્જાઈ રહી છે.

પાલિતાણા ખાતે **'સૂરિરામચંદ્ર'** સામ્રાજ્યના મોવડી પૂજ્યો ગચ્છસ્થવિર પૂજ્ય આચાર્યદેવ શ્રીમદ્‌વિજય **લલિતશેખરસૂરીશ્વરજી** મહારાજા, વાત્સલ્યનિધિ પૂજ્ય આચાર્યદેવ શ્રીમદ્‌વિજય **મહાબલસૂરીશ્વરજી** મહારાજા, ગચ્છાધિપતિ પૂજ્ય આચાર્યદેવ શ્રીમદ્‌વિજય **પુણ્યપાલસૂરીશ્વરજી** મહારાજા, પ્રવચનપ્રભાવક પૂજ્ય આચાર્યદેવ શ્રીમદ્‌વિજય **કીર્તિયશસૂરીશ્વરજી** મહારાજા આદિ દશાધિક સૂરિવરો, પદસ્થો, શતાધિક મુનિવરો અને પંચશતાધિક શ્રમણીવરોની નિશ્રા-ઉપસ્થિતિમાં પંચદિવસીય મહામહોત્સવના આયોજન સાથે પ્રારંભાયેલ **'દીક્ષાશતાબ્દી'**ની ભારતભરમાં અનેક સ્થળે ભાવસભર ઉજવણી થનાર છે. પૂજ્યશ્રી સાથે સંકળાયેલા સ્મૃતિસ્થાનો-તીર્થોમાં પણ વિધવિધ ઉજવણીઓ આયોજાયેલ છે. સમુદાયના અન્ય અન્ય સૂરિવરો આદિની નિશ્રા ઉપસ્થિતિમાં ય રાજનગર, સુરત, મુંબઈ વગેરે સ્થળોમાં પ્રભાવક ઉજવણીઓનાં આયોજનો થયાં છે.

આ સર્વે ઉજવણીઓના શિરમોર અને સમાપનરૂપે પૂજ્યપાદશ્રીજીનાં દીક્ષાસ્થળ શ્રી ગંધારતીર્થના આંગણે વધુમાં વધુ સંખ્યામાં ચતુર્વિધ શ્રીસંઘને આમંત્રી દિગદિગંતમાં ગાજે એવો દીક્ષાદુંદુભિનો પુણ્યઘોષ કરવાનો ય મનસૂબો ગુરુભક્તો અને સમિતિ સેવી રહ્યા છે.

દીક્ષાશતાબ્દીવર્ષમાં જિનભક્તિ, ગુરુભક્તિ, સંઘ-શાસનભક્તિનાં વિવિધ અનુષ્ઠાનો જેમ યોજવાનાં છે તેમ વધુમાં વધુ સંખ્યામાં મુમુક્ષુઓ મહાત્માઓ બને એવા દીક્ષામહોત્સવો પણ યોજવાના છે. સાથોસાથ જ્ઞાનસુરક્ષાવૃદ્ધિ, અનુકંપા અને જીવદયાદિનાં સંગીન કાર્યો કરી પૂજ્યપાદશ્રીજીના આજ્ઞાસામ્રાજ્યને આદરભરી અંજલિ સમર્પવાની છે.

આ મહદ્ યોજનાના જ એકભાગરૂપે પ્રાચીન અર્વાચીન શ્રુતપ્રકાશનનું સુંદર અને સુદૃઢ કાર્ય હાથ ઉપર લેવાયું છે. સૂરિરામચન્દ્રસામ્રાજ્યના વર્તમાનગચ્છાધિપતિ પ્રવચનપ્રદીપ પૂજ્યપાદ આચાર્યદેવ શ્રીમદ્‌વિજય **પુણ્યપાલસૂરીશ્વરજી** મહારાજાના આજ્ઞાશીર્વાદને ઝીલી પ્રવચનપ્રભાવક પૂજ્યપાદ આચાર્યદેવ શ્રીમદ્‌વિજય **કીર્તિયશસૂરીશ્વરજી** મહારાજાના શાસ્ત્રીય માર્ગદર્શન અનુસારે વિવિધ શ્રુતરત્નોનું પ્રકાશન **'શાસનશિરતાજ સૂરિરામચંદ્ર દીક્ષાશતાબ્દી ગ્રંથમાળાના'** ઉપક્રમે નિર્ધાર્યું છે, તેનાં **તૃતીયપુષ્પરૂપે 'योगग्रन्थव्याख्यासंग्रहः'** પુસ્તકનું પ્રકાશન કરતાં અતીવ આનંદ અનુભવીએ છીએ.

આ પુસ્તકનું સંકલન-સંપાદન કાર્ય પ્રવચનપ્રભાવક પૂ.આ.શ્રી વિજય **કીર્તિયશસૂરીશ્વરજી** મહારાજાએ કરીને મહદ્ ઉપકાર કર્યો છે તો **સન્માર્ગપ્રકાશન,** અમદાવાદે પણ ખૂબજ જહેમતથી મુદ્રણ-પ્રકાશન વ્યવસ્થામાં પૂરેપૂરો સહયોગ આપ્યો છે તે બદલ અમો તેઓ સહુના ઉપકૃત છીએ.

સૌ કોઈ આ પુસ્તકના પઠન-પાઠનાદિ દ્વારા જ્ઞાનાવરણીયાદિ કર્મોનો ક્ષયોપશમ પામી મુક્તિમાર્ગમાં આગળ વધી આત્મશ્રેયઃ સાધે એ જ અંતર-ભાવના.

વિ.સં. ૨૦૬૮, પોષ સુદ ૧૩
શનિવાર તા. ૭-૧-૨૦૧૨

**શાસનશિરતાજ સૂરિરામચંદ્ર**
**દીક્ષાશતાબ્દીસમિતિ**

● ● ●

# સંપાદનની શુભપળે

જીવ માત્રનો સ્વભાવ દુઃખથી બચવાનો અને સુખને પામવાનો છે. અનાદિકાળના મિથ્યા સંસ્કારોને કારણે જીવ અન્ય જીવોને દુઃખ આપી સુખ મેળવવાનો પ્રયત્ન કરે છે. પણ આ માર્ગે ચાલી આજ સુધી કોઈપણ જીવ સુખી થયો નથી, થતો નથી કે ભવિષ્યમાં સુખી થશે પણ નહિ.

ભિન્ન ભિન્ન દર્શનકારોએ જીવને શાશ્વત સુખી બનાવવા માટે અનેક માર્ગો બતાવ્યા છે, પણ તે દર્શનકારોનો પોતાનો બોધ સંપૂર્ણ ન હોવાથી, તેમણે બતાવેલા માર્ગો યથાર્થતાને પામ્યા નથી અને તે માર્ગે ચાલીને આજ સુધી કોઈપણ જીવ મુક્તિસુખને પામી શક્યો નથી.

પરમતારક, વીતરાગ, સર્વજ્ઞપરમાત્માએ પોતાની કૈવલ્યદષ્ટિથી સંપૂર્ણ ચરાચરસૃષ્ટિને જોઈ જીવ માત્રને શાશ્વત-સ્વાધીન-અનંતસુખી બનાવવા માટે જે યથાર્થ છે તે માર્ગ જ બતાવ્યો છે. તે માર્ગને જ યોગમાર્ગ તરીકે ઓળખવામાં આવે છે કે જે માર્ગ ઉપર ચાલી ભૂતકાળમાં અનંતા આત્માઓ મોક્ષ સુખને પામ્યા છે, વર્તમાનમાં પામી રહ્યા છે અને ભવિષ્યમાં પામશે.

આ યોગમાર્ગને જાણવા, પામવા અને અનુભૂતિનો વિષય બનાવવા માટે મહાપુરુષોએ અનેક ગ્રંથોની રચના કરી છે. શ્રી ઉત્તરાધ્યયન સૂત્ર, શ્રી આચારાંગસૂત્ર, યોગાધ્યયન જેવા અનેક યોગમાર્ગને જણાવનારા આગમોમાંથી અનેક મહાપુરુષોએ યોગગ્રંથોની સંરચના કરી છે. તે મહાપુરુષોમાં મુખ્યત્વે વાચકવર્ય શ્રી **ઉમાસ્વાતિજી** મહારાજા, સમર્થ શાસ્ત્રકારશિરોમણિ પૂજ્ય આચાર્ય શ્રી **હરિભદ્રસૂરીશ્વરજી** મહારાજા, કલિકાલસર્વજ્ઞ પૂજ્ય આચાર્ય શ્રી **હેમચંદ્રસૂરીશ્વરજી** મહારાજા, મહામહોપાધ્યાય શ્રી **યશોવિજયજી** મહારાજા વગેરેને ગણી શકાય, અનેક યોગગ્રંથોના રચયિતા એવા આ મહાપુરુષોએ પોતાના ગ્રંથોમાં યોગમાર્ગને સમજાવવા વપરાતા પારિભાષિક શબ્દોનું સચોટ અર્થ-ગાંભીર્યવાળું સ્પષ્ટીકરણ કર્યું છે.

પ્રસ્તુત પ્રકાશનમાં તે યોગગ્રંથો પૈકી મુખ્ય ૩૬ ગ્રંથોને તથા તેમાં આવતા ચોક્કસ પારિભાષિક શબ્દોને તથા કેટલાક અન્ય શબ્દોને સ્થાન આપવામાં આવ્યું છે. આમ છતાં એના દરેક શબ્દોનો સમાવેશ કરી શકાયો નથી. તે પારિભાષિક શબ્દોને અકારાદિક્રમમાં ગોઠવણપૂર્વક કોશસ્વરૂપે સંગ્રહ કરવામાં આવ્યો છે. જેથી એક જ શબ્દનો ભિન્ન ભિન્ન ગ્રંથોમાં ભિન્ન ભિન્ન અપેક્ષાએ શું અર્થ કરવામાં આવ્યો છે તે જાણી શકાય અને તે દ્વારા તે તે શબ્દોના ઐદંપર્યાર્થ સુધી પહોંચવું અતિ સરળ થઈ પડે તથા કોઈપણ નવા કર્તાને નવ્ય ગ્રંથ કે નવ્ય ટીકા બનાવવાની ભાવના હોય તો તેઓને માટે પણ પ્રસ્તુત સંગ્રહ અધિકૃત આધારરૂપે અતિ ઉપયોગી થઈ શકશે કે પૂર્વ મહાપુરુષોએ આ શબ્દનો કયા સંદર્ભમાં કયો અર્થ કર્યો છે વગેરે.

પ્રસ્તુત સંગ્રહમાં જે જે ગ્રંથોનો ઉપયોગ કરવામાં આવ્યો છે તેની નોંધ મૂકવામાં આવી છે તથા તેના સંક્ષિપ્ત નામો પણ મૂકવામાં આવ્યાં છે. જ્યારે કોઈપણ શબ્દની વ્યાખ્યા રજૂ કરાઈ છે ત્યારે તે વ્યાખ્યા બાદ તે વ્યાખ્યા કયા ગ્રંથની છે તે જણાવવા ગ્રંથના સંક્ષિપ્ત નામોનો જ ઉપયોગ કરવામાં આવ્યો છે અને તે વ્યાખ્યા તે ગ્રંથની કઈ ગાથામાં કે ગાથાની ટીકામાં આવેલ છે તે પણ જણાવવામાં આવ્યું છે.

અંતે અત્રે રજૂ કરેલા યોગગ્રંથોના પારિભાષિક શબ્દોના સંગ્રહને જાણી તેના ઐદંપર્યાર્થ સુધી પહોંચી આપણે સૌ વહેલામાં વહેલા યોગમાર્ગને જાણી-પામી-અનુભવી મોક્ષસુખના ભોક્તા બનીએ એ જ એક શુભભાવના.

રાજનગર
મહા સુદ-૫, વસંતપંચમી,
શ્રી શંખેશ્વર પાર્શ્વનાથ પરમાત્મા
પ્રતિષ્ઠા દિન, શનિવાર
તા. ૨૮-૧-૧૨

જૈનશાસનશિરતાજ વ્યાખ્યાનવાચસ્પતિ પરમપૂજ્ય આચાર્યદેવ
શ્રીમદ્‌વિજય **રામચંદ્રસૂરીશ્વરજી** મહારાજાના ચરણસેવક
વર્ધમાનતપોનિધિ પરમપૂજ્ય આચાર્યદેવ
શ્રીમદ્‌વિજય **ગુણયશસૂરીશ્વરજી** મહારાજાની ચરણરજ
આચાર્યદેવ શ્રીમદ્‌વિજય **કીર્તિયશસૂરીશ્વરજી** મ.સા.

● ● ●

# योगग्रन्थव्याख्यासंग्रहे समुपयुक्तग्रन्थमणयः

| क्रम | ग्रन्थनाम | संक्षिप्तनाम | कर्ता | टीकाकार |
|---|---|---|---|---|
| १. | तत्त्वार्थाधिगमसूत्रम् सभाष्यम् | त.भा. | उमास्वातिजीम. | उमास्वातिजीम.(भा.) |
| २. | तत्त्वार्थाधिगमसूत्रम् | त.उ. | उमास्वातिजीम. | यशोविजयजीम. |
| ३. | प्रशमरतिप्रकरणम् | प्रश. | उमास्वातिजीम. | — |
| ४. | ध्यानशतकप्रकरणम् | ध्या. | जिनभद्रगणि क्षमाश्रमण | हरिभद्रसू.म. |
| ५. | पंचसूत्रप्रकरणम् | पंच. | हरिभद्रसू.म. | हरिभद्रसू.म. |
| ६. | अष्टकप्रकरणम् | अ. | हरिभद्रसू.म. | अभयदेवसू.म. |
| ७. | षोडशकप्रकरणम् | षो. | हरिभद्रसू.म. | यशोविजयजीम. |
| ८. | पंचाशकप्रकरणम् | पं. | हरिभद्रसू.म. | अभयदेवसूरिम. |
| ९. | योगविंशिकाप्रकरणम् | यो.विं. | हरिभद्रसू.म. | यशोविजयजीम. |
| १०. | योगबिंदुप्रकरणम् | यो.बिं. | हरिभद्रसू.म. | हरिभद्रसू.म. |
| ११. | योगशतकप्रकरणम् | यो.श. | हरिभद्रसू.म. | हरिभद्रसू.म. |
| १२. | योगदृष्टिसमुच्चयप्रकरणम् | यो.दृ. | हरिभद्रसू.म. | हरिभद्रसू.म. |
| १३. | धर्मबिन्दुप्रकरणम् | ध. | हरिभद्रसू.म. | — |
| १४. | विंशतिविंशिकाप्रकरणम् | विं. | हरिभद्रसू.म. | — |
| १५. | सम्यक्त्वसप्ततिप्रकरणम् | स.स. | हरिभद्रसू.म. | संघतिलकाचार्य |
| १६. | शास्त्रवार्तासमुच्चयप्रकरणम् | शा.वा. | हरिभद्रसू.म. | हरिभद्रसू.म. |
| १७. | उपदेशपदप्रकरणम् | उ.प. | हरिभद्रसू.म. | मुनिचन्द्रसू.म. |
| १८. | ब्रह्मसिद्धांतसमुच्चयप्रकरणम् | ब्र.सि. | हरिभद्रसू.म. | — |
| १९. | ललितविस्तराप्रकरणम् | ल.वि. | हरिभद्रसू.म. | मुनिचन्द्रसू.म. |
| २०. | पंचवस्तुकप्रकरणम् | पं.व. | हरिभद्रसू.म. | हरिभद्रसू.म. |
| २१. | श्रावकप्रज्ञप्तिप्रकरणम् | श्रा. | — | हरिभद्रसू.म. |
| २२. | योगसारप्रकरणम् | यो.सा. | प्राचीनपरमर्षिः | — |
| २३. | योगशास्त्रप्रकरणम् | यो.शा. | हेमचन्द्रसू.म. | हेमचन्द्रसू.म. |
| २४. | अध्यात्ममतपरीक्षाप्रकरणम् | अ.म. | यशोविजयजीम. | यशोविजयजीम. |
| २५. | प्रतिमाशतकप्रकरणम् | प्र. | यशोविजयजीम. | यशोविजयजीम. |

| क्रम | ग्रन्थनाम | संक्षिप्तनाम | कर्ता | टीकाकार |
|---|---|---|---|---|
| २६. | द्वात्रिंशद्द्वात्रिंशिकाप्रकरणम् | द्वा. | यशोविजयजीम. | यशोविजयजीम. |
| २७. | उपदेशरहस्यप्रकरणम् | उ.र. | यशोविजयजीम. | यशोविजयजीम. |
| २८. | कूपदृष्टान्तविशदीकरणम् | कू. | यशोविजयजीम. | यशोविजयजीम. |
| २९. | यतिलक्षणसमुच्चयप्रकरणम् | यति. | यशोविजयजीम. | — |
| ३०. | अध्यात्मोपनिषत्प्रकरणम् | अ.उ. | यशोविजयजीम. | — |
| ३१. | धर्मपरीक्षाप्रकरणम् | ध.प. | यशोविजयजीम. | यशोविजयजीम. |
| ३२. | सामाचारीप्रकरणम् | सा. | यशोविजयजीम. | यशोविजयजीम. |
| ३३. | गुरुतत्त्वविनिश्चयप्रकरणम् | गु. | यशोविजयजीम. | यशोविजयजीम. |
| ३४. | मार्गपरिशुद्धिप्रकरणम् | मार्ग. | यशोविजयजीम. | — |
| ३५. | अध्यात्मसारप्रकरणम् | अध्या. | यशोविजयजीम. | — |
| ३६. | ज्ञानसारप्रकरणम् | ज्ञा. | यशोविजयजीम. | — |

• • •

समर्थशास्त्रकारशिरोमणिसूरिपुरन्दरपूज्याचार्य-
श्रीहरिभद्रसूरीश्वरादिसूरिश्रेष्ठविरचितयोगग्रन्थ-तट्टीकान्तर्गत-

# योगग्रन्थव्याख्यासंग्रहः

समर्थशास्त्रकारशिरोमणिसूरिपुरन्दरपूज्याचार्य-
श्रीहरिभद्रसूरीश्वरादिसूरिश्रेष्ठविरचितयोगग्रन्थ-तट्टीकान्तर्गत-

# योगग्रन्थव्याख्यासंग्रहः

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | | **[अ]** | |
| अकरणनियमः | = | पापशरीरकार्श्यहेतुराजयक्ष्मरोगस्थानीयः क्षयोपशमविशेषः, स च ग्रन्थिभेदादारभ्याऽऽक्षीणमोहं प्रवर्द्धते । ध.प. | ४६ |
| अकर्मांशः | = | घातिनां विनाशात् 'अकर्मांशः' ज्ञानावरणीयादीनामष्टानां कर्मणां समुदायभूतानामंशाः अवयवा घातिकर्मलक्षणा न सन्त्यस्येति । गु. | ४/४१ |
| अकलङ्कम् | = | अध्यात्मकल्याणकलङ्कवर्जितम् । शा.वा. | १६ |
| | = | क्रोधादिकालिकानाकलिततया कलङ्करहितम् । गु. | ४/१६० |
| अकल्पः | = | अविधिः, | |
| | * | चरकपरिव्राजकादिः, | |
| | * | अकल्प्यम् अग्राह्यम् । सा. | ३१ |
| अकल्पस्थिताः | = | मध्यमद्वाविंशतिजिनसाधवो महाविदेहजाश्चाकल्पस्थिताः । गु. | २/३३० |
| अकामनिर्जरा | = | यथाप्रवृत्तिकरणेन गिरिसरिदुपलघोलनाकल्पेनाकामस्य निरभिलाषस्य या निर्जरा कर्मप्रदेशविचटनरूपा सा । यो.शा. | ४/१०३ |
| | = | सकामायाः विपरीता । ध.प. | ३७ |
| अकालः | = | निबिडमिथ्यात्वं तत्त्वविपर्यासलक्षणमुपचारात्तत्कालश्चरमपुद्गल-परावर्त्तव्यतिरिक्तशेषपुद्गलपरावर्त्तलक्षणः । उ.र. | ६४ |
| अकिंचनता | = | भोगसाधनानामस्वीकारः । द्वा. | २१/२ |
| अकुशलारम्भः | = | धर्मप्रतिपत्तावपि परोपतापः । पञ्च. | ३ |
| अक्षीणपापः | = | अव्यावृत्तकल्मषः । यो.बिं. | १०३ |
| अक्षुद्रः | = | अकृपणः, | |
| | * | अक्रूरः । पं. | ७/४ |
| अखेदः | = | अव्याकुलतालक्षणः । द्वा. | २१/१ |
| अगुरुः | = | सर्वाभिलाषिणः सर्वभोजिनः सपरिग्रहाः । अब्रह्मचारिणो मिथ्योपदेशा गुरवो न तु ॥९॥ यो.शा. | २/९ |
| अङ्गप्रविष्टम् | = | अङ्गेष्वाचाराङ्गादिषु प्रविष्टमाधेयतया सम्बद्धम्, अङ्गत्वेनाधारता, श्रुतत्वेनाधेयता । त.उ. | १/२० |
| अङ्गबाह्यम् | = | अङ्गेभ्य आचाराङ्गादिभ्यो बाह्यं भिन्नम् । त.उ. | १/२० |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| अचिकित्स्यः | = | श्रुण्वन्नपि सिद्धान्तं विषयपिपासातिरेकतः पापः । प्राप्नोति न संवेगं तदपि यः सोऽचिकित्स्य इति ॥१४॥ षो. | १०/१४ |
| अजातकल्पः | = | अगीतार्थसाधुसम्बन्धी यो विहारः सः । पं. | ११/३० |
| अज्ञः | = | मूर्खः । यो.बिं. | ८७ |
| अणुव्रतानि | = | अणूनि-लघूनि व्रतानि-नियमा अणुव्रतानि, | |
| | * | अणुत्वं चामीसां महाव्रतापेक्षम्, | |
| | * | अणोर्वा यत्यपेक्षया लघोर्गुणस्थानिनो व्रतान्यणुव्रतानि, | |
| | * | अनुपश्चान्महाव्रतप्ररूपणापेक्षया व्रतान्यनुव्रतानि । पं. | १/७ |
| अतथाकारः | = | मिथ्यात्वलक्षणम् । अ.म. | १७८ |
| अतिचारः | = | अतिचारो व्यतिक्रमः स्खलितमित्यनर्थान्तरम् । त.भा. | ७/१८ |
| | = | चारित्रमालिन्यबीजरूपः रागद्वेषलेशलक्षणः । उ.र. | १८९ |
| | = | देशस्य भञ्जनात् देशस्यैव पालनाद् अतिचारव्यपदेशः । पं. | १/१० |
| | = | चरणे देशखंडनरूपः । पं. | १४/२ |
| अतिथिः | = | न विद्यते सततप्रवृत्तातिविशदैकाकारानुष्ठानतपातिथ्यादि-दिनविभागो यस्य सोऽतिथिः । यथोक्तम्-तिथिपर्वोत्सवाः सर्वे त्यक्ता येन महात्मना । अतिथिं तं विजानीयाच्छेषमभ्यागतं विदुः ॥ यो.शा. | १/५३ |
| अतिनिपुणबुद्धिः | = | अतिशयितसूक्ष्मभावानुधाविनी मतिः । यो.विं. | १६ |
| अतिपरिणामाः | = | अतिव्याप्तापवाददृष्टयः । गु. | १/४९ |
| अतिशयः | = | उत्कर्षः । यो.बिं. | ६१ |
| अतीन्द्रियम् | = | इन्द्रियविषयभावातीतम् । यो.बिं. | ५१ |
| अतीन्द्रियार्थः | = | कर्मादिः । यो.दृ. | ९८ |
| अतीन्द्रियार्थसंवादः | = | चन्द्रोपरागनिमित्तादिसंवादः । शा.वा. | ६४१ |
| अतीर्थसिद्धः | = | तित्थाइसिद्धभेया संघे सइ हुंति तित्थसिद्ध त्ति । तदभावे जे सिद्धा अतित्थसिद्धा उ ते नेया ॥२॥ विं. | १९/२ |
| अतुलम् | = | सहजानन्दनिस्यन्दसुन्दरतयाऽनन्योपमेयमात्मस्वभावम् । गु. | ४/१६० |
| अदीनता | = | अशनाद्यलाभेऽपि वैक्लव्याभावः । द्वा. | २७/२४ |
| अदेवः | = | ये स्त्री-शस्त्राऽक्षसूत्रादिरागाद्यङ्ककलङ्किताः । निग्रहाऽनुग्रहपरास्ते देवाः स्युर्न मुक्तये ॥६॥ यो.शा. | २/६ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| अद्वेषः | = | पक्षपातकृताप्रीतिपरिहारः । षो. | १६/१४ |
| अधिकरणम् | = | अधिक्रियते आत्माऽनेनासंयतसामर्थ्यपोषणत इति । द्वा. | १/११ |
| अधिगमः | = | अधिकं ज्ञानम् । त.उ. | १/३ |
| | = | अधिगमः अभिगम आगमो निमित्तं श्रवणं शिक्षा उपदेश इत्यनर्थान्तरम्, | १/३ |
| | * | अधिगमस्तु सम्यग्व्यायामः । त.भा. | १/७ |
| | = | गुर्वाद्युपदेशः । त.उ. | १/३ |
| | = | शिक्षागमोपदेशश्रवणान्येकार्थिकान्याधिगमस्य । प्रश. | २२३ |
| अध्ययनम् | = | अधीयत इति अध्ययनम् । ध्या. | १ |
| अध्यवसानम् | = | अध्यवसानम्-मन एकाग्रतालम्बनमित्यर्थः । ध्या. | २ |
| अध्यात्मः | = | आत्मन्येवैकाग्रचित्तव्यापारः । उ.र. | १९० |
| | = | अतो ज्ञानक्रियारूपमध्यात्मं व्यवतिष्ठते । अध्या. | २/२९ |
| | = | आत्मानमधिकृत्य स्याद्, यः पञ्चाचारचारिमा ।<br>शब्दयोगार्थनिपुणास्तदध्यात्मं प्रचक्षते ॥२॥ | १/२ |
| | * | रूढ्यर्थनिपुणास्त्वाहु-श्चित्तं मैत्र्यादिवासितम् ।<br>अध्यात्मं निर्मलं बाह्य-व्यवहारोपबृंहितम् ॥३॥ अ.उ. | १/३ |
| | = | आदिकर्मकमाश्रित्य जपो ह्यध्यात्ममुच्यते ।<br>देवतानुग्रहाङ्गत्वादतोऽयमभिधीयते ॥ यो.बिं. | ३८१ |
| | = | उचितप्रवृत्तेर्व्रतभृतो मैत्र्यादिभावगर्भं<br>शास्त्राज्जीवादितत्त्वचिन्तनम् । यो.विं. | ३ |
| | = | औचित्याद् वृत्तयुक्तस्य वचनात्तत्वचिन्तनम् ।<br>मैत्र्यादिसारमत्यन्तमध्यात्मं तद्विदो विदुः ॥ यो.बिं. | ३५८ |
| | = | औचित्याद्वृत्तयुक्तस्य वचनात्तत्त्वचिन्तनम् ।<br>मैत्र्यादिभावसंयुक्तमध्यात्मं तद्विदो विदुः ॥ द्वा. | १८/२ |
| | = | गतमोहाधिकाराणामात्मानमधिकृत्य या ।<br>प्रवर्तते क्रिया शुद्धा तदध्यात्मं जगुर्जिनाः ॥२॥ अध्या. | २/२ |
| | = | चित्रभेदरूपम् देवसेवाजपतत्त्वचिन्तनादिरूपम् । यो.विं. | ३ |
| अध्यात्मध्यानरतः | = | अन्तर्भावितध्यातृध्येयभावेनात्मनैव परापेक्षाबहिर्मुखे स्वस्वरूपे ध्यानमात्रनिष्ठां प्राप्तः । सा. | ९९ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| अध्यात्मध्याने | = | परमसंवररूपे । उ.र. | १९० |
| अध्यात्ममयी क्रिया | = | अपुनर्बन्धकाद् यावद् गुणस्थानं चतुर्दशम् । | |
| | | क्रमशुद्धिमती तावत् क्रियाध्यात्ममयी मता ॥४॥ अध्या. | २/४ |
| अध्यात्मवैरिणी क्रिया | = | आहारोपधिपूजर्द्धिगौरवप्रतिबन्धतः । | |
| | | भवाभिनन्दी यां कुर्यात् क्रियां साध्यात्मवैरिणी ॥५॥ अध्या. | २/५ |
| अनधीनसुखम् | = | अपरायत्तं, निरन्तरस्वपरिणतिधाराप्रतितत्वादित्थमपीतरकारण- | |
| | | स्पृहोत्सुक्याभावादितरसुखातिशायित्वमव्याहतम् । उ.र. | ६९ |
| अनध्यवसायः | = | विधीयमानानुष्ठानोचिताध्यवसायाभावः । यो.बिं. | १५१ |
| | = | सुप्तमत्तपुरुषवत् क्वचिदप्यर्थे बोधस्याप्रवृत्तिः । उ.प. | १९८ |
| अननुष्ठानम् | = | अनुष्ठानाभासम् । यो.बिं. | १५५ |
| | = | प्रणिधानाद्यभावेन कर्म्मानध्यवसायिनः । | |
| | | संमूर्च्छिमप्रवृत्ताभमननुष्ठानमुच्यते ॥८॥ अध्या. | १०/८ |
| | = | यत्र प्रमादयोगात् संयमयोगेषु विविधभेदेषु । | |
| | | नो धार्मिकप्रवृत्तिर्बुवते खलु तदननुष्ठानम् ॥१८४॥ मार्ग. | १८४ |
| | = | संमोहात् सन्निपातोपहतस्येव | |
| | | सर्वतोऽनध्यवसायादननुष्ठानमुच्यते । द्वा. | १३/१३ |
| अनन्तरफलम् | = | उपप्लवह्रासः, | ४४६ |
| | * | भावैश्वर्यवृद्धिः, | ४४७ |
| | * | जनप्रियत्वम् । ध. | ४४८ |
| अनन्तानुबन्धी | = | पारंपर्येणानन्तं भवमनुबद्धुं शीलं यस्य इति उदयस्थः | |
| | | सम्यक्त्वविघाती । श्रा. | १७ |
| अनवस्थाप्यप्रायश्चित्तम् | = | साहम्मिगाइतेणाइभावओ संकिलेसभेएण । | |
| | | तक्खणमेव वयाण वि होइ अजोगो उ अणवट्ठा ॥१५॥ | |
| | | विं. | १६/१५ |
| अनाकारोपयोगः | = | सामान्यग्रहणाभिमुखः । गु. | ४/९८ |
| अनाकूलता | = | अत्वरा । षो. | १३/६ |
| अनादरः | = | अगौरवरूपः । यो.बिं. | २२८ |
| अनाप्तता | = | अक्षीणदोषत्वेनाहितत्वम् । अ. | ६/५ |
| अनाबाधा | = | सर्वशरीरमानसव्यथाविकला । यो.बिं. | ३६७ |
| अनाभिग्रहिकमिथ्यात्वम् | = | स्वपराभ्युपगतार्थयोरविशेषेण श्रद्धानम्, | |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | * | विच्छिन्नपक्षपातत्तया मलाल्पतानिमित्तकः, | |
| | * | सर्वदेवगुर्वादिश्रद्धानलक्षणम् । ध.प. | ८ |
| अनाभोगः | = | सम्मूढचित्ततया व्यक्तोपयोगभावः । ल.वि. | १० |
| अनाभोगिकमिथ्यात्वम् | = | साक्षात्परम्परया च तत्त्वाऽप्रतिपत्तिः । ध.प. | ८ |
| अनालम्बनयोगः | = | अरूपिगुणसायुज्ययोगोऽनालम्बनः परः ॥६॥ ज्ञा. | २७/६ |
| | = | शुद्धोपयोगरूपस्तु, निर्विकल्पस्तदेकदृग् । अ.उ. | २/१६ |
| | = | आलंबणं पि एयं रूविमरूवी य इत्थ परमुत्ति । | |
| | | तग्गुणपरिणइरूवो सुहुमोऽणालंबणो नाम ॥१९॥ विं. | १७/१९ |
| अनाशातना | = | सर्वथाऽहीलना । द्वा. | २९/८ |
| अनाश्रवयोगः | = | एकमेव वर्तमानं जन्म यत्र स तु अनाश्रवयोगः । द्वा. | १९/१८ |
| अनिदानम् | = | क्षायिकभावप्रार्थनाविशिष्टा तीर्थकरत्वप्रार्थना । कू. | १३ |
| अनिष्टफला | = | कर्मबन्धलक्षणविपरीतफला । सा. | ७४ |
| अनुकम्पा | = | अल्पसुखश्रमात् दुःखिनां दुःखोद्दिधीर्षाल्पासुखश्रमात् । द्वा. | १/३ |
| | = | दट्ठूण पाणिनिवहं भीमे भवसागरम्मि दुक्खत्तं । | |
| | | अविसेसओऽणुकंपं दुहावि सामत्थओ कुणइ ॥१३॥ विं. | ६/१३ |
| | = | दुःखिते प्राणिन्यपक्षपातेन दुःखनिवारणरूपा दया । स.स. | ४५ |
| | = | दुःखितेषु अपक्षपातेन दुःखप्रहाणेच्छा, | |
| | * | कृपा । यो.शा. | २/१५ |
| | = | द्रव्यतो भावतश्च दुखितदुःखपरिहारेच्छा । यो.विं. | ८ |
| | = | निरुपधिपरदुःखप्रहाणेच्छा । त.उ. | १/२ |
| अनुचितानुष्ठानम् | = | अकामनिर्जराङ्गम् । ध.प. | ३७ |
| अनुचिन्तनम् | = | अनुचिन्ता मनसैवाविस्मरणादिनिमत्तं सूत्रानुस्मरणमित्यर्थः । ध्या. | ४२ |
| अनुत्तरम् | = | विषयसेवाजनितानन्दातिशायि । यो.बिं. | ५४ |
| अनुत्तरोपपादिकदशाः | = | अनुत्तरोपपादिका देवा येषु ख्याप्यन्ते ताः । त.उ. | १/२० |
| अनुपजीवकः | = | कारणतः केवलभोक्ता । पं.व. | ३४३ |
| अनुपहतकम् | = | अप्रतिघातम् । कू. | १३ |
| अनुप्रेक्षा | = | अनु-पश्चाद्भावे प्रेक्षणं प्रेक्षा । | |
| | | सा च स्मृतिध्यानाद् भ्रष्टस्य चित्तचेष्टनेत्यर्थः । ध्या. | २ |
| | = | अर्हद्गुणानामेव पुनः पुनश्चिन्तनम् । | २३ |
| | = | तत्त्वार्थानुचिन्ता । इयमप्यत्र ज्ञानावरणीयकर्मक्षयोपशमसमुद्भवोऽनु- | |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | | भूतार्थाभ्यासभेदः (१) परमसंवेगहेतुः (२) तद्दार्ढ्यविधायी (३) उत्तरोत्तरविशेषसम्प्रत्ययाकारः (४) केवलालोकोन्मुखश्चित्त-धर्म्मः । ल.वि. | २७५ |
| अनुबन्धः | = | उत्तरोत्तरवृद्धिरूपो बध्यमानप्रकृतिषु तज्जननशक्तिरूपो वा । ध.प. | ७ |
| | = | उत्तरोत्तरशुभसन्तानाविच्छेदलक्षणः । गु. | १/३९ |
| | = | तत्परिणामाव्यवच्छेदतः प्रकर्षयायिता । पं. | १९/४२ |
| | = | फलसिध्यन्तः कार्यविषयः प्रवाहपरिणामः । षो. | १३/१० |
| अनुबन्धहिंसा | = | पापकर्मबन्धार्जितदुःखलक्षणात् हिंसा । उ.र. | ४ |
| अनुभवः | = | संवेदनम् । अ. | २/४ |
| | = | संवेदनम् । श्रा. | ४०१ |
| अनुमानम् | = | तथोपपत्त्यऽन्यथानुपपत्तिरूपम् । यो.बिं. | ४१२ |
| | = | लिङ्गलिङ्गिसम्बन्धग्रहणोद्भवेन । यो.बिं. | २५ |
| अनुमोदना | = | अणुमोअणाइ विसओ जं तं अणुमोअणिज्जयं होइ ।<br>सा पुण पमोअमूलो वावारो तिण्ह जोगाणं ॥३३॥ ध.प. | ३३ |
| | * | अनुमोदना पुनः प्रमोदमूलो हर्षपूर्वकः त्रयाणां योगानां कायवाङ्मनसां व्यापारो रोमाञ्चोद्गमप्रशंसा-प्रणिधानलक्षणः । ध.प. | ३३ |
| अनुयोगाज्ञायोग्याः | = | जम्हा वयसंपन्ना, कालोचिअगहिअसयलसुत्तत्था ।<br>अणुओगाणुन्नाए, जोगा भणिआ जिणिंदेहिं ॥९३२॥ पं.व. | ९३२ |
| अनुरागः | = | प्रीतिविशेषः । श्रा. | ५ |
| अनुवर्त्तकः | = | स्वभावनुकूल्येन प्रतिजागरकः । पं.व. | ३१ |
| अनुवृत्तः | = | द्वितीयवारं प्रकटीभूतः । गु. | २/३२ |
| अनुश्रोतवृत्तिः | = | इन्द्रियकषायानुकूला वृत्तिः । द्वा. | १४/१५ |
| अनुष्ठानम् | = | आचरणम् । पं. | ३/२४ |
| | = | धर्मशास्त्रशुश्रूषणादिः । यो.बिं. | २०८ |
| अनुस्रोतः | = | इन्द्रियकषायानुकूला वृत्तिः । यो.बिं. | २०२ |
| | = | संसारस्रोत इन्द्रियाणामनुकूलतया प्रवृत्तिः । उ.प. | २५२ |
| अनृतम् | = | असदभिधानमनृतम् । त.भा. | ७/९ |
| अन्तकृद्दशाः | = | अन्तकृतः सिद्धास्ते यत्र स्थाप्यन्ते वर्द्धमानस्वामिनस्तीर्थ एतावन्त एवं सर्वतीर्थकृतां ताः । त.उ. | १/२० |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| अन्तरङ्गम् | = | अभ्यन्तरपरिणामप्राप्तम् । उ.र. | ६७ |
| अन्तरद्वारम् | = | पुनः प्राप्तिः-प्रतिपतितस्य सतोऽन्यो लाभस्तन्मध्यः कालः । गु. | ४/१३३ |
| अन्तरात्मा | = | कायादेः समधिष्ठायको भवत्यन्तरात्मा तु ॥ यो.शा. | १२/७ |
| | = | चित्तरूपः । द्वा. | १०/६ |
| | = | तत्त्वश्रद्धा ज्ञानं महाव्रतान्यप्रमादपरता च ।<br>मोहजयश्च यदा स्यात् तदांतरात्मा भवेद् व्यक्तः ॥२३॥<br>अध्या. | २०/२३ |
| | = | तदधिष्ठायकः (कायाद्यधिष्ठायकः), | |
| | * | सम्यग्दर्शनादिपरिणतस्त्वन्तरात्मा, | |
| | * | ततः परं (गुणस्थानत्रयादुपरि) क्षीणमोहगुणस्थानं यावदन्तरात्मा । अ.म. | १२५ |
| अन्यमुत् | = | प्रकृतकार्यान्यकार्यप्रीतिः । षो. | १४/३ |
| अपकारक्षमा | = | मम दुर्वचनाद्यसहमानस्यायमपकारी भविष्यतीत्याशयेन क्षमां कुर्वतः । द्वा. | २८/७ |
| अपराधाः | = | अवराहा खलु सल्लं एयं मायाइभेयओ तिविहं । विं. | १५/१३ |
| अपरिग्रहव्रतम् | = | सर्वभावेषु मूर्च्छायास्त्यागः स्यादपरिग्रहः ।<br>यदसत्स्वपि जायेत मूर्च्छया चित्तविप्लवः ॥२४॥ यो.शा. | १/२४ |
| अपरिणामाः | = | ये मन्दमतयोऽगीतार्था अपरिणतजिनवचनरहस्यास्ते । गु. | १/४९ |
| अपवर्गः | = | आत्यन्तिको दुःखविगम इति । ध. | १३३ |
| अपवादः | = | विशेषोक्तो विधिः । उ.प. | ७८१ |
| | = | उत्सर्गानुरोधी । अ.म. | ११ |
| | = | सूत्राबाधया गुरुलाघवालोचनपरोऽधिकदोषनिवृत्त्या शुभः, शुभानुबन्धी, महासत्त्वासेवित उत्सर्गभेद एव । ल.वि. | १९ |
| अपवादसूत्रम् | = | अध्वामौदर्यादिषु तद्विधायकम् । उ.र. | १३३ |
| अपवादापवादसूत्रम् | = | उत्सृष्टविध्युत्तरविधिप्रधानम् । उ.र. | १३३ |
| अपवादोत्सर्गसूत्रम् | = | विध्येकवाक्यतापन्नविशेषनिषेधपरम् । उ.र. | १३३ |
| अपायः | = | अवगृहीते विषये सम्यगसम्यगिति<br>गुणदोषविचारणा अध्यवसायापनोदोऽपायः। | |

| नाम | व्याख्या | गाथा |
| --- | --- | --- |
| | * अपायोऽपगमः, अपनोदः, अपव्याधः, अपेतमपगतमपविद्धमनुत्यमित्यनर्थान्तरम् । त.भा. | १/१५ |
| | = अपायमाहुः कर्मैव निरपायाः पुरातनम् । पापशयकरं चित्रं निरुपक्रमसंज्ञकम् ॥ यो.बिं. | ३७३ |
| अपायविचयः | = आस्रवविकथागौरवपरीषहाद्यैरपायस्तु विचयः । प्रश. | २४८ |
| | = रागद्वेषकषायाद्यैर्जायमानान् विचिन्तयेत् । यत्रापायांस्तदपायविचयध्यानमिष्यते ॥१०॥ यो.शा. | १०/१० |
| अपुनर्बन्धकः | = य इह परिणामादिभेदादपुनर्बन्धकत्वेन तांस्तान् कर्मपुद्गलान् बध्नाति स तत्क्रियाविष्टो-ऽप्यपुनर्बन्धक उत्कृष्टस्थितेः । यो.श. | ९ |
| | * पावं न तिव्वभावा कुणइ, ण बहुमण्णई भवं घोरं । उचियट्ठिइं च सेवइ सव्वत्थ वि अपुणबंधो त्ति ॥१३॥ यो.श. | १३ |
| | = शुक्लपक्षेन्दुवत्प्रायो वर्धमानगुणः स्मृतः । भवाभिनन्दिदोषाणामपुनर्बन्धको व्यये ॥ द्वा. | १४/१ |
| | = एकदापि न बन्धो-मोहनीयकर्मोत्कृष्टस्थितिबन्धनं यस्य सः । पं. | २/४४ |
| | = ग्रन्थिप्रदेशगतः सन् पुनरुत्कृष्टस्थित्यबन्धौपयिकयोग्यतावान् । उ.र. | २२ |
| | = उत्कृष्टां कर्मस्थितिं तथा अपुनर्बन्धकत्वेन यः क्षपयति सः । पञ्च. | ५ |
| अपुनःकरणसंगतः | = 'न पुनरकरणीयं करिष्यामि' इति निश्चयसमन्वितः । सा. | २२ |
| अपुष्टालम्बनम् | = शठतया स्वमतिमात्रोत्प्रेक्षितम् । गु. | १/१२० |
| अपूर्वकरणम् | = अपूर्वपरिणामः शुभोऽनादावपि भवे तेषु-तेषु धर्मस्थानेषु वर्तमानस्य तथाऽसंजातपूर्वो ग्रन्थिभेदादिफलः । यो.दृ. | १० |
| अपूर्वधरणम् | = स्वसमानाधिकरणतत्समानविषयकज्ञानाऽप्रयोज्यं ज्ञानग्रहणम् । सा. | ७१ |
| अपेक्षा | = अनानन्दः, औत्सुक्यदुःखत्वात् । पञ्च. | ५ |
| | = इहलोकपरलोकफलस्पृहानुरूपा । यो.बिं. | १५५ |
| अपोहः | = उक्ति-युक्तिभ्यां विरुद्धार्थाद् हिंसादिकात् प्रत्यपायसम्भावनया व्यावर्त्तनम्, | |
| | * विशेषज्ञानम् । यो.शा. | १/५१ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | = | उक्तियुक्तिभ्यां विरुद्धादर्थात्प्रत्यपायसम्भावनया व्यावर्त्तनम् । ल.वि. | १४७ |
| अप्रज्ञापनीया: | = | दृढनिर्बन्धेनापि गीतार्थैर्बोधयितुमशक्या: । उ.र. | ११ |
| अप्रतिपक्षम् | = | दु:खोपनिपातेऽपि स्वभावभावनाबलेनान्तरव्याहतत्वात् । उ.र. | ६९ |
| अप्रमत्त: | = | सर्वातिचारपरिहारपरायण: । उ.र. | ४४ |
| | = | स्वल्पावरणभावेन स्ववीर्योत्कर्षयोगत: ।<br>नित्योपयुक्त: सत्कृत्ये त्वप्रमत्त इति स्मृत: ॥१७॥ ब्र.सि. | १७ |
| अप्राधान्यम् | = | मुख्यपदार्थाभावलक्षणम् । उ.र. | १७ |
| अप्राप्तपूर्वहर्ष: | = | विस्मयादपूर्वप्राप्तविलक्षणप्रमोद: । उ.र. | १९ |
| अप्रीति: | = | चित्तोद्वेग: । अ. | ७/५ |
| अब्रह्म | = | मैथुनमब्रह्म, | |
| | * | स्त्रीपुंसयोर्मिथुनभाव: मिथुनकर्म वा मिथुनं तदब्रह्म । त.भा. | ७/११ |
| अब्रह्मप्रतिमा | = | एवं किरियाजुत्तोऽबंभं वज्जेइ नवरं राइं पि ।<br>छम्मासावहि नियमा एसा उ अबंभपडिमत्ति ॥१०॥ विं. | १०/१० |
| अभयदानम् | = | विन्नेयमभयदाणं परमं मणवयणकायजोगेहिं ।<br>जीवाणमभयकरणं सव्वेसिं सव्वहा सम्मं ॥६॥ विं. | ७/६ |
| अभयम् | = | विशिष्टमात्मन: स्वास्थ्यम् । ल.वि. | १३२ |
| अभव्या: | = | असेत्स्यन्त: । त.उ. | १/३२ |
| | = | कदापि मुक्तिगमनाऽयोग्या: । उ.र. | १८ |
| | = | न कदाचिद्भवार्णवस्य संसारसमुद्रस्य ते पारं पर्यन्तं गतवन्तो यान्ति वा, अनादि पारिणामिकादभव्यत्वभावाद् । श्रा. | ६७ |
| अभिगम: | = | गुरूमाभिमुख्येनालम्ब्य यद् ज्ञानं स: । त.उ. | १/३ |
| अभिनिवेश: | = | एकान्तेन भगवत्प्रवचनविप्रतिपत्तिलक्षणोऽसद्ग्रह: । गु. | १/१३२ |
| | = | नीतिपथमनागतस्यापि पराभिभवपरिणामेन कार्यस्यारम्भ: । यो.शा. | १/५३ |
| अभिन्नग्रन्थि: | = | कदाचनाऽप्यव्यावृत्तमिथ्यात्वतिमिरपटलो जीव: । उ.र. | ७७ |
| अभिरति: | = | अनवरतप्रवृत्ति: । षो. | १२/१४ |
| अभ्यग्रगबोधि: | = | समीपगतबोधि: सुलभबोधिक इति यावत् । प्र. | १५ |
| अभ्यर्चना | = | पूजनाभिगमनस्तुतिवन्दनपर्युपासनादि: । त.उ. का. | १/८ |
| अभ्यर्थना | = | परप्रवर्त्तना । सा. | ७ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| अभ्यासः | = प्रायः प्रभूतजन्मानुगः । त.उ. का. | १/११ |
| | = पुनःपुनरासेवनम् । यो.बिं. | ६१ |
| अभ्युत्थानादियोगः | = अभ्युत्थानासनप्रदानस्थितपर्युपासनादिविनयव्यापाररूपः । यो.बिं. | ११२ |
| अभ्युदयः | = कल्याणावाप्तिः । अ. | २७/४ |
| अममः | = ममत्वरहितः । पञ्च. | २ |
| अमहात्मा | = अनुदारचित्तः । अ. | १२/४ |
| अमाघातः | = प्राणिघातनिवारणम् । पं. | ९/१५ |
| अमूढलक्षः | = अमूढः - सुनिर्णयो लक्षो-बोधविशेषो यस्य सः । पं. | १४/२८ |
| अमृतानुष्ठानम् | = जैनवर्त्मनः श्रद्धया-इदमेव तत्त्वमित्यध्यवसाय-लक्षणयानुष्ठानम् अमृतमुच्यते । द्वा. | १३/१३ |
| | = सहजो भावधर्मो हि शुद्धश्चंदनगन्धवत् ।<br>एतद्गर्भमनुष्ठानममृतं संप्रचक्षते ॥२५॥<br>जैनीमाज्ञां पुरस्कृत्य प्रवृत्तं चित्तशुद्धितः ।<br>संवेगगर्भमत्यंतममृतं तद्विदो विदुः ॥२६॥<br>शास्त्रार्थालोचनं सम्यक् प्रणिधानं च कर्म्मणि ।<br>कालाद्यंगाविपर्यासोऽमृतानुष्ठानलक्षणम् ॥२७॥ अध्या. | १०/२७ |
| अरुहाः-जिनेश्वराः | = न रोहन्ति, न भवाङ्कुरोदयमासादयन्ति कर्मबीजाभावात् इति । पञ्च. | १ |
| अर्थः | = अनुयोगः । सा. | ७७ |
| | = उपदेशपदप्रसिद्धपदवाक्यमहावाक्यैदंपर्यार्थपरिशुद्धज्ञानम् । यो.विं. | ११ |
| | = खलु तीर्थकरस्थानम्, तस्य तेनाभिहितत्वात् । गु. | २/२१३ |
| | = यतः सर्वप्रयोजनसिद्धिः सः । यो.शा. | १/५२ |
| | = शब्दाभिधेयव्यवसायः । यो.विं. | २ |
| | = निर्युक्तिभाष्यादिव्याख्यानम् । उ.र. | १४ |
| अर्थविज्ञानम् | = ऊहापोहयोगाद् मोह-सन्देह-विपर्यासव्युदासेन ज्ञानम् । यो.शा. | १/५१ |
| अर्थविशुद्धिः | = यथार्थव्याख्यानेनाविपर्यस्तार्थबोधरूपा । उ.प. | ८५४ |
| अर्थी | = तदभिलाषातिरेकवान् । ल.वि. | १२ |
| अर्हन् | = अशोकाद्यष्टमहाप्रातिहार्यादिरूपां पूजामर्हतीत्यर्हन्-तीर्थंकरः । श्रा. | १ |
| | = अर्हन्ति सुरासुरादिकृतां पूजामिति,<br>* यदागमः-अरिहंति वंदणनमंसणाणि अरिहंति पूयसक्कारं ।<br>सिद्धिगमणं च अरिहा, अरिहंता तेण वुच्चंति । स.स. | १८ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | = | अशोकाद्यष्टमहाप्रातिहार्यलक्षणाम् पूजामर्हन्तीति । पञ्च. | १ |
| अलोलः | = | नाप्राप्तप्रार्थनपरः । द्वा. | २७/१२ |
| अल्पबहुत्वम् | = | हीनाधिकत्वसङ्ख्यं परस्परं भेदेषु–अल्पबहुत्वमुच्यते । गु. | ४/१५० |
| अवग्रहः | = | तत्राव्यक्तं यथास्वमिन्द्रियैर्विषयाणामालोचनावधारणमवग्रहः, | |
| | * | अवग्रहो ग्रहो ग्रहणमालोचनमवधारणमित्यनर्थान्तरम् । त.भा. | १/१५ |
| अवधिज्ञानम् | = | रूपिमात्रविषयम् । त.उ. | १/९ |
| अवन्दनीयः | = | यो मूलगुणप्रतिसेवी स नियमादचारित्रीति कृत्वा स्फुटमेवावन्दनीयः । गु. | |
| अवन्ध्यदेशनः | = | सम्यक्त्वादिनिर्वाणकारणफलधर्मकथी । यो.बिं. | ४२६ |
| अवन्ध्यम् | = | नियतफलदायि । यो.दृ. | ८९ |
| अवर्णश्रवणम् | = | अवर्णवादाकर्णनम् । यो.बिं. | ११२ |
| अवसरणम् | = | समवसरणम्–देवसंस्कृतभगवद्व्याख्यानभूमिः । पं. | ६/३१ |
| अविद्या | = | कर्म्मकृतो बुद्धिविपर्यासः । ल.वि. | १८९ |
| | = | परतन्त्रप्रसिद्धाज्ञानरूपा । षो. | १६/२ |
| | = | विपर्यासोऽतस्मिंस्तद्ग्रहस्तदात्मिका । द्वा. | २५/१९ |
| अविद्यासङ्गताः | = | ज्ञानावरणीयादिसम्पृक्ताः । यो.दृ. | ९० |
| अविनेया | = | अविनेया नाम मृत्पिण्डकाष्ठकुड्यभूता ग्रहणधारण–विज्ञानोहाऽपोहवियुक्ता महामोहाभिभूता दुष्टावग्राहिताश्च । त.भा. | ७/६ |
| अविरतिः | = | नियमाभावः । यो.शा. ४/७८ | |
| अवेद्यसंवेद्यपदम् | = | मिथ्यादृष्ट्याशयस्थानम् । यो.दृ. | ७२ |
| | * | अवेद्यमवेदनीयं वस्तुस्थित्या न तथाभावयोगि–सामान्येनाप्यविकल्पकज्ञानग्राह्यम्, तथाविधसमानपरिणामानुपपत्तेः, तत्संवेद्यते अज्ञानावरणक्षयोपशमानुरूपं निश्चयबुद्ध्योपप्लवसारया मृगतृष्णोदकवज्ज्ञायते यस्मिन्पदे तत्तथाविधम् । यो.दृ. | ७५ |
| अशुभध्यानम् | = | मनोज्ञभोजनादिसेविनामनभ्यस्तचरणानां ध्यानम् । गु. | १/६१ |
| अशुभयोगः | = | अनुपयुक्ततया प्रत्युपेक्षणादिकरणम्, प्रमादोपाधिकः । ध.प. | ५१ |
| अशुभानुबन्धनाशहेतुः | = | भगवदाज्ञाया नैरन्तर्यादरसेवनम्, | ६३ |
| | * | आज्ञायोगोऽपि स्वरूपमात्रान्न किं तु अनायतन–वर्जनसदायतनसेवनाऽपूर्वज्ञानग्रहणगुरुविनयाभ्युत्थान– | |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | | भक्तियशोवादवैयावृत्त्यतपःसंयमनिरन्तरव्रतानुस्मरणादि-<br>प्रयत्नसहकृत एव विच्छेदकारी । उ.र. | ६३ |
| अष्टपुष्पी | = | अष्टौ पुष्पाणि पूजात्वेन समाहृतानि इति, | ३/१ |
| | * | अष्टौ पुष्पाणि कुसुमानि यस्यां पूजायां सा, | ३/१ |
| | * | अहिंसा सत्यमस्तेयं, ब्रह्मचर्यमसङ्गता ।<br>गुरुभक्तिस्तपो ज्ञानं, सत्पुष्पाणि प्रचक्षते ॥ अ. | ३/१ |
| अष्टाः | = | स्तोककेशग्रहणस्वरूपाः । पं.व. | १३९ |
| अष्टाङ्गानि | = | शीर्षोरूदरपृष्ठबाहुद्वयलक्षणानि । षो. | ९/३ |
| असंज्ञित्वम् | = | संमूर्छनजानां संज्ञामात्रसद्भावेऽपि विशिष्टसंज्ञाया<br>अभावादसंज्ञित्वम् । पं. | १/३ |
| असंमोहः | = | सदनुष्ठानवच्चैतद् । यो.दृ. | १२१ |
| | = | हेयोपादेयत्यागोपादानोपहितं ज्ञानम् । द्वा. | २३/२३ |
| असंयमस्थानानि | = | असमाहिट्ठाणा खलु, सबला य परीसहा य मोहम्मि । गु. | १/९६ |
| असङ्कल्पः | = | विषयविरागः । उ.प. | १०३५ |
| असङ्गानुष्ठानम् | = | प्रशान्तवाहितासंज्ञं विसभागपरिक्षयः ।<br>शिववर्त्म ध्रुवाध्वेति योगिभिर्गीयते ह्यदः ॥१७६॥ यो.दृ. | १७६ |
| | = | यत्त्वभ्यासातिशयात्सात्मीभूतमिव चेष्ट्यते सद्भिः ।<br>तदसङ्गानुष्ठानं भवति त्वेतत्तदावेधात् ॥७॥ षो. | १०/७ |
| | = | व्यवहारकाले वचनप्रतिसन्धाननिरपेक्षं<br>दृढतरसंस्काराच्चन्दनगन्धन्यायेनात्मसाद्भूतं<br>जिनकल्पिकादीनां क्रियासेवनम् । यो.विं. | १८ |
| असच्छ्रद्धा | = | शास्त्रबाह्या स्वाभिप्रायतस्तथाविधासद्ग्रहात्मिका । यो.दृ. | १७ |
| असत्प्रवृत्तिः | = | परिशुद्धन्यायमार्गानवतारिणी चेष्टा । उ.प. | १९८ |
| असत्फला | = | अविद्यमानाभिप्रेतार्था । यो.बिं. | २२६ |
| असदारंभप्रवृत्ताः | = | प्राण्युपमर्दनहेतुत्वेनाशोभनकृष्यादिव्यापारप्रसक्ताः । पं. | ४/४३ |
| असद् | = | असदिति सद्भावप्रतिषेधोऽर्थान्तरं गर्हा च । त.भा. | ७/९ |
| असद्ग्रहः | = | अशोभनपक्षपातः । द्वा. | ८/८ |
| | = | असन् असुंदरो ग्रहः स्वविकल्पात्<br>तथाविधागीतार्थप्रज्ञापकोपदेशाद्वा विपर्यस्तरूपतया<br>कस्यचिच्छास्त्रार्थस्यावधारणसद्ग्रहः । उ.प. | ६७२ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| असमञ्जसविधानम् | = विहितान्यथाकरणादशुद्धपारम्पर्यप्रवृत्तिः । यो.विं. | १४ |
| असमाप्तकल्पः | = अपरिपूर्णसमाचारः । पं. | ११/२९ |
| असांव्यावहारिकाः | = ये पुनरनादिकालादारभ्य निगोदावस्थामुपगता एवावतिष्ठन्ते ते व्यवहारपथातीतत्वादसांव्यवहारिकाः । ध.प. | ९ |
| असातवेदनीयम् | = परितापरूपेण यद्वेद्यते । श्रा. | १४ |
| असानुबन्धः | = छिन्नसन्तानः । यो.बिं. | ३३ |
| असेव्यत्वम् | = अभक्तिप्रयोजकतद्विपरीतकुलालघटादिसाधारणकर्तृत्वनित्य-मुक्तत्वनित्यामुक्तत्वादिधर्मवत्त्वम् । त.उ. का. | १/७ |
| अस्तेयम् | = परस्वापहरणं स्तेयं तदभावोऽस्तेयम् । द्वा. | २१/२ |
| अस्तेयव्रतम् | = अनादानमदत्तस्यास्तेयव्रतमुदीरितम् ।<br>बाह्याः प्राणा नृणामर्थो हरतां तं हता हि ते ॥२२॥ यो.शा. | १/२२ |
| अस्थानम् | = अतिप्रकटातिगुप्तस्थानमनुचितप्रातिवेश्यं च । ध. | २० |
| | = मूत्रपुरीषोत्सर्गादिस्थानरूपम् । यो.बिं. | ११२ |
| अस्वन्तः | = असुन्दरपरिणामः । यो.बिं. | १४४ |
| अहिंसा | = प्राणवियोगप्रयोजनो व्यापारो हिंसा तदभावोऽहिंसा । द्वा. | २१/२ |
| अहिंसाव्रतम् | = न यत् प्रमादयोगेन जीवितव्यपरोपणम् ।<br>त्रसानां स्थावराणां च तदहिंसाव्रतं मतम् ॥२०॥ यो.शा. | १/२० |
| | **[ आ ]** | |
| आकाराः | = अपवादाः । पं. | ५/२१ |
| आकिञ्चन्यधर्मः | = पक्खीए उवमाए जं धम्मोवगरणाइरेगेण ।<br>वत्थुस्सागहणं खलु तं आकिंचन्नमिह भणियं ॥१३॥<br>विं. | ११/१३ |
| आगमः | = अतीन्द्रियार्थसंवादो, विशुद्धो भावनाविधिः ।<br>यत्रेदं युज्यते सर्वं योगिव्यक्तः स आगमः ॥६४१॥<br>शा.वा. | ६४१ |
| | = आगच्छत्याचार्यपरम्परया वासनाद्वारेणेति । त.उ. | १/२० |
| | = गुरुवचनप्रत्ययरूपः । यो.बिं. | २३९ |
| | = सम्यक्परिच्छेदः । षो. | ३/३ |
| | = सूत्रार्थोभयरूपः सर्वहिताहितप्रवृत्तिनिवृत्तिहेतुः । उ.प. | १८४ |
| | = विस्फूरन्निखिलातिशयतेजोधामनि दुष्षमाकालविपुल- | |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | | जलदपटलावलुप्यमानमहिमनि नितरामनुपलक्षीभूतपूर्व-गतादिबहुतमग्रन्थसार्थतारतारकानिकरः पारङ्गतगदितागमाम्बरः । पं. | १/१ |
| आगमतत्त्वम् | = | आगमतत्त्वं ज्ञेयं तद्दृष्टेष्टाविरुद्धवाक्यतया । उत्सर्गादिसमन्वितमलमैदंपर्यशुद्धं च ॥ षो. | १/१० |
| आगमवचनपरिणतिः | = | अज्ञानावरणह्रासोत्थोपादेयत्वाद्यविषयबालादिज्ञानतुल्य-विषयप्रतिभासोत्तीर्णज्ञानावरणह्रासोत्थोपादेयत्वादि-विषयात्मपरिणामवज्ज्ञानरूपा । षो. | ५/९ |
| आगमव्यवहारः | = | पञ्चविधे व्यवहारमध्ये व्यवहारकार्येण प्रविभक्तं-दानाभवत् प्रायश्चित्तकर्त्तव्यताविषयविभागावच्छिन्नं विशिष्टम् अन्यानुपजीविप्रामाण्यकं ज्ञानम् आगमः । गु. | २/६ |
| आचारः | = | आचारो ज्ञानादिर्यत्र कथ्यते सः । त.उ. | १/२० |
| | = | ज्ञानाचारादिभेदभिन्नः पञ्चविधः । पञ्च. | १ |
| | = | ज्ञानाद्याराधनारूपः । उ.प. | ६८० |
| आचार्यः | = | आचार्यतेऽसावित्याचार्यः, सूत्रार्थवगमार्थं मुमुक्षुभिरासेव्यत इत्यर्थः । ध्या. | ४६ |
| | = | पञ्चविधाचारानुष्ठाता तत्प्ररूपकश्च । द्वा. | २९/७ |
| आज्ञा | = | आगम उच्यते, आज्ञा हि मोहविषपरममन्त्रः । पञ्च. | २ |
| | = | आज्ञा तु निर्मलं चित्तं, कर्तव्यं स्फटिकोपमम् ॥२१॥<br>ज्ञानदर्शनशीलानि, पोषणीयानि सर्वदा ।<br>रागद्वेषादयो दोषा, हन्तव्याश्च क्षणे क्षणे ॥२२॥<br>एतावत्येव तस्याज्ञा, कर्मद्रुमकुठारिका ।<br>समस्तद्वादशाङ्गार्थ-सारभूतातिदुर्लभा ॥२३॥ यो.सा. | १/२३ |
| | = | आज्ञायन्ते अधिगम्यन्ते मर्यादया अभिविधिना वा अर्था यया सा 'आज्ञा' आगमः । अ. | १/६ |
| | = | कुशलकर्मण्याज्ञाप्यन्तेऽनया प्राणिन इत्याज्ञा । ध्या. | ४६ |
| | = | भगवत उभयनयगर्भा । पञ्च. | ५ |
| | = | सर्व्वविद्वचनोपयोगरूपा । उ.प. | ४६९ |
| आज्ञाकरणम् | = | अर्हदाज्ञासंपादनम् । श्रा. | १११ |
| आज्ञाप्रियत्वम् | = | अपुनर्बन्धकादिलिङ्गम् । पञ्च. | ५ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| आज्ञाबाह्या: | = | सूत्रविषयस्वतन्त्रविश्वासाऽप्रयोज्यप्रवृत्तिका: । उ.र. | ४ |
| | = | स्वेच्छामात्रप्रवृत्ता: । उ.र. | ५ |
| आज्ञाविचय: | = | आज्ञां यत्र पुरस्कृत्य सर्वज्ञानामबाधिताम् ।<br>तत्त्वतश्चिन्तयेदर्थांस्तदाज्ञाध्यानमुच्यते ॥८॥ यो.शा. | १०/८ |
| | = | आप्तवचनं प्रवचनं चाज्ञाविचयस्तदर्थनिर्णयनम् । प्रश. | २४७ |
| आज्ञाशुद्धो भाव: | = | यथावद्भगवदुपदेशपालनप्रभवतया<br>प्रशस्ततामासादयन् भाव:-अध्यवसाय: ॥ सा. | ५७ |
| आतङ्क: | = | सद्योघाती रोग: । पञ्च. | ३ |
| आत्मज्ञानम् | = | नात्मन: कर्मभूतस्य पृथक् किञ्चित्, अपि<br>त्वात्मनश्चिद्रूपस्य स्वसंवेदनमेव, नातोऽन्यदात्मज्ञानं नाम ।<br>यो.शा. | ४/३ |
| आत्मपरिणतज्ञानम् | = | पातादिपरतन्त्रस्य तद्दोषादावसंशयम् ।<br>अनर्थाद्याप्तियुक्तं चात्मपरिणतिमन्मतम् ॥४ ॥ अ. | ९/४ |
| | = | आत्मन:-स्वस्य परिणामोऽर्थानर्थप्रतिभासात्मा विद्यते यत्र तत्,<br>आत्मन: जीवस्य परिणामोऽनुष्ठानविशेषसंपाद्यो विद्यते<br>यत्रेति नये सम्यक्त्वलाभप्रयोज्यवस्तुविषयतावत्त्वमर्थो<br>लभ्यते । द्वा. | ६/२ |
| आत्मलब्धिक: | = | स्वार्जितलाभान्तरायकर्मक्षयोपशमेप्येव,<br>न तु परसाहाय्यादिना लब्धि-भक्तादिलाभो यस्यासावात्मलब्धिक:, | |
| | * | आत्ता-स्वीकृता लब्धिर्भक्तादिप्राप्त्यनुकूला<br>शक्तिर्येन स आत्तलब्धिको वा, | |
| | * | आप्ता-प्राप्ता लब्धिर्येन स आप्तलब्धिको वा । सा. | ५६ |
| आत्मस्वभावदर्शनम् | = | निखिलपरद्रव्यव्यावृत्तस्वत्वरूपस्य विगलितवेद्यान्तरानुभव: ।<br>उ.र | ६९ |
| आत्मस्वरूपम् | = | आयसरूवं णिच्चं अकलंकं नाणदंसणसमिद्धं ।<br>णियमेणोवादेयं जं सुद्धं सासयं ठाणं ॥२००॥ उ.र. | २०० |
| आत्मा | = | अतति सततं गच्छतीति-आत्मा-प्राणी । अ. | १०/५ |
| आदर: | = | इष्टाप्तौ यत्नातिशय: । द्वा. | २३/२४ |
| आदाननिक्षेपणासमिति: | = | रजोहरणपात्रचीवरादीनां पीठफलकादीनां चावश्यकार्थं<br>निरीक्ष्य प्रमृज्य चादाननिक्षेपौ आदाननिक्षेपणासमिति: । त.भा. | ९/५ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| | = आसनादीनि संवीक्ष्य प्रतिलिख्य च यत्नतः ।<br>गृह्णीयान्निक्षिपेद्वा यत् साऽऽदानसमितिः स्मृता ॥३९॥<br>यो.शा. | १/३९ |
| आदिमङ्गलम् | = सकलाकुशलकलापनिर्मूलोन्मूलकत्वेन<br>समीहितशास्त्रनिष्पत्तिहेतुः । उ.प. | १ |
| आधिः | = मानसिकपीडा । षो. | १५/३ |
| आध्यानम् | = प्रशस्तैकार्थविषयं स्थिरप्रदीपसदृशमुत्पातादिविषय-<br>सूक्ष्मोपयोगयुतं चित्तम् । यो.विं. | ३ |
| आपत्तिः | = तीर्थकृन्नामकर्मबन्धः । प्र. | ३२ |
| आपृच्छासा. | = आ-मर्यादया तथाविधविनयलक्षणया अभिविधिना<br>वा सर्वप्रयोजनाभिव्याप्तिलक्षणेन प्रच्छनं-गुरोः<br>प्रश्नकरणम् । पं. | १२/२ |
| | = विहारादिगमनाद्यर्थं गुरोराप्रच्छनं तथाविधविनयलक्षणया<br>मर्यादया सर्वप्रयोजनाभिव्याप्तिलक्षणेनाभिविधिना वा<br>प्रच्छनम् । सा. | ४ |
| | = णियहियकज्जपइण्णाणिवेऊणं पइ गुरुं विणयपुव्वं । सा. | ४६ |
| आप्तः | = क्षीणरागद्वेषमोहदोषतयाव्यंसकवचनत्वेनैकान्तहितस्य<br>शास्त्रप्रणेता । अ. | ६/५ |
| | = दोषाश्चाष्टादश प्रसिद्धा यद्दूषितानां जन्तुनामनाप्तत्वम्,<br>यद्विरहे चाप्तत्वम् । अ.म. | ७२ |
| आप्तवचनम् | = आप्तस्य तीर्थकृतो गणधरस्य वा वचनम् । त.उ. | १/२० |
| आभिग्रहिकमिथ्यात्वम् | = अनाकलिततत्त्वस्याप्रज्ञापनीयताप्रयोजकस्व-<br>स्वाभ्युपगतार्थश्रद्धानम्,<br>* अभिग्रहः कुमतपरिग्रहः, स यत्रास्ति तद्,<br>तद्विपरीतमनाभिग्रहिकम् । ध.प. | ८ |
| आभिनिबोधिकम् | = अभिमुखो निश्चितो यो विषयस्तत्परिच्छेदोंऽशेऽप्ययोग्य-<br>स्पर्शरहितो योग्यसाक्षात्कार इति यावत् । त.उ. | १/१३ |
| आभिनिवेशिकमिथ्यात्वम् | = विदुषोऽपि स्वरससवाहिभगवत्प्रणीतशास्त्रबाधितार्थश्रद्धानम् ।<br>* व्यापन्नदर्शननियतः । ध.प. | ८ |
| आभ्यन्तरशौचम् | = मैत्र्यादिभिश्चित्तमलप्रक्षालनम् । द्वा. | २२/२ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| आम्नायः | = | आम्नायो घोषविशुद्धं परिवर्तनं गुणनं रूपादानमित्यर्थः । त.भा. | ९/२५ |
| | = | आम्नायतेऽभ्यस्यते निर्जरार्थिभिरिति । त.उ. | १/२० |
| आयतिविराधकम् | = | परलोकपीडाकरम् । पञ्च. | २ |
| आयुः | = | एति याति वा इति । श्रा. | ११ |
| आयोज्यकरणम् | = | केवलाभोगेनाचिन्त्यवीर्यतया भवोपग्राहिकर्माणि तथा व्यवस्थाप्य तत्क्षपणव्यापारणं शैलेश्यवस्थाफलम् । द्वा. | १९/१२ |
| | = | शैलेश्यवस्थाफलम् । यो.दृ. | १० |
| आरम्भः | = | पृथिव्यादिजीवसंघट्टपरितापातिपातरूपः । अ. | ७/१ |
| आरम्भवर्जनप्रतिमा | = | एवं चिय आरम्भं वज्जइ सावज्जमट्ठमासं जा । तप्पडिमा पेसेहि वि अप्पं कारेइ उवउत्तो ॥१४॥ विं. | १०/१४ |
| आराधकः | = | ज्ञानाद्याराधनकर्ता । प्र. | १५ |
| | = | धर्मावश्यकयोगेषु भावितात्मा प्रमादपरिवर्जी । सम्यक्त्वज्ञानचारित्राणामाराधको भवति ॥२३२॥ प्रश. | २३२ |
| आराधकत्वम् | = | जिनोक्तानुष्ठानाविनाभावी । ध.प. | १९ |
| आराधना | = | गौरवितप्रीतिहेतुः क्रिया गौरवितसेवा च । द्वा. | १/२० |
| | = | चरमकाले निर्यापणरूपा । द्वा. | २७/२३ |
| आरोग्यम् | = | नीरूजत्वम्, | |
| | * | प्राक्तनसहजौत्पातिकरोगविरहत्वम् । | १२/९ |
| आर्जवः | = | भावविशुद्धिरविसंवादनम् । त.भा. | ९/६ |
| आर्तध्यानम् | = | ऋतं दुखं तत्र भवमार्तं तच्च तद्ध्यानं चैकाग्रचित्तत्वम् आर्त्तध्यानम्, | |
| | * | इष्टानिष्टार्थवियोगावियोगनिमित्तम्, | |
| | * | सविक्लवं चित्तमित्यर्थः । अ. | १०/१ |
| | = | ऋतं दुःखम्, तत्र भवमार्त्तम्, यदि वा अर्त्तिः पीडा याचनं च तत्र भवमार्त्तम् । यो.शा. | ३/७३ |
| | = | ऋतं दुःखम्, तन्निमित्तो दृढाध्यवसायः, ऋते भवमार्तं क्लिष्टम् । ध्या. | ५ |
| आलम्बनम् | = | प्रशस्तं ज्ञानाद्युपकारकम् आलम्ब्यत इत्यालम्बनं प्रवृत्तिनिमित्तम्, शुभमध्यवसानमित्यर्थः । ध्या. | १२ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | = | बाह्यप्रतिमादिविषयध्यानम् । यो.विं. | २ |
| आलयः | = | वसतिः सुप्रमार्जितादिलक्षणा, अथवा | |
| | * | स्त्रीपशुपण्डकविवर्जिता । गु. | ३/१३७ |
| आलोचनम् | = | आलोचनं विवरणं प्रकाशनमाख्यानं | |
| | | प्रादुष्करणमित्यनर्थान्तरम् । त.भा. | ९/२२ |
| | = | स्वकृतस्य पापस्य निश्शल्यतया गुरुसमक्षं प्रकटनम् । गु. | १/६६ |
| आलोचनाप्रायश्चित्तम् | = | वसहीओ हत्थसया बाहिं कज्जे गयस्स विहिपुव्वं । | |
| | | गमणाइगोयरा खलु भणिया आलोयणा गुरूणा ॥७॥ विं. | १६/७ |
| आवरणम् | = | आव्रियतेऽनेनावृणोतीति वा । श्रा. | १० |
| आवर्तः | = | आवर्त्तन्ते प्राणिनोऽस्मिन्निति संसारः । पञ्च. | ४ |
| आवश्यकशुद्धिः | = | अवश्यंकरणीययोगनिरतिचारता । द्वा. | २७/२४ |
| आवश्यकानि | = | नियमतः करणीयानि । ध्या. | ४२ |
| आवश्यकीसा. | = | अवश्यमित्यर्थेऽवश्यशब्दोऽकारान्तोऽप्यस्ति, | |
| | | ततोऽवश्यस्य अवश्यं कर्त्तव्यस्य, क्रिया आवश्यकी । सा. | ४ |
| | = | अवश्यंकर्तव्यैर्ज्ञानाद्यर्थप्रयोजनैर्निर्वृता तत्प्रयोज्रना वा | |
| | | योपाश्रयादिनिर्गमक्रिया सा । पं. | १२/२ |
| | = | अवश्यकर्त्तव्यगोचरा । सा. | ३९ |
| | = | गच्छंतस्सुवउत्तं गुरूवएसेण विहियकज्जेण । | |
| | | आवस्सिय त्ति सद्दो णेया आवस्सिया णामं ॥ सा. | ३६ |
| आवेणिका | = | जे वेणिसंपयाया चित्ता सत्थेसु अपडिबद्ध त्ति । | |
| | | ते तम्मज्जायाए सव्वे आंवेणिया नेया ॥२॥ विं. | ३/२ |
| आशयः | = | अध्यवसायस्थानविशेषः । षो. | ३/५ |
| | = | चित्तपरिणामः । पञ्च. | १ |
| आशयमहत्त्वम् | = | चित्तस्य असङ्कुचितदानादिपरिणामशालित्वम् । षो. | ४/३ |
| आशयविशुद्धिः | = | नवमरसाभिव्यञ्जनया चित्तशुद्धिः । षो. | ९/६ |
| आश्रवः (आस्रवः) | = | आत्मधर्मत्वे सति कर्मबन्धासाधारणकारणम् । त.उ. | १/४ |
| | = | कर्मबन्धहेतवः, मिथ्यात्वादयः । ध्या. | ५० |
| | = | मनोवाक्कायकर्माणि योगाः कर्मशुभाशुभम् । | |
| | | यदास्रवन्ति जन्तूनामास्रवास्तेन कीर्तिताः ॥७४॥ यो.शा. | ४/७४ |
| आसंगः | = | अभिष्वंगः । द्वा. | १८/१८ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| आसनम् | = | कायसन्निवेशविशेषम् । यो.शा. | ४/१२३ |
| आसन्नभव्यः | = | प्रकृत्या शुद्धचेतः, स्थानमानान्तरज्ञः, गुणवद्बहुमानी, औचित्येन प्रवृत्तः, कुग्रहत्यागी, सर्वत्रागमनिष्ठः, | |
| | * | मुक्तेर्निकटवर्ती स चासौ भव्यश्च मुक्तिगमनयोग्यः । अ. | २२/७ |
| | = | अदूरवर्तिनिर्वृत्तयः । पं. | ११/१५ |
| आसेवनशिक्षा | = | आसेवइ य जहुत्तं तहा तहा सम्ममेस सुत्तत्थं । उचियं सिक्खापुव्वं नीसेसं उवहिपेहाए ॥११॥ विं. | १२/११ |
| आस्तिक्यम् | = | अस्तीति मतिरस्येत्यास्तिकाः, तस्य भावः कर्म वा आस्तिक्यम्, | |
| | * | सन्ति खलु जिनेन्द्रप्रवचनोपदिष्टा अतीन्द्रिया जीव-परलोकादयो भावाः इति परिणाम आस्तिक्यम् । यो.शा. | २/१५ |
| | = | अस्त्यात्मादिपदार्थकदम्बकमित्येषा मतिर्यस्य स आस्तिकस्तद्भाव आस्तिक्यम्, | |
| | * | 'तदेव सत्यं निःशङ्कं यज्जिनेन्द्रैः प्रवेदितम्' इत्येवं स्वारसिकः परिणामः । त.उ. | १/२ |
| | = | मन्नइ तमेव सच्चं नीसंकं जं जिणेहिं पण्णत्तं । सुहपरिणामो सच्चं कंखाइविसुत्तियारहिओ ॥१४॥ विं. | ६/१४ |
| आहारसंज्ञा | = | आहाराभिलाषः क्षुद्वेदनीयोदयप्रभवः खल्वात्मपरिणामः । अ.म. | ८१ |
| | | **[ इ ]** | |
| इतिकर्तव्यता | = | रात्रिन्दिवनियतक्रमशुद्धक्रियासन्तानम् । षो. | १३/६ |
| इन्द्रियम् | = | इन्दो जीवः सर्वद्रव्यैष्वैश्वर्ययोगात् विषयेषु वा परमैश्वर्ययोगात्, तस्य लिङ्गमिन्द्रियम्, | |
| | * | लिङ्गनात् सूचनात् प्रदर्शनादुपष्टम्भनात् व्यञ्जनाच्च जीवस्य लिङ्गमिन्द्रियम् । त.भा. | २/१५ |
| इष्टः | = | शास्त्रादिष्टोऽर्थः । उ.प. | ८८२ |
| इष्टकार्यसमृद्धिः | = | वाञ्छितप्रयोजनं मोक्षार्थिनां मोक्षोपायभूता प्रव्रज्या तस्य समृद्धिर्निष्पत्तिरिष्टकार्यसमृद्धिः । अ. | २५/३ |
| इष्टफलम् | = | निष्कलंककल्याणलाभप्रयोजनम् । उ.प. | ३६७ |
| इष्टभावः | = | निर्वाणानुबन्धी कुशलः परिणामः । ल.वि. | ३१० |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| इष्टम् | = | ऋत्विग्भिर्मन्त्रसंस्कारैर्बाह्मणानां समक्षतः ।<br>अन्तर्वेद्यां तु यद्दत्तमिष्टं तदभिधीयते ॥५८७॥ शा.वा. | ५८७ |
| | = | ऋत्विग्भिर्मन्त्रसंस्कारैर्ब्राह्मणानां समक्षतः ।<br>अन्तर्वेद्यां हि यद्दत्तमिष्टं तदभिधीयते ॥११६॥ यो.दृ. | ११६ |
| इष्टसिद्धिः | = | अभिमतार्थनिष्पत्तिः । पं. | ४/३१ |
| | = | विशिष्टमार्गावताररूपा । यो.बिं. | ११९ |
| इष्टापूर्तम् | = | अन्तर्वेद्यां तु यद्दतं, ब्राह्मणानां समक्षतः ।<br>ऋत्विग्भिर्मन्त्रसंस्कारै-रिष्टं तदभिधीयते ॥ | |
| | * | वापीकूपतडागानि, देवतायतनानि च ।<br>अन्नप्रदानमारामाः, पूर्तं तदभिधीयते ॥ अ. | ४/८ |
| इहैव मोक्षः | = | निर्जितमदमदनानां वाक्कायमनोविकाररहितानाम् ।<br>विनिवृत्तपराशानामिहैव मोक्षः सुविहितानाम् ॥२३८॥ प्रश. | २३८ |
| | | **[ ई ]** | |
| ईच्छा | = | इच्छा प्रार्थना कामोऽभिलाषः काङ्क्षा गार्ध्यं<br>मूर्च्छेत्यनर्थान्तरम् । त.भा. | ७/१२ |
| ईच्छाकारसा. | = | जं णियणियकज्जंमी इच्छासंपच्चयत्थं विहिवक्कं ।<br>सो खलु इच्छाकारो तहा पइण्णा य परकज्जे ॥६॥ सा. | ६ |
| | = | एषणं इच्छा, करणं कारः, 'इच्छया ममेदं कुरु'<br>इत्यादिप्रयोगः । सा. | ४ |
| ईच्छाकारादयः | = | श्रद्धार्थव्यलीकार्थवैतथ्यार्थानां शब्दानां कारः करणं<br>यथास्वविषयं प्रयोगः इति । पं. | १२/२ |
| ईच्छादयः | = | इच्छा तद्वत्कथा प्रीतिर्युक्ता विपरिणामिनी ।<br>प्रवृत्तिः पालनं सम्यक् सर्वत्रोपशमान्वितम् ॥३१॥<br>सत्क्षयोपशमोत्कर्षादतिचारादिचिंतया ।<br>रहितं तु स्थिरं सिद्धिः परेषामर्थसाधकम् ॥३२॥ अध्या. | १०/३२ |
| | = | इच्छा तद्वत्कथाप्रीतिः, प्रवृत्तिः पालनं परम् ।<br>स्थैर्यं बाधकभीहानिः, सिद्धिरन्यार्थसाधनम् ॥४॥ ज्ञा. | २७/४ |
| ईच्छायमः | = | इच्छायमो यमेष्विच्छायुता तद्वत्कथा मुदा । द्वा. | १९/२६ |
| ईच्छायोगः | = | कर्तुमिच्छोः श्रुतार्थस्य, ज्ञानिनोऽपि प्रमादतः ।<br>विकलो धर्मयोगो यः स इच्छायोग उच्यते ॥३॥ यो.दृ. | ३ |

| नाम् | व्याख्या | गाथा |
|---|---|---|
| | = चिकीर्षोः श्रुतशास्त्रस्य ज्ञानिनोऽपि प्रमादिनः । कालादिविकलो योग इच्छायोग उदाहृतः ॥२॥ द्वा. | १९/२ |
| | = तज्जुत्तकहापीईइ संगयाविपरिणामि इच्छा । विं. | १७/५ |
| | = तज्जुत्तकहापीईइ संगया विपरिणामिणी इच्छा । यो.विं. | ५ |
| | = तद्वकथाप्रीतियुता तथाऽविपरिणामिनी । यमेष्विच्छाऽवसेयेह प्रथमो यव एव तु ॥२१५॥ यो.दृ. | २१५ |
| | = प्रमाद..... पि चः क्विचत् । नमस्कारादिरूच्छ्वास इच्छायोगोऽभिधीयते ॥ ब्र.सि. | १८९ |
| ईर्यासमितिः | = आवश्यकायैव संयमार्थं सर्वतो युगमात्रनिरीक्षणायुक्तस्य शनैर्न्यस्तपदा गतिरीर्यासमितिः । त.भा. | ९/५ |
| | = लोकातिवाहिते मार्गे चुम्बिते भास्वदंशुभिः । जन्तुरक्षार्थमालोक्य गतिरीर्या मता सताम् ॥३६॥ यो.शा. | १/३६ |
| ईर्ष्या | = प्रतिपक्षाभ्युच्चयजनितो मत्सरविशेषः । शा.वा. | १२ |
| ईहा | = निश्चयविशेषजिज्ञासा चेष्टा ईहा, * ईहा ऊहा तर्कः परीक्षा विचारणा जिज्ञासेत्यनर्थान्तरम् । त.भा.१/१५ | |
| | **[ उ ]** | |
| उचितवृत्तयः | = स्वकुलाद्युचितशुद्धजीवनोपायाः । ल.वि. | १२ |
| उचितानुष्ठानम् | = प्रधानं कर्मक्षपणकारणम् । ध. | ३८० |
| उचितास्थितम् | = अनुरूपप्रतिपत्तिम् । ध.प. | १७ |
| उच्चैर्गोत्रः | = लोकपूज्यतानिदानस्य कर्मविशेषः । सा. | ८ |
| उत्कृष्टाराधकः | = सुक्काए लेसाए, उक्कोसगमंसगं परिणमित्ता । नो मरइ सो हु णिअमा, उक्कोसाराहओ होइ ॥१६९४॥ पं.व. | १६९४ |
| उत्तमः | = सन्तोषसुखप्रधानः । द्वा. | २०/३२ |
| उत्तमश्रद्धा | = पन्नवणिज्जस्स पुणो, उत्तमसद्धा हवे फलं जीसे । विहिसेवा य अतत्ती, सुदेसणा खलिअपरिसुद्धी ॥४५॥ यति. | ४५ |
| उत्तरगुणाः | = पिंडस्स जा विसोही, समिईओ भावणा तवो दुविहो । पडिमा अभिग्गहा वि य, उत्तरगुण मो वियाणाहि ॥ गु. | १/९४ |
| | = यदाह - पिंडस्स जा विसोही समिईओ भावणा तवो दुविहो । पडिमा अभिग्गहो विअ उत्तरगुण मो विआणाहि ॥ (निशीथ भा.६५३४) यो.शा. | १/२६ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| उत्तराध्ययनानि | = | आचारात्परतः पूर्वकाले यस्मादेतानि पठितवन्तो यतयस्तेनोत्तराध्ययनानि । त.उ. | १/२० |
| उत्थानम् | = | चित्तस्याप्रशान्तवाहिता । षो. | १४/३ |
| उत्सर्गसमितिः | = | कफ-मूत्र-मलप्रायं निर्जन्तुजगतीतले ।<br>यत्नाद्यदुत्सृजेत् साधुः सोत्सर्गसमितिर्भवेत् ॥४०॥<br>यो.शा. | १/४० |
| | = | स्थण्डिले स्थावरजङ्गमजन्तुवर्जिते निरीक्ष्य प्रमृज्य च मूत्रपुरीषादीनामुत्सर्ग उत्सर्गसमितिः. । त.भा. | ९/५ |
| उत्सर्गसूत्रम् | = | प्रलम्बग्रहणनिषेधकम् । उ.र. | १३३ |
| उत्सर्गापवादसूत्रम् | = | निषेधैकवाक्यतापन्नविधिपरम् । उ.र. | १३३ |
| उत्सर्गौत्सर्गसूत्रम् | = | निषेधोत्तरनिषेधप्रधानम् । उ.र. | १३३ |
| उत्सर्गः | = | सामान्योक्तो विधिः । उ.प. | ७८१ |
| उत्सर्गापवादौ | = | दव्वादिएहिं जुत्तस्सुस्सग्गो जदुचियं अणुट्ठाणं ।<br>रहियस्स तमववाओ उचियं चिय्नरस्स न उ तस्स ॥७८४॥<br>उ.प. | ७८४ |
| उत्सर्पिणी | = | उत्सर्पयति प्रथमसमयादारभ्य निरन्तरं वृद्धिं नयति तैस्तैः पर्यायैर्भावानिति । उ.प. | १७ |
| उत्साहः | = | वीर्योल्लासः । यो.बिं. | ४११ |
| उत्सूत्रम् | = | तुल्लेवि तेण दोसे पक्खविसेसेण जा विसेसुत्ति ।<br>(सूत्रोत्तीर्णम्) सा णिस्सियत्ति सुत्तुत्तिण्णं तं बिंति मज्झत्थो ॥४॥<br>ध.प. | ४ |
| उदयः | = | निकाचितस्य प्रकृत्यादिबन्धरूपेणावस्थितस्योदयावलिकाप्रविष्टस्य प्रतिक्षणं यो विपाकानुभवः सः । त.उ. | १/३ |
| उदात्तः | = | उच्चोच्चतराद्याचरणस्थितिबद्धचित्तः । यो.बिं. | १८६ |
| | = | निजपरगणनारूपलघुचित्तभावेनोदारः । षो. | १४/१२ |
| | = | महाशयो गाम्भीर्यादिगुणोपेतत्वेन महाचेताः । यो.बिं. | १९३ |
| उदाहरणम् | = | चरित-कल्पितभेदम् । ध्या. | ४८ |
| उद्दिष्टवर्जनप्रतिमा | = | उद्दिट्ठाहाराईण वज्जणं इत्थ होइ तप्पडिया ।<br>दसमासावहि सज्झायझाणजोगपहाणस्स ॥१६॥ विं. | १०/१६ |
| उद्युक्तः | = | बद्धाभिलाषः । सा. | ६२ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| उद्वेगः | = | कष्टसाध्यताज्ञानजनितमालस्यम् । षो. | १४/३ |
| | = | चित्तसंतापः । अ. | २५/३ |
| | = | मनःस्वास्थ्यचलनम् । अ. | १०/३ |
| | = | स्थितस्यैव क्लमः । द्वा. | १८/१४ |
| उन्नतिः | = | बहुजनश्लाघा । द्वा. | ६/२९ |
| उन्मादः | = | मोहावेशः । यो.बिं. | ६० |
| उन्मार्ग्गः | = | अर्हत्प्रणीतक्षायोपशमिकभावरूपसन्मार्ग्ग परित्यागात्मकः शाक्यशैवनास्तिकादिशासनस्वीकारात्मकश्च य उन्मार्ग्गः । स.स. | ११ |
| उपकारः | = | अनर्थत्राणम्, हितकरणम् । प्र. | ३९ |
| | = | उपकारः प्रयोजनं गुणोऽर्थ इत्यनर्थान्तरम् । त.भा. | ५/१७ |
| | = | हितकरणम् । अ. | २८/६ |
| उपकारक्षमा | = | उपकारिप्रोक्तदुर्वचनाद्यपि सहमानस्य । द्वा. | २८/७ |
| उपग्रहः | = | उपग्रहो निमित्तमपेक्षाकारणं हेतुरित्यनर्थान्तरम् । त.भा. | ५/१७ |
| | = | उपष्टम्भदानम्, स च द्रव्यतोऽसमर्थस्याशनपानाद्यानयनलक्षणः, भावतश्च सूत्रार्थप्रदानग्लानसमाधानोत्पादनादिलक्षणः । गु. | ३/१ |
| उपचारः | = | उपचरितवस्तुव्यवहाररूपः । यो.बिं. | १५ |
| उपजीवकः | = | मण्डलीभोक्ता । पं.व. | ३४३ |
| उपदेशः | = | हितप्रवृत्त्यनुकूलवाक्यः । उ.र. | १ |
| | = | तीर्थकरगणधरादिप्रज्ञापनारूपम् । उ.प. | ५०३ |
| | = | शास्त्रप्रज्ञापनम् । यो.बिं. | २२२ |
| उपप्लवः | = | वातादिधातुविकारजनितश्चित्तसंक्षोभः । यो.बिं. | ४५ |
| उपबृंहा | = | सद्गुणानामुत्कीर्तनम् । पं. | १५/२४ |
| उपभोगः | = | पुनः पुनर्भोग्य उपभोगोऽङ्गनादिकः ॥५॥ यो.शा. | ३/५ |
| | = | पुनः पुनरुपभुज्यत इति भवनवलयादिः । श्रा. | २६ |
| | = | बहिःपरिभोगः । द्वा. | ७/७ |
| | = | सकृदन्तर्वा भोजनमुपभोगः । पं. | १/२१ |
| | = | उपभुज्यत इति, उपशब्दस्य सकृदर्थत्वात्सकृद् भुज्यत इत्यर्थः अशनादिः, | |
| | * | अन्तर्भोगो उपभोगः उपशब्दस्यान्तर्वचनत्वात् । श्रा. | २८४ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| उपयुक्तः | = | ज्ञेयप्रत्याख्येयपरिज्ञापरः । सा. | २ |
| | = | ईर्यासमित्यादिसंशुद्धिपूर्वकम् । सा. | ३६ |
| उपयुक्तश्रवणम् | = | निद्दाविगहापरिवज्जिएहिं गुत्तेहिं पंजलिउडेहिं ।<br>भत्तिबहुमाणपुव्वं उवउत्तेहिं सुणेयव्वं ॥ पं. | १/२ |
| उपयोगः | = | उपयुज्यत इति 'उपयोगः' ग्रहणपरिणामः । गु. | ४/९८ |
| | = | उपयुज्यतेऽनेनेति साकारानाकारादिः । ध्या. | ५० |
| उपलम्भनम् | = | सूक्ष्मार्थावगाहनम् । त.उ. | १/३५ |
| उपवासः | = | उपावृत्तस्य दोषेभ्यः सम्यग्वासो गुणैः सह ।<br>उपवासः स विज्ञेयो न तु देहस्य शोषणम् ॥२४१॥ ब्र.सि. | २४१ |
| उपशमः | = | अवराहेऽवि महंते कोहाणुदओ वियाहिओवसमो । स.स. | ४४ |
| | = | भस्मच्छन्नाग्निवत् मिथ्यात्वमोहनीयस्यानन्तानुबन्धिनां च<br>क्रोध-मान-माया-लोभानामनुदयावस्था । यो.शा. | २/२ |
| | = | कषायेन्द्रियनिग्रहः । अ. | १०/५ |
| उपश्रा | = | द्वेषः । | २/६२ |
| | * | एष मे शिष्यः...इत्यपेक्षा पक्षाभ्युपगमस्वरूपा<br>भवत्युपश्रा । गु. | २/६३ |
| उपसंपदासा. | = | उपसंपत् ज्ञानाद्यर्थं गुर्वन्तराश्रयणम् । पं. | १२/३ |
| | = | तयहीणकज्जगहणे वयणं उवसंपया उवगमस्स ।<br>सा पुण तिविहा भणिया नाणे दंसणचरित्ते य । सा. | ६९ |
| | = | उपसम्पद् नाम-अन्यरूपापत्तिः । गु. | ४/११७ |
| | = | तथोपसंपत्तिः, ज्ञानाद्यर्थं गुर्वन्तराश्रयणम् । सा. | ५ |
| उपस्थानम् | = | त्रिसन्ध्यप्रणमादिविनयरूपम् । यो.बिं. | ५८ |
| उपस्थापनम् | = | उपस्थापनं पुनर्दीक्षणं पुनश्चरणं पुनर्व्रतारोपणमित्यनर्थान्तरम् ।<br>त.भा. | ९/२२ |
| उपादेयम् | = | संवररूपम् । ध.प. | ५५ |
| उपाधिपरिशुद्धम् | = | उपाधिभिः उपादेयताबुद्धि-आहारादिदशसंज्ञाविष्कंभफलाभि-<br>सन्धिरहितत्वलक्षणैर्निर्मलभावमानीतम् । उ.प. | २३० |
| उपाध्यायः | = | आचारगोचरविनयं स्वाध्यायं वाऽऽचार्यादनु<br>तस्मादुपाधीयत इत्युपाध्यायः, | |

| नाम. | व्याख्या | गाथा |
|---|---|---|
| | * सङ्ग्रहोपग्रहार्थं चोपाधीयते सङ्ग्रहादीन् वाऽस्योपाध्येतीत्युपाध्यायः । त.भा. | ९/२४ |
| | = स्वाध्यायपाठकः । द्वा. | २९/७ |
| | = उपेत्य समीपमागत्य यस्मात् सकाशात्सूत्रमधीयत इति । स.स. | १९ |
| उपायः | = उपेयसाधको नियमेन कारणं कार्याव्यभिचारीत्यर्थः । पञ्च. | ४ |
| उपालम्भः | = दोषव्यञ्जकं वचनम् । गु. | ३/१ |
| उपासकः | = उपास्ते इति सेवकः । श्रा. | ३२८ |
| उपासकदशाः | = उपासकैरेवं स्थातव्यमिति येष्वध्ययनेषु दशसु वर्ण्यते ताः । त.उ. | १/२० |
| उपेक्षा | = माध्यस्थ्यलक्षणा । द्वा. | १८/६ |
| उभयज्ञः | = उत्सर्गापवाद-कल्प्याकल्प्य-निश्चयव्यवहारादिपदार्थद्वैतपरिच्छेदी । उ.र. | १५० |
| उल्बणभोगः | = खिड्गजनाचरितो भोगो-वस्त्रपुष्पादिभिर्देहसत्कार उल्बणभोगः-देशकालविभववयोऽवस्थधिनौचित्यलक्षणः । पं. | २/९ |
| | **[ ऊ ]** | |
| ऊणोदरिका | = ऊनोदरस्य-स्तोकाहाराभ्यवहारादपरिपूर्णोदरस्य करणम् । पं. | १९/२ |
| ऊर्णः | = शब्दः, स च क्रियादावुच्चार्यमाणसूत्रवर्णलक्षणः । यो.विं. | २ |
| ऊहः | = विज्ञातमर्थमवलम्ब्यान्येषु तथाविधेषु व्याप्त्या वितर्क्कणम् । | |
| | * सामान्यज्ञानम् । यो.शा. | १/५१ |
| | = विज्ञातमर्थमवलम्ब्यान्येषु व्याप्त्या तथाविधवितर्क्कणम् । ल.वि. | १४७ |
| | = वितर्क्कः । षो. | ११/६ |
| | **[ ऋ ]** | |
| ऋजुता | = ऋजुरवक्रमनोवाक्कायकर्मा, तस्य भावः कर्म वा ऋजुता, मनोवाक्कायविक्रियाविरहः । यो.शा. | ४/९३ |
| ऋजुसूत्रः | = सतां साम्प्रतानामर्थानामभिधानपरिज्ञानमृजुसूत्रः । त.भा. | १/३५ |
| ऋतम्भरा | = सम्यग्दर्शनादिपूर्वको देवतापूजनादिर्व्यापारः । ल.वि. | १४४ |
| ऋषिभाषितानि | = प्रत्येकबुद्धादिप्रणीतानि कापिलीयादीनि । त.उ. | १/२० |

| नाम | व्याख्या | गाथा |
|---|---|---|
| | **[ ए ]** | |
| एकाग्रचित्तम् | = अद्वेषादिगुणवतां नित्यं खेदादिषट्कपरिहारात् । सदृशप्रत्ययसंगतमेकाग्रं चित्तमाम्नातम् ॥७॥ अध्या. | २०/७ |
| एषणासमितिः | = अन्नपानरजोहरणपात्रचीवरादीनां धर्मसाधनानामाश्रयस्य चोद्गमोत्पादनैषणादोषवर्जनमेषणासमितिः । त.भा. | ९/५ |
| | = द्विचत्वारिंशता भिक्षादोषैर्नित्यमदूषितम् । मुनिर्यदन्नमादत्ते सैषणा समितिर्मता ॥३८॥ यो.शा. | १/३८ |
| | **[ ऐ ]** | |
| ऐकान्तिकी | = नियमेनाऽसिद्धिरूपपरिहारवती, | |
| | * पातविकला । यो.बिं. | २३५ |
| ऐदंयुगीनमानवः | = तथाविधपुरुषार्थसिद्ध्यर्थिनामपटुदृष्टिनामुन्नमित- जिज्ञासाबुद्धिकन्धराः । पं. | १/१ |
| ऐदम्पर्यम् | = तात्पर्यम्, | ११/९ |
| | * सर्वज्ञेयविषये सर्वज्ञाज्ञैव प्रधानं कारणमित्येवंरूपम् । षो. | ११/९ |
| | = तात्पर्यार्थः । उ.र. | १५५ |
| | **[ औ ]** | |
| औचित्यपालनम् | = समुचिताचाररूपम् । यो.बिं. | १३० |
| औचित्यप्रवृत्तिः | = धर्मार्थादिगोचरन्याय्यप्रवृत्तिप्रधानत्वेन प्रवृत्तिः । द्वा. | १८/२७ |
| औचित्यम् | = सातत्यसत्काराविधिसेवितम् । पञ्च. | १ |
| औचित्ययोगः | = देशकालपुरुषव्यवहाराद्यानुकूल्यम् । षो. | १०/६ |
| औत्पातिकीबुद्धिः | = पुव्वमदिट्ठमसुयमवेइय तक्खणविसुद्धगहियत्था । अव्वाहयफलजोगी बुद्धि उत्पत्तिया नाम ॥३९॥ उ.प. | ३९ |
| औत्सुक्यम् | = अकाले फलवाञ्छा, | ३/८ |
| | * तत्त्वतः आर्तध्यानरूपम् । षो. | ३/८ |
| | = विषयाकाङ्क्षा । अ. | ३२/७ |
| औदार्यम् | = कार्पण्यस्य दानादिपरिणामसङ्कोचलक्षणस्य त्यागः । षो. | ४/३ |
| औदासीन्यम् | = अरक्ताद्विष्टता । शा.वा. | १४९ |
| औपचारिकम् | = उपचारमात्रोद्भवम् । यो.बिं. | १४ |
| औपाधिकीसंज्ञा | = उपाधिप्रवृत्तिनिमित्तिका संज्ञा । त.उ. | १/३५ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | | **[ क ]** | |
| करणम् | = | आत्मनि तत्तद्विज्ञानोत्पादनम् । त.उ. | १/३५ |
| करूणा | = | दीनेष्वार्त्तेषु भीतेषु याचमानेषु जीवितम् । | |
| | | प्रतीकारपरा बुद्धिः कारूण्यमभिधीयते ॥१२०॥ यो.शा. | ४/१२० |
| | = | दुःखहानेच्छा । द्वा. | १८/४ |
| | = | परदुःखविनाशिनी । षो. | ४/१५ |
| | = | मोहासुखसंवेगान्यहितयुता । षो. | १३/९ |
| कर्म | = | अनाचार्यकम्, | |
| | * | कादाचित्कम् । उ.प. | ३८ |
| | = | कम्मं च चित्तोपोग्गलरूवं जीवस्सऽणाइसंबद्धं । | |
| | | मिच्छत्तादिनिमित्तं णाएणमतीयकालसमं ॥५४॥ यो.श. | ५४ |
| | = | मिथ्यादर्शनाऽविरति-प्रमाद-कषाय-योगैः क्रियते इति | |
| | | कर्म ज्ञानावरणीयादिः । ध्या. | १ |
| | = | हिंसा-रागोद्भवं कर्म... । ब्र.सि. | ८४ |
| कर्मनाशहेतुः | = | पूर्वकर्मापनयने तपः, कात्स्न्येन तदपनयने ज्ञानमनागत- | |
| | | कर्माभावे च स्वकारणविघटनद्वारा संयमो हेतुः । अ.म. | ६४ |
| कर्मयोगः | = | शारीरस्पंदकर्मात्मा यदयं पुण्यलक्षणम् । | |
| | | कर्मातनोति सद्रोगात्कर्मयोगस्ततः स्मृतः ॥३॥ अध्या. | १५/३ |
| कल्प्याकल्प्यम् | = | यज्ज्ञानशीलतपसामुपग्रहं निग्रहं च दोषाणाम् । | |
| | | कल्पयति निश्चये यत्तत्कल्प्यमकल्प्यमवशेषम् ॥१४३॥ प्रश. | १४३ |
| | * | यत्पुनरुपघातकरं सम्यक्त्वज्ञानशीलयोगानाम् । | |
| | | तत्कल्प्यमप्यकल्प्यं प्रवचनकुत्साकरं यच्च ॥१४४॥ प्रश. | १४४ |
| कल्पः | = | विधिः आचारः, | |
| | * | जिनस्थविरकल्पिकादिः, | |
| | * | कल्प्यं ग्राह्यम् । सा. | ३१ |
| कल्पव्यवहारौ | = | आभवत् प्रायश्चित्तदानप्रायश्चित्तयोः | |
| | | कल्पनाच्छेदनाद्व्यवहरणाद्दानाच्च कल्पव्यवहारौ । त.उ. | १/२० |
| कल्पस्थिताः | = | आचेलक्यादिदशविधकल्पे स्थिताः | |
| | | प्रथमचरमजिनसाधवः । गु. | २/२३० |
| कल्पिकप्रतिसेवा | = | रागद्वेषाभ्यां रहिता या सा । उ.र. | १३१ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| कल्याणमित्रयोगः | = | स्वपरयोः सर्वदा श्रेयस्कराणां सुहृदां साधुसाधर्मिकस्वरूपाणां योगः सम्बन्धः । उ.प. | १६३ |
| कल्याणम् | = | परिशुद्धप्रवचनाधिगमातिशायिधर्मकथाऽविसंवादिनिमित्तादिलक्षणम् । यो.बिं. | २८८ |
| कल्याणसाधनम् | = | भव्यसत्त्वशुभप्रयोजनकारि । द्वा. | १५/१४ |
| कषशुद्धिः | = | प्राणवधप्रभृतीनां प्रतिषेधः पापकरणानां यः ।<br>ध्यानाध्ययनादीनां यश्च विधिः स खलु धर्मकषः ॥१५२॥<br>मार्ग. | १५३ |
| | = | विधिप्रतिषेधौ, | १/५ |
| | * | पाणिवहाईयाणं, पावट्ठाणाण जो उ पडिसेहो ।<br>झाणज्झयणाईणं, जो य विही एस धम्मकसो ॥ अ. | १/५ |
| | * | मनोवाक्कायकरणकारणानुमतिभिरर्थानर्थाश्रयेणाजन्म सूक्ष्मबादराणां प्राणातिपातादीनां प्रतिषेधो रागादिनिग्रहाप्रतिघहेतुभूतयोश्च ध्यानतपसोर्विधिर्यत्र शास्त्रे तत्कषशुद्धम् । अ. | १/५ |
| | * | सुहुमो असेसविसओ, सावज्जे जत्थ अत्थि पडिसेहो ।<br>रागाइविअऽणसहं, झाणइ य एस कससुद्धो ॥ अ. | १/५ |
| | = | विधिप्रधिषेधौ कष इति । ध. | ९३ |
| | = | विहिपडिसेहा उ कसो तज्जोगक्खेमकारिणी किरिया ।<br>छेओ तावो य इहं वाओ जीवाइतत्ताणम् ॥ ध.प. | ८७ |
| | = | सुहुमो असेसविसओ सावज्जे जत्थ अत्थि पडिसेहो ।<br>रागाइ विअडणसहं, झाणाइ अ एस कससुद्धो ॥१०६८॥<br>पं.व. | १०६८ |
| | = | विधयः प्रतिषेधाश्च, भूयांसो यत्र वर्णिताः ।<br>एकाधिकारा दृश्यन्ते, कषशुद्धिं वदन्ति ताम् ॥१८॥ अ.उ. | १/१८ |
| | * | सिद्धान्तेषु यथा ध्याना-ध्ययनादिविधिव्रजाः ।<br>हिंसादीनां निषेधाश्च, भूयांसो मोक्षगोचराः ॥१९॥ अ.उ. | १/१९ |
| | = | इअरम्मि कसाईआ, विसिट्ठलेसा तहेगसारत्तं ।<br>अवगारिणि अणुकंपा, वसणे अइनिच्चलं चित्तं ॥११९७॥<br>पं.व. | ११९७ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| कषायः | = | कष्यन्ते हिंस्यन्ते प्राणिनोऽस्मिन्ननेनेति वा कषः संसारः कर्म वा, तस्याऽऽया लाभाः प्राप्तय इति कृत्वा । यो.शा. | ४/६ |
| | = | कलुषयत्यात्मानमिति कलुषाः -कषायाः । ध्या. | २२ |
| | = | कषस्य-संसारस्यायः-लाभो येभ्यस्ते । गु. | ४/९८ |
| काङ्क्षा | = | अन्यान्यदर्शनग्रहः । यो.शा. | २/१७ |
| | = | ऐहलोकिकपारलौकिकेषु विषयेष्वाशंसा काङ्क्षा । त.भा. | ७/१८ |
| | = | कंखा कुमयभिलासो दयाइगुणलेसदंसणओ ॥२९॥ स.स. | २९ |
| कान्तादृष्टिः | = | कान्तायामेतदन्येषां प्रीतये धारणा परा ।<br>अतोऽत्र नान्यमुन्नित्यं मीमांसास्ति हितोदया ॥१६२॥ यो.दृ. | १६२ |
| कान्तिः | = | शारीरं तेजः । यो.शा. | ३/१३ |
| कामः | = | परपरिगृहीतास्वनूढासु वा स्त्रीषु दुरभिसन्धिः कामः । यो.शा. | १/५६ |
| | = | यतः आभिमानिकरसानुविद्धा सर्वेन्द्रियप्रीतिः सः । यो.शा. | १/५२ |
| कामरागः | = | प्रियप्रमदादिविषयासाधनवस्तुगोचरः । उ.प. | १८९ |
| कायः | = | शरीरमात्मनो निवासः । यो.शा. | ४/७४ |
| कायक्लेशः | = | कायस्य देहस्य क्लेशः औचित्येन विबाधनम् । पं. | १९/२ |
| कायगुप्तिः | = | चेष्टानिवृत्तिलक्षणा, यथासूत्रं चेष्टानियमलक्षणा च, | |
| | * | उपसर्गप्रसङ्गेऽपि कायोत्सर्गजुषो मुनेः ।<br>स्थिरीभावः शरीरस्य कायगुप्तिर्निगद्यते ॥४३॥ | १/४३ |
| | * | शयनाऽऽसननिक्षेपादानचङ्क्रमणेषु यः ।<br>स्थाने च चेष्टानियमः कायगुप्तिस्तु साऽपरा ॥४४॥ यो.शा. | १/४४ |
| | = | शयनाऽऽसनाऽऽदाननिक्षेप-स्थान-चङ्क्रमणेषु कायचेष्टानियमः कायगुप्तिः । त.भा. | ९/४ |
| | = | उपसर्गाद्युपनिपातेऽपि निश्चलता योगनिरोधे सर्वथा चेष्टापरिहारो वा शयनासनादिषु सिद्धान्तोक्तयतनाप्रकारेण चेष्टानियमरूपा वा । अ.म. | ५७ |
| कायदुष्प्रणिधानम् | = | शरीरावयवानां पाणि-पादादीनामनिभृततावस्थानम् । यो.शा. | ३/११५ |
| काययोगः | = | औदारिकवैक्रियाहारकशरीरव्यापाराहृतवाग्द्रव्यसमूहसाचिव्याज्जीवव्यापारो । ध्या. | ३ |
| | = | कायात्मप्रदेशपरिणामो गमनादिक्रियाहेतुः काययोगः । त.भा. | ६/१ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| काययोगप्रधाना पूजा | = | सव्वगुणाहिगविसया नियमुत्तमवत्थुदाणपरिओसा ।<br>कायकिरियापहाणा समंतभद्दा पढमपूया ॥३॥ विं. | ८/३ |
| कायवासितप्रायम् | = | सम्मूर्च्छनजप्रवृत्तितुल्यकायचेष्टितप्रायं मानसोपयोगशून्यत्वात् ।<br>यो.विं. | १२ |
| कायव्युत्सर्गाध्ययनम् | = | कृतस्य पापस्य यत्र स्थानमौनध्यानरूपकायत्यागेन<br>विशुद्धिराख्यायते सः । त.उ. | १/२० |
| कायोत्सर्गः | = | कायस्य शरीरस्य स्थान-मौन-ध्यान-<br>क्रियाव्यतिरेकेणान्यत्रोच्छ्वासितादिभ्यः<br>क्रियान्तराध्यासमधिकृत्य य उत्सर्गस्त्यागो<br>'नमो अरहंताणं' इति वचनात् प्राक् स कायोत्सर्गः ।<br>यो.शा. | ३/१२९ |
| कारकसम्यक्त्वम् | = | यद्यथा भणितं सूत्रेऽनुष्ठानं तत्तथा करोति सति यस्मिन्<br>सम्यग्दर्शने परमशुद्धिरूपे कारकं तत्तु कारयतीति कारकम् । श्रा. | ५० |
| कारणम् | = | करणं ति परिणामो । विं. | ६/७ |
| कारुण्यम् | = | कारुण्यमनुकम्पा दीनानुग्रह इत्यनर्थान्तरम् । त.भा. | ७/६ |
| कार्मिकीबुद्धिः | = | उवओगदिट्ठसारा कम्मपसंगपरिघोलणविसाला ।<br>साहुक्कारफलवई कम्मसमुत्था हवइ बुद्धि ॥४६॥ उ.प. | ४६ |
| कालः | = | कलनं कालः कलासमूहो वा कालः । ध्या. | ३८ |
| | = | चरमपुद्गलपरावर्त्तलक्षणः तथाभव्यत्वपरिपाकतो बीजाधानादिषु<br>स्यादपि कालः । उ.र. | ६४ |
| कीर्तिः | = | दानपुण्यफला । श्रा. | २४ |
| | = | बहुजनकृतगुणप्रवादरूपा । षो. | १२/९ |
| | = | स्वगतश्लाघा । सा. | ५९ |
| | = | स्वचित्तसंतोषजननसौभाग्यादिवृद्धिः । यो.बिं. | १२५ |
| कुगतयः | = | नारकतिर्यक्कुनरकुदेवत्वलक्षणदुर्गतयः । अ. | ७/५ |
| कुग्रहः | = | शास्त्रबाधिताभिनिवेशः । अ. | ९/८ |
| कुग्रहहताः | = | शाक्यादिकुदृष्टिसृष्टिमहावासनामलमलिनस्वान्तस्य<br>जीवस्य हेतुयुक्तिस्पष्टदृष्टान्तशतसहस्रैरपि<br>नीलीरक्तवासोवद्बहुशोऽपि प्रक्षाल्यमानस्य<br>तत्तत्संस्कारानुवर्त्तनरूपः कुत्सितो ग्रहः | |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | | कुग्रहस्तेन हता अर्थापत्त्या दुर्गदुर्गति-<br>पातेन नाशं नीताः । स.स. | ११ |
| कुतर्कग्रहः | = | शुष्कतर्काभिनिवेशः । द्वा. | २३/३२ |
| कुदृष्टिः | = | सम्यक्त्वभ्रंशानन्तरं मिथ्यात्वमुपगतः । उ.र. | ७७ |
| कुम्भकः | = | नाभिपद्मे स्थिरीकृत्य रोधनं स तु कुम्भकः ॥ यो.शा. | ५/७ |
| | = | स्तंभवृत्तिः । द्वा. | २२/१७ |
| कुलधर्मानुपालनम् | = | अविरुद्धस्वकुलाचारानुवर्तनम् । यो.बिं. | १२८ |
| कुलनिश्रितः | = | गामे वा णगरे वा, कुलेशु संकामिएसु संमत्तं ।<br>जो गिण्हइ असणाई, सो खलु कुलणिस्सिओ भणिओ ॥ गु. | ३/७४ |
| कुलम् | = | एकाचार्यसन्ततिसंस्थितिः । त.भा. | ९/२४ |
| | = | चान्द्रनागेन्द्रादिः । उ.प. | ४१९ |
| | = | पितृ-पितामहादिपूर्वपुरुषवंशः । यो.शा. | १/४७ |
| कुलजः | = | प्रशस्यकुलजातोऽनिन्द्यकुलजातो वा । पं. | ७/४ |
| कुलयोगिनः | = | ये योगिनां कुले जातास्तद्धर्मानुगताश्च ये ।<br>कुलयोगिन उच्यन्ते गोत्रवन्तोऽपि नापरे ॥२१०॥ | २१० |
| | * | सर्वत्राऽद्वेषिणश्चैते गुरुदेवद्विजप्रियाः ।<br>दयालवो विनीताश्च बोधवन्तो यतेन्द्रियाः॥२११॥ यो.दृ. | २११ |
| | = | ये योगिनां कुले जातास्तद्धर्मानुगताश्च ये ।<br>कुलयोगिन उच्यन्ते गोत्रवन्तोऽपि नापरे ॥२१॥ | १९/२१ |
| | * | सर्वत्राद्वेषिणश्चैते गुरुदेवद्विजप्रियाः ।<br>दयालवो विनीताश्च बोधवन्तो जितेन्द्रियाः ॥२२॥ द्वा. | १९/२२ |
| कुशलधीः | = | मुक्तिपथानुवर्तिनीबुद्धिः । यो.बिं. | १०३ |
| कुशलाशयः | = | क्षायोपशमिकभावः । पञ्च. | ४ |
| कुशीलः | = | शीलं चरणं तद् यस्य कुत्सितं भवेत् स इह कुशील<br>उच्यते । गु. | ४/२८ |
| कुसुमवृष्टिः | = | दशार्धवर्णपुष्पवर्षः । पं. | २/१४ |
| *कृतज्ञता* | *=* | *परकृतोपकारपरिज्ञानम् । द्वा.* | *१२/१३* |
| | = | परकृतोपकारपरिज्ञानम् । यो.बिं. | १२६ |
| कृतयोगिनः | = | चतुर्थषष्ठाष्टमादिभिर्भावितशरीराः, इतरेऽकृतयोगिनः । गु. | २/३३० |
| कृतार्थः | = | सिद्धप्रयोजनः । त.उ. का. | १/१८ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| कृत्स्नकर्मक्षयः | = निखिलमलप्रलयः । यो.बिं. | १३६ |
| कृपणाः | = स्वभावतः एव सतां कृपास्थानम् । यो.बिं. | १२३ |
| केवलज्ञानफलम् | = एयम्मि भवोग्गाहिकम्मखयओ उ होइ सिद्धत्तं ।<br>नीसेससुद्धधम्मासेवणफलमुत्तमं नेयं ॥२०॥ विं. | १८/२० |
| केवलज्ञानम् | = केवनाणमणंतं जीवस्सरूवं तयं निरावरणं ।<br>लोगालोगपगासगमेगविहं निच्चजोइ त्ति ॥१॥ विं. | १८/१ |
| | = केवलम्-मत्याद्यसहवृत्ति, परिपूर्णं-<br>स्वेतरज्ञानविषयताव्यापकविषयताकं, समग्रं-<br>पदार्थत्वव्यापकविषयताकम्, असाधारणं-<br>सजातीयद्वितीयरहितम्, निरपेक्षम्-<br>आलोचकेन्द्रियावग्रहप्रणिधानाद्यपेक्षारहितम्,<br>विशुद्धं-निःशेषावरणमलरहितम् । त.उ. | १/३० |
| | = ज्ञानान्तरासहचरितं सर्वविषयं वा । त.उ. | १/९ |
| | = शाश्वतमनन्तमनतिशयमनुपममनुत्तरं निरवशेषम् ।<br>संपूर्णमप्रतिहतं संप्राप्तः केवलं ज्ञानम् ॥२६८॥ प्रश. | २६८ |
| | = सकलद्रव्यपर्यायगोचरत्वात् परिपूर्णज्ञानमुपयोगविशेषः । यो.बिं. | ३६७ |
| क्रिया | = विहितनिषिद्धाचरणत्यागरूपा । षो. | ३/२ |
| | = स्वसमयपरसमयोदिताचाररूपा । ध.प. | १६ |
| क्रियापरः | = चारित्रमोहनीयकर्मक्षयोपशमजनितमुक्तिसाधनानुष्ठानकरणपरायणः ।<br>उ.र. | १० |
| | = चारित्रमोहनीयकर्मक्षयोपशमाद् मुक्तिसाधनानुष्ठानकरणपरायणः ।<br>उ.प. | १९९ |
| | = चारित्रमोहनीयकर्मक्षयोपशमान्मुक्तिसाधनानुष्ठानकरणपरायणः ।<br>पं. | ३/६ |
| | = मूलगुणोत्तरगुणाराधनायां बद्धकक्षः । उ.प. | ८५२ |
| | = मूलगुणोत्तरगुणाराधनायां बद्धकक्षः । उ.र. | १५० |
| क्रियावञ्चकः | = तेषामेव प्रणामादिक्रियानियम इत्यलम् ।<br>क्रियावञ्चकयोगः स्यान्महापापक्षयोदयः ॥२२०॥ यो.दृ. | २२० |
| | = तेषामेव प्रणामादिक्रियानियम इत्यलम् ।<br>क्रियावञ्चकयोगः स्यान्महापापक्षयोदयः ॥३०॥ द्वा. | १९/३० |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| क्रोधः | = | अप्रीतिलक्षणः । गु. | ४/२ |
| | = | कृत्याकृत्यविवेकोन्मूलकः प्रज्वलनात्मकश्चित्तधर्मः । द्वा. | २१/४ |
| | = | क्रोधः कोपो रोषो द्वेषो भण्डनं भाम इत्यनर्थान्तरम् । त.भा. | ८/१० |
| | = | परस्यात्मनो वा अपायमविचार्य कोपकरणं क्रोधः । यो.शा. | १/५६ |
| क्रोधादयः | = | अपराधाक्षमा क्रोधो, मानो जात्याद्यहंकृतिः ।<br>लोभः परार्थतृष्णा च, माया कपटचेष्टितम् ॥५॥ यो.सा. | ३/५ |
| क्लेशाः | = | अविद्या चास्मिता चैव रागद्वेषौ तथापरौ ।<br>पञ्चमोऽभिनिवेशश्च क्लेशा एते प्रकीर्तिताः ॥ द्वा. | २५/१८ |
| | | **[ क्ष ]** | |
| क्षमा | = | अदीनमनस्कतयाऽनुभवनम् । उ.र. | ८३ |
| | = | क्षमा तितिक्षा सहिष्णुत्वं क्रोधनिग्रह इत्यनर्थान्तरम् । त.भा. | ९/६ |
| | = | क्षान्तिः शक्तस्याशक्तस्य वा सहनपरिणामः । यो.शा. | ४/९३ |
| | = | क्षान्तिराक्रोशादिश्रवणेऽपि क्रोधत्यागः । द्वा. | २७/२४ |
| | = | प्रशान्तवाहितारूपा चित्तपरिणतिः । यो.शा. | ४/११ |
| | = | सत्येतरदोषश्रवणेन कार्यतत्त्वमविचार्यान्तर्बहिश्च<br>कोपोदयाद्विक्रियामापाद्यमानस्यात्मनो निरोधनम् । यो.बिं. | ५४ |
| क्षयः | = | मिथ्यात्वमोहनीयस्यानन्तानुबन्धिनां च निर्मूलनाशः । यो.शा. | २/२ |
| क्षयोपशमः | = | क्षय उदीर्णस्य विरत्यावारककर्मणो विनाशः,<br>तेन सहोपशमस्तस्यैवानुदीर्णस्य विपाकोदयापेक्षया<br>विष्कम्भितोदयत्वं क्षयोपशमः । अ. | ८/५ |
| | = | क्षयो मिथ्यात्वमोहनीयस्यानन्तानुबन्धिनां च<br>उदितानां देशतो निर्मूलनाशः, अनुदितानां चोपशमः,<br>क्षयेण युक्त उपशमः क्षयोपशमः । यो.शा. | २/२ |
| क्षान्त्यादयः | = | क्रोधादिप्रतिपक्षा जीवपरिणामाः । अ.म. | ३ |
| क्षिप्तचित्तम् | = | विषयेषु कल्पितेषु च पुरःस्थितेषु च निवेशितं रजसा ।<br>सुखदुःखयुग्बहिर्मुखमायातं क्षिप्तमिह चित्तम् ॥४॥ अध्या. | २०/४ |
| क्षुद्रः | = | कृपणः । यो.बिं. | ८७ |
| | = | कृपणः । यो.दृ. | ७६ |
| क्षेत्रम् | = | अवगाहना-स्वव्याप्यनभःप्रदेश संयोगः, | ४/१३८ |
| | * | 'एकप्रदेशम् ' अवगाह्यसमव्याप्तप्रदेशावच्छिन्नं नभः, | ४/१३९ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| | * व्याप्त्याख्यः संयोगस्तु क्षेत्रम् । गु. | ४/१३९ |
| | = आविर्भूतयोः पालना । ध.प. | ८७ |
| | = *लब्धपालनलक्षणम् । ल.वि.* | *१०८* |
| | = वीतरागधर्मसाधवः । ध. | २०३ |
| क्षेपः | = अन्तरान्तरान्यत्र चित्तन्यासः । द्वा. | १८/१७ |
| | = अन्तरान्तरान्यत्र चित्तन्यासः । षो. | १४/३ |
| | **[ ख ]** | |
| खरण्टना | = दुर्वाक्यैर्निर्भत्सना । पं. | १२/९ |
| | = दुर्वाक्यैर्भर्त्सना । सा. | १६ |
| खेदः | = पथिपरिश्रान्तवत्पूर्वक्रियाप्रवृत्तिजनितमुत्तरक्रियाप्रवृत्तिप्रतिबन्धकं दुखम् । षो. | १४/३ |
| | = प्रवृत्तिजः क्लमः । द्वा. | १८/१३ |
| | **[ ग ]** | |
| गम्भीरः | = अतुच्छाशयः । पं. | १२/३६ |
| | = अलक्षितचित्ताभिप्रायः । सा. | ६१ |
| गच्छः | = गुरुसेवाभ्यासवतां शुभानुबन्धो भवे परत्रापि । तत्परिवारो गच्छस्तद्वासे निर्जरा विपुला ॥११४॥ मार्ग. | ११४ |
| | = गुरुपरिवारो गच्छो, तत्थ वसंताण निज्जरा विउला । पं.व. | ६९६ |
| | = स्वकीयसाधुपरिवारः । पं. | १२/४७ |
| गच्छस्वामी | = सूत्रार्थे निष्णातः प्रियदृढधर्मोऽनुवर्तनाकुशलः । गम्भीरो लब्धिनिधिः कृतकरणः शुद्धजातिकुलः ॥२५३॥ | २५३ |
| | प्रवचनदृढनुरागः सोपग्रहसङ्ग्रहः स्थिरप्रकृतिः । पुरुषोत्तम इह गच्छस्वामी भणितो जिनवरेन्द्रैः ॥२५४॥ मार्ग. | २५४ |
| गणः | = त्रयाणां कुलानां समानसामाचारीकाणामत एव परस्परसापेक्षाणां समवायः । उ.प. | ४१९ |
| | = परस्परसापेक्षानेककुलसमुदायः । पं.व. | १०३ |
| | = स्थविरसन्ततिसंस्थितिः । त.भा. | ९/२४ |
| गणधरः | = तीर्थकरशिष्यो मातृकापदत्रयोपलंभानन्तरं समुद्घाटितसमस्तश्रुतोपयोगः उ.प. | ४१९ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| | = देवादानवमानवादिमाननीयमहिमातीर्थकराग्रिमशिष्यः । यो.बिं. | २८९ |
| गणस्वामी | = सुत्तत्थे णिम्माओ, पिअदढधम्मोऽणुवत्तणाकुसलो ।<br>जाईकुलसंपण्णो, गंभीरो लद्धिमंतो अ ॥१३१५॥ | १३१५ |
| | संगहुवग्गहनिरओ, कयकरणो पवयणाणुरागी अ ।<br>एवंविहो उ भणिओ, गणसामी जिणवरिंदेहिं ॥१३१६॥<br>पं.व. | १३१६ |
| गणिः | = गणाधिपतिः । द्वा. | २९/७ |
| गमाः | = अर्थमार्ग्गाः । ल. वि. | ५ |
| गरः | = कुद्रव्यसंयोगजो विषविशेषः । यो.बिं. | १५५ |
| गरानुष्ठानम् | = दिव्यभोगाभिलाषेण कालांतरपरिक्षयात् ।<br>स्वादृष्टफलसंपूर्त्तेर्गरानुष्ठानमुच्यते ॥५॥ अध्या. | १०/५ |
| | = दिव्यभोगाभिलाषेण गरः कालान्तरे क्षयात् ॥१२॥ द्वा. | १३/१२ |
| गर्हा | = दुष्कृतेष्विहपरभवगतेषु अकर्तव्यबुद्धिसारा परसाक्षिकी । पञ्च. | १ |
| | = स्वोत्कर्षार्थकेतरगुणवन्निन्दा । उ.र. | ९७ |
| गर्हितम् | = देश-जाति-कुलापेक्षया निन्दितं कर्म्म । यो.शा. | १/५० |
| गाम्भीर्यम् | = परैरलब्धमध्यत्वम् । षो. | ४/४ |
| गीतार्थः | = बहुश्रुतः । पं. | १४/२० |
| | = यथावदवगतोत्सर्गापवादशुद्धसर्वज्ञवचनगर्भः साधुविशेषः ।<br>उ.प. | ७७३ |
| | = गीतं सूत्रं अर्थस्तद्विचारः, तदुभयं विद्यते येषां ते<br>गीतार्थाः सुज्ञातागमार्थाः,<br>* यदागमः-गीयं भन्नइ सुत्तं, अत्थो तस्सेव होइ वक्खाणं ।<br>उभएण य संजुत्तो, सो गीयत्थो मुणेयव्वो ॥ स.स. | १० |
| | = स्वभ्यस्तसूत्रार्थाः । द्वा. | ३/१ |
| गीतार्थागीतार्थाः | = अधिगतनिशीथान्तश्रुताः, अगीतार्थाः - तदितरे । गु. | २/३२८ |
| गुणः | = जीवस्वभावाविनाभूताः सामान्येन ज्ञानादयः,<br>विशेषेण केवलज्ञानादयः । षो. | ९/७ |
| | = दाक्षिण्यादयः । त.उ. का. | १/१३ |
| गुणत्वपारतन्त्र्यम् | = मोहानुत्कर्षसाधनम् । अ. | २२/४ |
| गुणरागः | = औदार्यदाक्षिण्यादिगुणबहुमानः । उ.प. | १०३७ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | = | औदार्यदाक्षिण्यादिगुणबहुमानः । उ.र. | १९६ |
| गुणरागी | = | विशुद्धाध्यवसायतया स्वतेषु परगतेषु वा गुणेषु-ज्ञानादिषु रागः-प्रमोदो यस्यास्त्यसौ गुणरागी, निर्भत्सर इत्यर्थः । पं. | ३/६ |
| | = | विशुद्धाध्यवसायतया स्वगतेषु परगतेषु वा गुणेषु ज्ञानादिषु रागः प्रमोदो यस्यास्त्यसौ, मत्सरविरोधिपरिणामवान् । उ.र. | १० |
| | = | विशुद्धाध्यवसायतया स्वगतेषु वा परगतेषु वा गुणेषु ज्ञानादिषु रागः प्रमोदो यस्यास्त्यसौ गुणरागी निर्मत्सर इत्यर्थः । उ.प. | १९९ |
| गुणस्थानकपरिणामवन्तः | = | नियमाद् मार्ग्गमेवानुसारीणः । उ.प. | ६०१ |
| गुणस्थानम् | = | गुणानां ज्ञानादीनां स्थानं विशेषः । अ. | २७/६ |
| गुप्तिः | = | आत्मसंरक्षणं मुमुक्षोर्योगनिग्रहः, | |
| | * | प्रवृत्ति-निवृत्तिलक्षणा गुप्तिः । | १/३४ |
| | = | सम्यग्योगनिग्रहो गुप्तिः । त.भा. | ९/४ |
| गुरुः (सुगुरुः) | = | मातृपितृकलाचार्यतज्जातिवृद्धधर्मोपदेष्टा । षो. | ४/३ |
| | = | अनुयोगवृद्धः । उ.र. | १ |
| | = | गृणाति शास्त्रार्थमिति । श्रा. | १ |
| | = | गृणाति शास्त्रार्थम् इति । यो.श. | २४ |
| | = | ज्ञानवृद्धः । द्वा. | २७/१ |
| | = | दीक्षाचार्यः - ज्ञानादियुतः-सम्यग्ज्ञानदर्शनचारित्रयुक्तः । पं. | २/११ |
| | = | धर्मज्ञो धर्मकर्ता च सदा धर्मपरायणः ।<br>सत्त्वेभ्यो धर्मशास्त्रार्थदेशको गुरुरुच्यते ॥ अ. | ३/६ |
| | = | पव्वज्जाजोग्गगुणेहिं संगओ विहिपवण्णपव्वज्जो ।<br>संविअगुरुकुलवासो सययं अक्खलिअसीलो अ ॥१०॥ | १० |
| | | सम्मं अहीअसुत्तो, तत्तो विमलयरबोहजोगाओ ।<br>तत्तण्णू उवसंतो, पवयणवच्छल्लजुत्तो अ ॥११॥ | ११ |
| | | सत्ताहिअरओ अ तहा, आएओ अणुवत्तगो अ गंभीरो ।<br>अविसाई परलोए, उवसमलद्धीइकलिओ अ ॥१२॥ | १२ |
| | | तह पवयणत्थवत्ता सगुरुअणुन्नायगुरुपओ चेव ।<br>एआरिसो गुरु खलु, भणिओ रागाइरहिएहिं ॥१३॥ पं.व. | १३ |
| | = | महाव्रतधरा धीरा भैक्षमात्रोपजीविनः ।<br>सामायिकस्था धर्मोपदेशका गुरवो मताः ॥८॥ यो.शा. | २/८ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| | = ववहारं जाणंतो, ववहारं चेव पन्नवेमाणो ।<br>ववहारं फासंतो, गुरुगुणजुत्तो गुरू होइ । गु. | २/१ |
| | = उभयण्णू वि किरियापरो दढं पवयणाणुरागी य ।<br>ससमयपण्णवओ परिणओ य पण्णो य अच्चत्थं ॥८५२॥<br>उ.प. | ८५२ |
| | = सम्यग्ज्ञानक्रियायुक्तः सम्यग्धर्मशास्त्रार्थदेशकः,<br>* धर्मज्ञो धर्मकर्ता च, सदा धर्मपरायणः ।<br>सत्त्वेभ्यो धर्मशास्त्रार्थदेशको गुरुरुच्यते ॥<br>* जो जेण सुद्धधम्मे निओइओ संजएण गिहिणा वा ।<br>सो चेव तस्स भण्णति धम्मगुरू धम्मदाणाओ ॥ पं. | १/९ |
| | = गुरुर्गृहीतशास्त्रार्थः परां निःसङ्गतां गतः ।<br>मार्त्तण्डमण्डलसमो भव्याम्भोजविकाशने ॥ उ.प.<br>* गुणानां पालनं चैव तथा वृद्धिश्च जायते ।<br>यस्मात्सदैव स गुरुर्भवकान्तारनायकः ॥ उ.प. | १८४ |
| | = ज्ञानादिमान् प्रसिद्धश्च वत्सलः कुलजो महान् ॥२१५॥ | २१५ |
| | गुणानां पालनं चैव तथा वृद्धिश्च जायते ।<br>यस्मात् सदैव स गुरुर्भवकान्तारनायकः ॥२१६॥ ब्र.सि. | २१६ |
| | = पञ्चमहाव्रतधरः समशत्रुमित्रः सद्धर्म्मोपदेशदायी धर्माचार्यः ।<br>स.स. | २९ |
| | = सुगुरुत्तं साहूणं, गंथच्चाएण होइ नाणीणं । गु. | ४/१ |
| | = तत्थ सुविज्जो य इमो आग्गं जो विहाणओ कुणइ ।<br>चरणारुग्गकरो खलु एवमित्थ गुरू वि विन्नेओ ॥५॥ विं. | १५/५ |
| | * जस्स समीवे भावाउरा तहा पाविऊण विहिपुव्वं ।<br>चरणारुग्गं पकरंति सो गुरू सिद्धकम्मुत्थ ॥६॥ विं. | १५/६ |
| | * एसो पुण नियमेणं गीयत्थाइगुणसंजुओ चेव ।<br>धम्मकहापक्खेवगविसेसओ होइ उ विसिट्ठो ॥८॥ विं. | १५/८ |
| | * धम्मकहाउज्जुत्तो भावन्नू परिणओ चरित्तम्मि ।<br>संवेगवुड्ढिजणओ सम्मं सोमो पसंतो य ॥९॥ विं. | १५/९ |
| गुरुदोषः | = गुरुः-महान् दोषो-दूषणमशुभकर्मबन्धादिरूपो यस्मिन्नसौ<br>गुरुदोषः । पं. | ५/१२ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | = | प्रवचनोपघातादिः । षो. | १/९ |
| गुरुपदार्हः | = | विधिप्रतिपन्नप्रव्रज्यः १, समुपासितगुरुकुलः २, अस्खलितशीलः ३, सम्यगधीतागमः ४, तत एव विमलतरबोधात्तत्त्ववेदी ५, उपशान्तः ६, प्रवचनवत्सलः ७, सत्त्वहितरतः ८, आदेयः ९, अनुवर्तकः १०, गम्भीरः ११, अविषादी १२, उपशमलब्ध्यादिसम्पन्नः १३, प्रवचनार्थवक्ता १४, स्वगुर्वनुज्ञातगुरुपद १५ श्चेति ॥ ध. | २३० |
| गुरुपरिपाटीशुद्धम् | = | अविच्छिन्नपूर्वाचार्यपरम्परावचनानुसरणपवित्रम् । ध.प. | १ |
| गुरुपारतन्त्र्यम् | = | ज्ञानाधिकाचार्यायत्तत्वम् । पं. | ११/७ |
| | = | गुर्वाज्ञावशवर्तित्वम् । षो. | २/१० |
| गुरुप्रतिपत्तिः | = | अभ्युत्थानं तदालोकेऽभियानं च तदागमे ।<br>शिरस्यञ्जलिसंश्लेषः स्वयमासनढौकनम् ॥१२५॥ | ३/१२५ |
| | | आसनाभिग्रहो भक्त्या वन्दना पर्युपासनम् ।<br>तद्यानेऽनुगमश्चेति प्रतिपत्तिरियं गुरोः ॥१२६॥ यो.शा. | ३/१२६ |
| गुरुभक्तिः | = | गुरौ तत्त्वश्रावयितरि भक्तिराराध्यत्वेन प्रतिपत्तिः । द्वा. | २२/२२ |
| गुरुलाघवम् | = | सारासारताविभागम् । पं. | ११/३७ |
| गुरुवर्गः | = | गौरव्यलोकसमुदायरूपः । यो.बिं. | ११० |
| | = | माता पिता कलाचार्य एतेषां ज्ञातयस्तथा ।<br>वृद्धा धर्मोपदेष्टारो गुरुवर्गः सतां मतः ॥२॥ द्वा. | |
| | * | गौरववल्लोकसमुदायः । द्वा. | १२/२ |
| गुरुविनयः | = | औचित्याद् गुरुवृत्तिर्बहुमानस्तत्कृतज्ञताचित्तम् ।<br>आज्ञायोगस्तत्सत्यकरणता चेति गुरुविनयः ॥२॥ षो. | १३/२ |
| गुर्वाज्ञा | = | अभियोगपरिहारप्रधान आप्तादेशः । पं. | १२/४ |
| गुर्वादिपूजनम् | = | योगपूर्वसेवास्वभावम् । यो.बिं. | १४७ |
| गुर्वादिसंमतः | = | पितृपितामहाराजामात्यप्रभृतीनां बहुमतः । द्वा. | ४/२ |
| गोत्रम् | = | गां वाचं त्रायत इति, | |
| | * | गूयते शब्द्यते उच्चावचैः शब्दैः आत्मा यस्मात् तत् । श्रा. | ११ |
| | = | गोत्रं नाम तथाविधैकपुरुषप्रभवो वंशः । यो.शा. | १/४७ |
| ग्रन्थिः | = | जीवेन कर्म निर्जरयता अनतिक्रान्तपूर्वकर्मस्थितिविशेषः । पं. | ३/३० |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| ग्रन्थिभेदः | = | नियमत एवापार्द्धपुद्गलपरावर्त्ताधिकसंसारच्छेदी । षो. | ११/१५ |
| ग्रहः | = | भूतावेशः । यो.बिं. | ६० |
| ग्रहणम् | = | अपूर्वपठनम् । गु. | २/२५२ |
| | = | शास्त्रार्थमात्रोपादानम् । ल.वि. | १४७ |
| ग्राहणाकुशलः | = | क्रियाकलापशिक्षणनिपुणः । पं.व. | ३१ |
| | | **[ घ ]** | |
| घातिकर्म | = | घातयति जीवगुणान्नाशयतीत्येवंशीलं घाति, क्रियते इति कर्म, घाति च तत्कर्म चेति घातिकर्म । अ. | ३०/१ |
| | | **[ च ]** | |
| चङ्क्रमणम् | = | गमनम्, युगमात्रावनिप्रलोकनपुरःसराद्रुतगमनम् । गु. | ३/१३७ |
| चतुर्विंशतिस्तवाध्ययनम् | = | चतुर्विंशतीनां पूरणस्यारादुपकारिणो यत्र स्तवः शेषाणां च तीर्थकृतां तद् । त.उ. | १/२० |
| चतुष्पर्वी | = | अष्टमी-चतुर्दशी-पूर्णिमा-ऽमावस्यालक्षणा । यो.शा. | ३/८५ |
| चरमः | = | अपश्चिमः । यो.बिं. | ९६ |
| चरित्रम् | = | चरति-मोक्षं प्रति याति येन तच्चरित्रम् । पं. | ५/२ |
| चारित्रपरिणामः | = | दुर्ध्याननिषेधसद्ध्यानादराप्रमादप्रधानत्वरूपः । उ.र. | ८३ |
| चारित्रमोहनीयम् | = | चारित्रं विरतिरूपम् तन्मोहयतीति । श्रा. | १५ |
| चारित्रम् | = | अशठभावेन यथाशक्त्याचरणम् । गु. | १/१२४ |
| | = | अष्टप्रवचनमातृपरिपालनरूपम् । गु. | ४/६७ |
| | = | क्रियाकलापः । सा. | ६९ |
| | = | चर्यते निवृत्ताश्रवेनात्मनेति चारित्रम् । गु. | ४/५३ |
| | = | चारित्रं स्थिरतारूपम्...। ज्ञा. | ३/८ |
| | = | प्रेक्षादिव्यापाराभिव्यङ्ग्यश्चारित्रमोहकर्मक्षय-क्षयोपशम-उपशमोपनीतः | १३३ |
| | | परिणामविशेषः, | १४१ |
| | * | शुद्धोपयोगलक्षणं चारित्रम्, | १४१ |
| | * | संयमे प्रयत्न एव चारित्रम्, "माणुसत्तं सुई सद्धा संजमंमि | १४३ |
| | | य वीरियं" इत्यादौ तथोपदेशात्, | १४३ |
| | * | अविरतिरूपाऽस्थैर्यप्रतिपन्थिनमात्मनः: स्थैर्यपरिणाममेव चारित्रम्, | १४९ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| | * यथाशक्त्याचरणरूपम् चारित्रम्, | १६४ |
| | * शक्त्यनिगूहनेन संयमवीर्योल्लास एव हि चारित्रम्, | १६९ |
| | * शक्त्यनिगूहनप्रयुक्तो योगानां स्थिरो भावः चारित्रम् न तु कायिकव्यापारप्रकर्ष एव । अ.म. | १७५ |
| | = मोक्षहेतुः । गु. | १/९८ |
| | = सर्वविरतिरूपं पृथिव्यादिजीवरक्षणात्सप्तदशभेदम् । स.स. | १० |
| | = चरन्त्यनिन्दितमनेनेति चरित्रं क्षयोपशमरूपम्, तस्य भावश्चारित्रम्, | |
| | * इहान्यजन्मोपात्ताष्टविधकर्मसञ्चयापचयाय चरणभावश्चरित्रमिति, सर्वसावद्ययोगविनिवृत्तिरूपा क्रिया इत्यर्थः । ध्या. | ३३ |
| चारित्री | = मग्गणुसारी सद्धो पण्णवणिज्जो कियापरो चेव । गुणरागी सक्कारंभसंगओ तह य चारित्ती ॥१५॥ यो.श. | १५ |
| चित्तम् | = यत् चलमध्यवसानं तच्चित्तम् । ध्या. | २ |
| चित्तस्थैर्यम् | = आनन्दसमाधिबीजम् । यो.श. | ७७ |
| चित्तावस्थानम् | = चित्तस्य मनसः अवस्थानं चित्तावस्थानं अवस्थितिः- अवस्थानम्-निष्प्रकम्पतया वृत्तिरियर्थः । ध्या. | ३ |
| चिन्ता | = अनुप्रेक्षाभावनारहिता मनश्चेष्टा सा । ध्या. | २ |
| चिन्ताज्ञानम् | = आगामिनो वस्तुन एवं निष्पत्तिर्भवत्यन्यथा नेत्याकारम् । त.उ. | १/१३ |
| | = वस्तु-आकांक्षारूपेण महावाक्यार्थेन जनितं, सूक्ष्मबुद्धिगम्यया युक्त्या सप्तभङ्ग्यात्मकेन स्याद्वादेन संगतम्, ज्ञानमम्भसि तैलबिन्दुरिव प्रवर्धमानम् । द्वा. | २/१२ |
| | = महावाक्यार्थजं यत्तु, सूक्ष्मयुक्तिशतान्वितम् । तद् द्वितीयं जले तैल-बिन्दुरीत्या प्रसृत्वरम् ॥६६॥ अ.उ. | १/६६ |
| | = नयप्रमाणसूक्ष्मयुक्तिचिन्तानिर्वृत्तम्, | १०/१२ |
| | * क्षीररसास्वादतुल्यम्, १०/१३ | |
| | * यत्तु महावाक्यार्थजमतिसूक्ष्मसुयुक्तिचिन्तयोपेतम् । उदक इव तैलबिन्दुर्विसर्प्पि चिन्तामयं तत्स्यात् ॥८॥ षो. | ११/८ |
| चेतः | = अन्तःकरणम् । शा.वा. | ५६८ |
| चेष्टाः | = जीवप्रदेशपरिस्पन्दलक्षणाः । यो.बिं. | ४०६ |
| चैत्यवन्दनम् | = भुवनगुरुरयं वन्दनीयः सताम्, एतदेव सत् तत्त्वम्, सैषा गुणज्ञता, महाकल्याणमेतत्, दुःखाचलवज्रम्, | |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | | सुखकल्पपादपः, जीवलोकसारः, दुर्लभानां शेखरः एतच्चैत्यवन्दनम् । यो.श. | ३१ |
| चैत्यानि | = | चित्तसमाधिजनकानि जिनभवनानि । स.स. | ३ |
| | = | चित्तसमाधिजनकानि प्रतिमालक्षणानि अर्हच्चैत्यानि । प्र. | २३ |
| | | **[ छ ]** | |
| छद्मस्थः | = | विशिष्टावध्यादिविकलाः । ध.प. | ८३ |
| | = | छद्म-छादयतीति छद्म पिधानम्, तच्च ज्ञानादीनां गुणानामावारकत्वाज्ज्ञानावरणादिलक्षणं घातिकर्म, छद्मनि स्थिताश्छद्मस्था अकेवलिन इत्यर्थः । ध्या. | ३ |
| छन्दकः | = | पूर्वगृहीताशनादिनिमन्त्रणाकृतः । सा. | ५७ |
| छन्दनासा. | = | प्राग्गृहीतेनाशनादिना मन्त्रणा । सा. | ४ |
| | = | प्राग्गृहीतस्याशनादेः गृह्णीत यूयमित्येवमुचितेभ्यो दानार्थमभ्युत्थानम् । | १२/२ |
| | = | गुरुआणाइ जहरिहं दाणं साहूण पुव्वगहिअस्स । छंदणसामाचारी विसेसविसया मुणेयव्वा ॥५५॥ सा. | ५५ |
| छेदशुद्धिः | = | तत्सम्भवपालनाचेष्टोक्तिः । ध. | ९४ |
| | = | बाह्यानुष्ठानेन द्वयं न बाध्येत यत्र नियमेन । सम्भवति च परिशुद्धं न पुनर्धर्मे स्मृतच्छेदः ॥१५३॥ मार्ग. | १५३ |
| | = | विधिप्रतिषेधयोरबाधकस्य सम्यक्तत्पालनोपायभूतस्यानुष्ठानस्योक्तिः छेदः । अ. | |
| | * | बज्झाणुट्ठाणेणं, जेण न बाहिज्जइ तयं नियमा । संभवइ य परिसुद्धं, सो पुण धम्मम्मि छेओ त्ति ॥ अ. | १/५ |
| | * | छेदशुद्धं शास्त्रं यत्र समितिगुप्त्यादिकमुक्त-विधिप्रतिषेधोपायभूतमनुष्ठानमुपदर्श्यते । अ. | १/५ |
| | = | विशुद्धबाह्यचेष्टारूपः । ध.प. | ८७ |
| | = | एएण न बाहिज्जए संभवइ अ तं दुगं पि निअमेण । एअवयणेण सुद्धो जो सो छेएणं सुद्धो त्ति ॥१०७३॥ पं.व. | १०७३ |
| | = | विधिनां च निषेधानां, योगक्षेमकरी क्रिया । वर्ण्यते यत्र सर्वत्र, तच्छास्त्रं छेदशुद्धिमत् ॥२१॥ अ.उ. | १/२१ |
| छेदप्रायश्चित्तम् | = | तवसा उ दुद्दमस्सा पायं तह चरणमाणिणो चेव । संकेसविसेसाओ छेओ पणगाइओ तत्थ ॥१३॥ विं. | १६/१३ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | | **[ ज ]** | |
| जगद्बान्धवः | = | जगतो-भव्यलोकस्य, हितप्रवर्त्तकऽहितनिवर्त्तकतया बान्धव इव बान्धवः । सा. | १०१ |
| जघन्याराधकः | = | तेऊलेसाए जे, अंसा अह ते उ जे परिणमित्ता । मरइ तओऽवि हु णेओ, जहण्ण माराहओ इत्थ ॥१६९६॥ पं.व. | १६९६ |
| जडाः | = | विशिष्टोहवैकल्येनोक्तमात्रग्राहिणः । पं. | १७/४२ |
| जनप्रियकरम् | = | लोकसंतोषहेतुः । यो.बिं. | १२५ |
| जनप्रियत्वम् | = | शिष्टलोकवल्लभभावः । यो.बिं. | ५२ |
| जन्म | = | प्रादुर्भावलक्षणम् । यो.दृ. | ७९ |
| जरा | = | वयोहानिलक्षणा । श्रा. | ३९७ |
| | = | वयोहान्यात्मिका । यो.दृ. | ७९ |
| जाड्यत्वम् | = | ज्ञानावरणकर्मोदयजनितत्वम् । गु. | १/१२५ |
| जातकल्पः | = | गीतार्थसाधुसम्बन्धित्वाद् गीतार्थो यो विहारः सः । पं. | ११/३० |
| जाताजातकल्पौ | = | गीअत्थ जायकप्पो, अग्गीओ खलु भवे अजाओ उ । पं.व. | १३२९ |
| जात्यः | = | सर्वोपाधिविशुद्धः । यो.बिं. | २४१ |
| जात्यन्धः | = | जन्मप्रभृत्येव नयनव्यापारविकलजनः । उ.र. | ७७ |
| जिज्ञासा | = | अथ कोऽस्यार्थः इति ज्ञातुमिच्छा जिज्ञासा । ल. वि. | ३२ |
| | = | अस्य कथमेतदेवम् इति । यो.दृ. | ४६ |
| | = | किं तत्त्वमिति जिज्ञासा या सर्वत्राग्रहं विना । ब्र.सि. | ५६ |
| | = | योगमार्गं ज्ञातुमिच्छा । यो.बिं. | १०१ |
| जितरागद्वेषः | = | विगतासत्यवादकारणः । पं. | ९/३९ |
| जितेन्द्रियाः | = | निगृहीतहृषीकाः । यो.बिं. | ११८ |
| जिनः | = | दुरन्तरागाद्यन्तरवैरिवारजेता । उ.प. | १ |
| | = | भगवन्तोऽर्हन्तः सर्वथा निवृत्तरागद्वेषमोहमालिन्या मानवविशेषाः । उ.प. | ४३६ |
| | = | मनःपर्यायज्ञानिनः अवधिसम्पन्नाश्चतुर्दशपूर्वधरा नवपूर्वधराश्च । पं.व. | १३१ |
| | = | रागद्वेषकषायेन्द्रियपरीषहोपसर्गघातिकर्म्मजेतृत्वाज्जिनाः । ल.वि. | १९३ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| | = रागादिजेतृत्वात्सर्व एव विशिष्टश्रुतधरादयो जिना उच्यन्ते । तद्यथा–श्रुतजिनाः, अवधिजिनाः, मनःपर्यायज्ञानजिनाः, केवलिजिनाश्च । यो.दृ. | १ |
| | = श्रुतावधिमनःपर्यायकेवलज्ञानवन्तो जिनकल्पिकाश्च । पं. | ४/२८ |
| जिनगुणाः | = रागादिवैरिवारविदारकत्व–समस्तवस्तुस्तोमविषयविज्ञायकत्व–*निखिलनाकिनिकायाभिनम्यत्व*–सद्भूतपदार्थप्रकाशकारिवाग्वादित्व–शिवसुखनायकत्वतद्दानसामर्थ्यादयः । पं. | २/२४ |
| जिनतत्त्वगः | = जिनस्य तत्त्वं–केवलजीवप्रदेशसंघातरूपं केवलज्ञानादिस्वभावं तस्मिन् गच्छतीति तत्तत्वगः । यो.विं. | १९ |
| जिनतत्त्वम् | = केवलजीवप्रदेशसङ्घातरूपम्, * केवलज्ञानादिस्वभावम् । षो. | १४/१ |
| जिनदेशना | = नयशतसमाकुला । अ. | २८/८ |
| जिनपूजाविधिः | = द्रव्यभावशुचित्वम्, कालाभिग्रहः, सन्माल्यादीनि, व्यूहे प्रयत्नः, कण्ट्वाद्यतिसहनम्, तदेकाग्रता, सत्स्तवपाठः, विधिवन्दनम्, कुशलप्रणिधानमिति । यो.श. | ३० |
| जिनभक्तिः | = क्रियाकरणकालीनावश्यकाज्ञाप्रणिधानोपस्थिते तद्दातरि भगवत्यहो ! परमसूक्ष्मो जगज्जन्तुहितावहो भगवता धर्मः प्रतिपादित इत्येवंविधादरलक्षणा । गु. | १/६६ |
| जिनमतम् | = अर्हत्प्रणीतं सकलभावाविर्भावकं द्वादशाङ्गीरूपं शास्त्रम् । स.स. | २५ |
| जिनवचनम् | = जिना रागादिसन्तानविजितास्तेषां वचनम् । त.उ. | १/२० |
| जिनशासनम् | = हेतुयुक्तिदृष्टान्तकृतदुष्टशासनम् । स.स. | १ |
| | = निश्चितसदसन्नित्यानित्याभिलाप्यानभिलाप्याावियुत–सामान्यविशेषमयानन्तधर्म्मात्मकं कुनयविवर्जितं सकलनयमयं प्रत्यक्षपरोक्षप्रमाणोपपन्नम् । स.स. | ३६ |
| जिनाज्ञायुक्तः | = भगवदुक्तविधिपरायणः । सा. | ९८ |
| जिनोपदेशः | = सम्यग्दृशां वस्तुस्वरूपपरिणनम् एव । ध.प. | ५५ |
| जीतकल्पः | = पूर्वपुरुषाचरितलक्षणाचारः । पं. | ९/३७ |
| जीतव्यवहारः | = वत्तणुवत्तपवित्तो, कत्थइ अत्थम्मि जीअकप्पो उ । गु. | २/३२ |
| | = गीतार्थसंविग्नप्रवर्तितशुद्धव्यवहारः । पं. | १६/२६ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| जीवः | = | जीवति जीविष्यति जीवितवान् वा जीव इति तम् । ध्या. | ५५ |
| | = | जीवतीति । श्रा. | ९ |
| जीवन्मुक्तिः | = | जीवित्वे सति सांसारिकानन्दातिशयितानन्दाऽभिव्यक्तेरेवजीवन्मुक्तिपदार्थत्वात् । उ.र. | १९१ |
| जीवरक्षा | = | जीवघाताभावरूपा । ध.प. | ६९ |
| जीवाजीवाः | = | उपयोगवन्तः, अजीवास्तद्विपरीताः । त.उ. | १/४ |
| जुगुप्सा | = | अस्नानादिमलिनतनुसाधुहीलना । गु. | ४/२ |
| | = | आत्मसाक्षिकी निन्दा, यादृशभावेन पापमासेवितं तदधिकभावेन हेयत्वबुद्धिः । गु. | १/६६ |
| | = | चेतनाचेतनेषु वस्तुषु व्यलीककरणम् । श्रा. | १८ |

**[ ज्ञ ]**

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| ज्ञपरिज्ञा | = | अवबोधमात्ररूपा । पञ्च. | ४ |
| ज्ञाताधर्मकथा | = | ज्ञाता दृष्टान्तास्तानुपादाय धर्मो यत्र कथ्यते ताः । त.उ. | १/२० |
| ज्ञानगर्भं वैराग्यम् | = | सूक्ष्मेक्षिका च माध्यस्थ्यं सर्वत्र हितचिंतनम् ।<br>क्रियायामादरो भूयान् धर्मे लोकस्य योजनम् ॥४०॥<br>चेष्टा परस्य वृत्तांते मूकांधबधिरोपमा ।<br>उत्साहः स्वगुणाभ्यासे दुःस्थस्येव धनार्जने ॥४१॥<br>मदनोन्मादवमनं मदसंमर्दमर्दनम् ।<br>असूयातन्तुविच्छेदः समतामृतमज्जनम् ॥४२॥<br>स्वभावान्नैव चलनं चिदानंदमयात्सदा ।<br>वैराग्यस्य तृतीयस्य स्मृतेयं लक्षणावली ॥४३॥ अध्या. | ६/४३ |
| ज्ञानगुणाः | = | वाचना-प्रच्छना-परावर्त्तना-अनुप्रेक्षा-धर्मकथालक्षणाः । उ.प. | ४१७ |
| ज्ञानग्राहकः | = | सुस्सूसासंजुत्तो विन्नेओ गाहमो वि एयस्स ॥ विं. | ७/३ |
| ज्ञानदाता | = | सेवियगुरुकुलवासो विसुद्धवयणोऽणुमन्निओ गुरूणा ।<br>सव्वत्थ णिच्छियमई दाया नाणस्स विन्नेओ ॥२॥ विं. | ७/२ |
| ज्ञानम् | = | आगमपूर्वकम् (बुद्धिः) । यो.द. | १२१ |
| | = | गुरुपरतन्त्रता, 'गुरुपारतंतं नाणं' इति वचनात् । गु. | १/८ |
| | = | ज्ञायतेऽनेन वस्त्विति ज्ञानम् । गु. | ४/६५ |
| | = | ज्ञायतेऽनेनेति व्युत्पत्त्या ज्ञानं-शास्त्रसामान्यम् । सा. | ६९ |
| | = | ज्ञायन्तेऽर्था अनेनेति, | |

| नाम | व्याख्या | गाथा |
|---|---|---|
| | * सम्यक्प्रवृत्तिनिवृत्तिहेतूभूतो बोधः । अ. | ३/६ |
| | = तथाविधोहेन गृहीतार्थतत्त्वपरिच्छेदनम् । द्वा. | २३/२३ |
| | = निखिलपारलौकिकाद्यनुष्ठानप्रकाशनप्रदीपकल्पम् । अ. | ५/२ |
| | = यथास्थितपदार्थपरिच्छेदनम् । द्वा. | २७/२३ |
| | = विरतिफलम् । ध.प. | १०० |
| | = शास्त्राभ्यासजन्यो बोधः । ध.प. | १७ |
| | = शास्त्रावबोधः । यो.शा. | ३/१६ |
| | = सदसद्विवेकः । ध.प. | ६ |
| | = स्वभावलाभसंस्कारकारणं ज्ञानमिष्यते ।<br>ध्यान्ध्यमात्रमतस्त्वन्यत् तथा चोक्तं महात्मना ॥३॥ ज्ञा. | ५/३ |
| | = हेयोपादेयवस्तुविनिश्चयः । यो.शा. | १/५४ |
| ज्ञानयोगः | = ज्ञानयोगस्तपः शुद्धमात्मरत्येकलक्षणम् ।<br>इन्द्रियार्थोन्मनीभावात्स मोक्षसुखसाधकः ॥५॥ अध्या. | १५/५ |
| | = योगजाऽदृष्टजनितः, स तु प्रातिभसंज्ञितः ।<br>सन्ध्येव दिनरात्रिभ्यां, केवलश्रुतयोः पृथक् ॥२॥ अ.उ. | २/२ |
| ज्ञानयोगी | = निर्भयः स्थिरनासाग्रदत्तदृष्टिर्व्रते स्थितः ।<br>सुखासनः प्रसन्नास्यो दिशश्चानवलोकयन् ॥८०॥<br>देहमध्यशिरोग्रीवमवक्रं धारयन्बुधः ।<br>दन्तैरसंस्पृशन् दन्तान् सुश्लिष्टाधरपल्लवः ॥८१॥ अध्या. | १५/८१ |
| ज्ञानलोचनम् | = युक्तायुक्तविवेचननिपुणसंवेदननयनम् । यो.बिं. | ८५ |
| ज्ञानवृद्धः | = श्रुतस्थविरः,<br>* सम्यगुपासितः,<br>* ज्ञानेन बोधेन वृद्धा महान्तो ज्ञानं येषां ते ज्ञानवृद्धाः । अ. | २४/६ |
| ज्ञानिनः | = सुप्रसन्नगुरुवितीर्णश्रुतज्ञानाः । पं. | १७/५२ |
| | = यो निरनुबन्धदोषाच्छ्राद्धोऽनाभोगवान् वृजिनभीरूः ।<br>गुरुभक्तो ग्रहरहितः सोऽपि ज्ञान्येव तत्फलतः ॥३॥ षो. | १२/३ |
| ज्ञेयम् | = स्वर्गनरकादिकम्, उभयस्वभावविकलत्वात् । ध.प. | ५५ |
| ज्येष्ठः | = स्वापेक्षयोत्कर्षशाली । सा. | ८४ |

આ.વિ.રામચંદ્રસૂરિ જ્ઞાન ભંડાર
સં.પૂ.આ.વિ. કીર્તિયશ સૂરિ મ.સા.
આરાધના ભવન, પાછીયાની પોળ
અમદાવાદ-૩૮૦ ૦૦૧.

**[ त ]**

| नाम | व्याख्या | गाथा |
|---|---|---|
| तत्त्वचिन्तनम् | = जीवादिपदार्थसार्थपर्यालोचनम् । यो.बिं. | ३५८ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| | = परमार्थभावनारूपम् । यो.बिं. | ३८० |
| तत्त्वज्ञानम् | = ऊहापोहविज्ञानशुद्धम् 'इदमित्थमेव' इति निश्चयः । यो.शा. | १/५१ |
| तत्त्वतः | = ऐदम्पर्यालोचनम् । यो.बिं. | १ |
| तत्त्वदृशः | = आगमप्रामाण्याभ्युपगन्तारः । षो. | ५/६ |
| तत्त्वपरिज्ञानम् | = आत्मादिवस्तुनः परिणामित्वादिस्वरूपावबोधः । अ. | १०/८ |
| तत्त्वम् | = असाधारणधर्मः, तद्व्याख्यानमितरभेदगमकतयोपयुज्यते । | ४/४६ |
| | = जीवादिनवपदार्थस्वरूपनिरूपकः सर्वनयसंनिवेशः श्रीमदर्हद्धर्म्मः । स.स. | २९ |
| तत्त्वविद् | = धर्माद्यतीन्द्रियार्थदर्शी । द्वा. | २३/१३ |
| तत्त्वसंवेदनं ज्ञानम् | = तत्त्वः परमार्थस्तत्सम्यक्प्रवृत्त्याद्युपहितत्वेन वेद्यते यस्मिस्तत् । द्वा. | ६/२ |
| | = स्वस्थवृत्तेः प्रशान्तस्य, तद्धेयत्वादिनिश्चयम् । तत्त्वसंवेदनं सम्यग्-यथाशक्ति फलप्रदम् ॥६॥ अ. | ९/६ |
| तत्त्वसंवेदनानुगम् | = जीवादितत्त्वसम्यक्परिज्ञानानुगतम् । द्वा. | १४/२३ |
| | = जीवादितत्त्वसम्यक्परिज्ञानानुगतम् । यो.बिं. | २१४ |
| तत्त्वसंसिद्धिः | = आत्मादृष्टादिप्रतितिः । यो.बिं. | ६४ |
| तत्त्वाधिगमः | = तत्त्वातत्त्वपरिच्छेदः । श्रा. | ३ |
| तत्त्वाभिनिवेशः | = वस्तुस्वरूपनिर्णयातिशयः । पं. | ९/४० |
| | = विज्ञानोहापोहनुगमविशुद्धम् इदमित्थमेवेतिनिश्चयंः । ल.वि. | १४७ |
| | = सम्यक्त्वाध्यवसायः, श्रद्धाभावात् । श्रा. | ९० |
| | = निश्चितप्रामाण्यकं तत्त्वज्ञानम् । षो. | ११/४ |
| तत्त्वार्थज्ञानम् | = आगमशुद्धोत्सर्गापवादादिप्रवृत्तिपरीक्षाक्षमसूक्ष्मप्रेक्षा । उ.र. | ९७ |
| तथाकारसा. | = तथाशब्दोऽवैतथ्यार्थे, गुरूदितेऽर्थे तथाकरणं तथाकारः । सा. | ४ |
| | = सच्चत्तपच्चयट्ठं जं अट्ठे किर गुरूवइट्ठम्मि । रुइपुव्वं अभिहाणं लक्खिज्जइ सो तहक्कारो ॥३०॥ सा. | ३० |
| तथाभव्यत्वम् | = तहभव्वत्तं चित्तं अकम्मजं आयतत्तमिह णेयं । फलभेया तह कालाइयाणमक्खेवगसहावं ॥९९९॥ उ.प. | ९९९ |
| | = भव्यत्वं नाम सिद्धिगमनयोग्यत्वमनादिपारिणामिको भावः, तथाभव्यत्वं चैतदेव कालनैयत्यादिना प्रकारेण वैचित्र्यमापन्नम् । यो.बिं. | २७४ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| तद्धेतु-अनुष्ठानम् | = | अनुष्ठानहेतुः । यो.बिं. | १५५ |
| | = | सदनुष्ठानरागतः अनुष्ठानं तद्धेतुरुच्यते । द्वा. | १३/१३ |
| | = | सदनुष्ठानरागेण तद्धेतुर्मार्गगामिनाम् । अध्या. | १०/१७ |
| तद्धेत्वमृतानुष्ठाने | = | सकामनिर्जराङ्गे । ध.प. | ३७ |
| तपः | = | इह परलोगादणविक्खं जमणसणाइ चित्तणुट्ठाणं ।<br>तं सुद्धनिज्जराफलमित्थ तवो होई नायव्वो ॥९॥ विं. | ११/९ |
| | = | ज्ञानमेव बुधाः प्राहुः कर्मणां तापनात्तपः ॥१॥ | |
| | * | यत्र ब्रह्म जिनार्चा च, कषायाणां तथा हतिः ।<br>सानुबन्धा जिनाज्ञा च, तत्तपः शुद्धमिष्यते ॥६॥ | |
| | * | तदेव हि तपः कार्यं दुर्ध्यानं यत्र नो भवेत् ।<br>येन योगा न हीयन्ते क्षीयन्ते नेन्द्रियाणि च ॥७॥ ज्ञा. | ३१/७ |
| | = | तत्तपो द्वादशविधं शुद्धज्ञानसमन्वितम् ।<br>आत्मशक्तिसमुत्थानं चित्तवृत्तिनिरोधकृत् ॥१५५॥<br>यत्र रोधः कषायाणां ब्रह्मध्यानं जिनस्य च ।<br>ज्ञातव्यं तत्तपः शुद्धमवशिष्टं तु लंघनम् ॥१५६॥ अध्या. | १८/१५६ |
| | = | तापयति-कर्म दहयतीति तपो-निर्विकृतिकादि । पं. | १६/२ |
| | = | पुराणकर्मकचवरशोधकः । अ. | ३०/२ |
| | = | यथाशक्त्यनशनाद्यसेवनम् । द्वा. | २७/२३ |
| | = | रसरुधिरमांसमेदोऽस्थिमज्जशुक्राण्यनेन तप्यन्ते<br>कर्माणि वाऽशुभानी-त्यतस्तपो नाम नैरुक्तम् ॥ अ. | ३/६ |
| तपःप्रायश्चित्तम् | = | पुढवाईणं संघट्टणाइभावेण तह पमायाओ ।<br>अइयारासोहणट्ठा पणगाइतवो तवो होइ ॥१२॥ विं. | १६/१२ |
| तपस्वी | = | जिणमयमुब्भासंतो विगिट्ठखमणेहि भण्णइ तवस्सी । स.स. | ३५ |
| | = | विकृष्टोग्रतपोयुक्तस्तपस्वी । त.भा. | ९/२४ |
| | = | सदैवोचितप्रवृत्तिकतया योग्यः । अ. | १२/२ |
| तरमाणाः | = | शक्नुवानाः - शक्तितुलनां कुर्वाणा, इतरेऽतरमाणाः । गु. | २/३३० |
| तात्त्विकः | = | निर्वाणैकाभिलाषितया सद्भूत एव यः । यो.बिं. | ३३ |
| | = | परमार्थभवः । यो.बिं. | ३२ |
| तात्त्विकसामायिकम् | = | उचितप्रवृत्तिप्रधानं विध्याराधनयाऽगर्हणीयभंगविरोधि-<br>प्रयत्नमुख्यव्यापारम् । उ.र. | १२० |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| तात्त्विकी | = | वास्तवरूपा । यो.बिं. | १८४ |
| तापशुद्धिः | = | उभयनिबन्धनभाववादः । ध. | ९५ |
| | = | जीवादितत्त्वानां वादः स्याद्वादरीत्योपन्यासः । ध.प. | ८७ |
| | = | जीवादिभाववादो बन्धादिसाधकश्च तापोऽत्र ।<br>एतैः खलु परिशुद्धो धर्मो धर्मत्वमुपयाति ॥१५४॥ मार्ग. | १५४ |
| | = | भाववादप्रधानं शास्त्रं तापशुद्धम् । अ. | १/५ |
| | = | जीवाइभाववाओ, जो दिट्ठाहिं णो खलु विरुद्धो ।<br>बंधाइसाहगो तह, एत्थ इमो होइ तावोत्ति ॥१०८०॥ पं.व. | १०८० |
| | = | यत्र सर्वनयाऽऽलम्बि-विचारप्रबलाग्निना ।<br>तात्पर्यश्यामिका न स्यात्, तच्छास्त्रं तापशुद्धिमत् ॥२९॥ | १/२९ |
| | * | तेनाऽनेकान्तसूत्रं यद्, यद्वा सूत्रं नयात्मकम् ।<br>तदेव तापशुद्धं स्याद्, न तु दुर्नयसंज्ञितम् ॥५३॥ अ.उ. | १/५३ |
| ताराद्दष्टिः | = | तारायां तु मनाक्स्पष्टं, नियमश्च तथाविधः ।<br>अनुद्वेगो हितारम्भे, जिज्ञासा तत्त्वगोचरा ॥४१॥ यो.द्द. | ४१ |
| तितिक्षा | = | क्षुदादिपरीषहोपनिपातेऽपि सहिष्णुता । द्वा. | २७/२४ |
| तीर्थः | = | चातुर्वर्णः श्रमणसंघः प्रथमगणधरो वा । श्रा. | ७६ |
| | = | सूत्रविहितयथोचितक्रियाविशिष्टसाधुसाध्वीश्रावक-<br>श्राविकासमुदायः । यो.विं. | १४ |
| | = | अधिकृतश्रुतार्थोभयविद् अभ्यस्तभावनामार्ग आचार्यः ।<br>यो.श. | ५२ |
| | = | जस्स जहिं गुणलाभो खेत्ते कम्मोदयाइहेऊओ ।<br>तस्स तयं किल तित्थं तहासहावत्तओ केई ॥२१२॥ | २१२ |
| | * | व्यसनसलिलतरणहेतुः । उ.प. | २१२ |
| | = | तरन्त्यनेन भवसमुद्रमिति तीर्थं प्रवचनम् । त.उ. का. | १/९ |
| | = | तीर्यते संसारसागरोऽनेनेति प्रवचनाधारश्चतुर्विधः सङ्घः,<br>प्रथमगणधरो वा । स.स. | १ |
| | = | तीर्यतेऽनेन संसारसागर इति तीर्थं प्रवचनम्,<br>तदाधारत्वाच्च चतुर्विधः श्रमणसङ्घोऽपि तीर्थमुच्यते । गु. | ४/६९ |
| | = | नद्यादेरिव संसारस्य तरणे सुखावतारो मार्गः ।<br>तच्च द्वेधा-द्रव्यतीर्थं भावतीर्थं च । द्रव्यतीर्थं | |

| नाम | व्याख्या | गाथा |
|---|---|---|
| | तीर्थकृतां जन्म-दीक्षा-ज्ञान-निर्वाणस्थानम् । भावतीर्थं तु चतुर्वर्णः श्रमणसङ्घः प्रथमगणधरो वा । यो.शा. | २/१६ |
| | = येनेह जीवा जन्मजरामरणसलिलं मिथ्यादर्शना-विरतिगम्भीरं महाभीषणकषायपातालं सुदुर्लङ्घ्य-मोहावर्त्तरौद्रं विचित्रदुःखौघदुष्टश्वापदं रागद्वेषपवन-विक्षोभितं संयोगवियोगविचीयुक्तं प्रबलमनोरथ-वेलाकुलं सुदीर्घं संसारसागरं तरन्ति तत्तीर्थमिति । एतच्च यथावस्थितसकलजीवादिपदार्थप्ररूपकं अत्यन्तानवद्यान्याविज्ञातचरणकरणक्रियाऽऽधारं त्रैलोक्यगतशुद्धधर्मसम्पद्युक्तमहासत्त्वाश्रयं अचिन्त्यशक्तिसमन्विताविसंवादिपरमबोहित्थ-कल्पं प्रवचनं सङ्घो वा । ल.वि. | ६९ |
| | = सम्पूर्ण चतुर्विधश्रमणसङ्घः । गु. | १/२०६ |
| तीर्थकरः | = अनेकसत्त्वहितः, निरुपमसुखसंजननः, अपूर्वचिन्तामणिकल्पः । कू. | १३ |
| | = प्रकृष्टपुण्यानुबन्धिपुण्यफलभूतः । अ. | २५/२ |
| तीर्थसिद्धः | = तित्थाइसिद्धभेया संघे सइ हुंति तित्थसिद्ध त्ति । विं. | १९/२ |
| तीव्रभावः | = गाढसंक्लिष्टपरिणामः । उ.र. | २२ |
| तीव्रश्रद्धा | = आत्यन्तिकया सदनुष्ठानकरणरुचिः । पं. | ४/३२ |
| तुच्छः | = असमर्थः - बालवृद्धादिलक्षणः । उ.प. | ८७४ |
| | = असारः अभिलषितफलासाधकत्वात् । यो.विं. | १ |
| त्यागः | = बाह्याभ्यन्तरोपधिशरीरान्नपानाद्याश्रयो भावदोषपरित्यागस्त्यागः । त.भा. | ९/६ |
| त्यागी | = अविवेकपरित्यागात् त्यागी.... ॥४४॥ मार्ग. | ४४ |
| | = अविवेगपरिच्चाया चाई जं निच्छयनयस्स ॥९४॥ पं.व. | ९४ |

**[ त्र ]**

| | | |
|---|---|---|
| त्रिकोटिपरिशुद्धम् | = तिसृभिः कोटिभिः परिशुद्धम्, | |
| | * रागद्वेषमोहलक्षणाभिः, | |
| | * कृतकारितानुमतभेदभिन्नहननपचनक्रयणरूपाभिः, | |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | * | शास्त्रस्वर्णशोधनकारिणीभिः कषच्छेदतापलक्षणाभिः परिशुद्धम् । षो. | २/७ |
| त्रैलोक्यगुरवः | = | त्रैलोक्यवासिसत्त्वेभ्यो गृह्णन्ति शास्त्रार्थमिति । पञ्च. | १ |
| | | **[ द ]** | |
| दया | = | ज्ञानसाध्या । द्वा. | ७/२७ |
| दयालवः | = | प्रकृत्या क्लिष्टपापाभावेन । यो.दृ. | २११ |
| दयालुत्वम् | = | निरुपधिपरदुःखप्रहाणेच्छा । द्वा. | १२/१३ |
| दर्पिकप्रतिसेवा | = | रागद्वेषाभ्यां सहिता या सा । उ.र. | १३१ |
| दर्शनगुणाः | = | सम्यक्त्वहेतवो जिनयात्रादिमहामहरूपाः । उ.प. | ४१७ |
| दर्शनप्रतिमा | = | सुस्सूस धम्मराओ गुरुदेवाणं जहासमाहीए ।<br>वेयावच्चे नियमो दंसणपडिमा भवे एसा ॥४॥ विं. | १०/४ |
| दर्शनमोहनीयम् | = | दर्शनं सम्यग्दर्शनम्, तन्मोहयतीति । श्रा. | १५ |
| दर्शनम् | = | दृश्यतेऽनेनेति दर्शनं-दर्शनप्रभावकं सम्मत्यादिः । सा. | ६९ |
| दशवैकालिकम् | = | दश विकाले पुत्रहिताय स्थापितान्यध्ययानि । त.उ. | १/२० |
| दशाश्रुतस्कंधः | = | पूर्वेभ्य आनीय सङ्घसन्ततिहिताय स्थापितान्यध्ययानि दशा उच्यन्ते, | |
| | * | दशा इति व्यवस्थावचनः शब्दः काचित्प्रतिविशिष्टावस्था यतीनां यासु वर्ण्यते ता दशा इति । त.उ. | १/२० |
| दातृविशेषः | = | प्रतिग्रहीतर्यनसूया, त्यागेऽविषादः, अपरिभाविता, दित्सतो ददतो दत्तवतश्च प्रीतियोगः, कुशलाभिसन्धिता, दृष्टफलानपेक्षिता, निरुपधत्वम्, अनिदानत्वमिति । त.भा. | ७/३४ |
| दानम् | = | अन्नपानवस्त्रादिवितरणम् । षो. | ६/६ |
| | = | पात्रेषु द्रव्यविश्राणनम् । यो.शा. | २/३१ |
| | = | प्रासुकैषणीयवस्त्रपात्रान्नपानादीनां सङ्घादिभ्यो वितरणम् । पं. | २/३६ |
| | = | स्वद्रव्यस्यानुजिघृक्षया हि परार्पणम् दानम् । अ.म. | ५१ |
| दास्यम् | = | अङ्कपातादिना परायत्तशरीरता । यो.शा. | २/६५ |
| दिदृक्षा | = | अविद्यामलभवाधिकारः । यो.दृ. | २०० |
| दीक्षा | = | दिक्खा मुंडणमेत्थं तं पुण चित्तस्स होइ विण्णेयं । पं. | २/२ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| दीक्षा (सामान्यबीजा.) | = द्रव्यसम्यक्त्वादिक्रमेणासद्ग्रहपरित्यागधार्मिकजनानुराग-विहितानुष्ठानाहितक्षयोपशमज्ञानावरणविगमबोधिवृद्ध्यादि-गुणप्राप्तिपूर्वं परमदीक्षाप्राप्तिहेतुरूपा । गु. | १/१४८ |
| दीक्षा | = दीक्षा हि श्रेयसो दानादशिवक्षपणात्तथा । सा ज्ञानिनो नियोगेन ज्ञानिनिश्रावतोऽथवा ॥१॥ द्वा. | २८/१ |
| | = श्रेयोदानाद्-अशिवक्षपणाच्च सतां दीक्षा मता । षो. | १२/२ |
| | = सर्वसत्त्वाभयप्रदानेन भावसत्रम् । पं.व. | ९ |
| दीक्षादातागुरुः | = प्रव्रज्यार्हगुणविधिप्रव्रजितो गुरुकुलाश्रितो नित्यम् । अक्षतशीलः शान्तः तत्त्वज्ञोऽवगतसूत्रार्थः ॥१८॥ | १८ |
| | प्रवचनवात्सल्ययुतः सत्त्वहितरतोऽनुवर्त्तको धीरः । गुर्वनुमतपदनिष्ठो धर्मकथाकृज्जनादेयः ॥१९॥ | १९ |
| | अविषादी परलोके स्थिरहस्तोपकरणोपशमलब्धिः । कलिदोषान्मूलगुणैरेकादिगुणोज्झितोऽपि गुरुः ॥२०॥ मार्ग. | २० |
| दीक्षायोग्यः | = उत्पन्नमार्यदेशे जातिकुलविशुद्धमल्पकर्मणाम् । कृषतरकषायहासं कृतज्ञमविरूद्धकार्यकरम् ॥२२॥ | २२ |
| | मरणनिमित्तं जन्म श्रीश्चपला दुर्लभं च मनुजत्वम् । न परनिमित्तं निजसुखमिति चिन्तोत्पन्नवैराग्यम् ॥२३॥ | २३ |
| | कालपरिहाणिदोषान्निर्दिष्टैकादिगुणविहीनमपि । बहुगुणयुतमाचार्या दीक्षायोग्यं जनं ब्रुवते ॥२४॥ मार्ग. | २४ |
| दीक्षांरागः | = श्रद्धा-विघ्नाभाव-चित्तदार्ढ्यरूपम् । पं. | २/७ |
| दीक्षितः | = परार्थोद्यतः । अ. | २८/४ |
| दीक्षोचितः | = शेषगुणवैकल्येऽपि संसारविरक्त एवात्राधिकारी । षो. | १२/५ |
| दीनः | = क्षीणविभवत्वाद्दैन्यं प्राप्ताः । पं. | ९/६ |
| | = सदैवाकल्याणदर्शी । यो.दृ. | ७६ |
| | = सदैवादृष्टकल्याणः । द्वा. | १०/५ |
| | = सदैवादृष्टकल्याणः । यो.बिं. | ८७ |
| | = अल्पसत्त्वः । पं.व. | २१८ |
| | = क्षीणसकलपुरुषार्थशक्तयः । यो.बिं. | १२३ |
| दीप्रादृष्टिः | = प्राणायामवती दीप्रा, न योगोत्थानवत्यलम् । तत्त्वश्रवणसंयुक्ता, सूक्ष्मबोधविवर्जिता ॥५७॥ यो.दृ. | ५७ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| दीर्घदर्शी | = | दीर्घकालभावित्वाद्दीर्घमर्थमनर्थं च पश्यति पर्यालोचयतीत्येवंशीलो दीर्घदर्शी । यो.शा. | १/५५ |
| दीर्घालोचनसङ्गता | = | कार्यपरिणामालोचनवती । यो.बिं. | २४६ |
| दुःखगर्भितवैराग्यम् | = | तत्राद्यं विषयाप्राप्तेः संसारोद्वेगलक्षणम् । अध्या. | ६/१ |
| दुःखम् | = | पापलक्षणम् । शा.वा. | २ |
| | = | शारीरमानसबाधारूपाणि । यो.बिं. | ३८ |
| दुष्कृतगर्हा | = | अनादावपि संसारेऽनाभोगादिना प्रकारेण कायादिभिः करणभूतैः यानि दुष्कृतानि अर्हत्सिद्धादिसमक्षं संवेगापन्नेन चेतसा तेषां जुगुप्सा । यो.श. | ५० |
| दुष्टाः | = | मोहदोषोपेताः । गु. | १/६ |
| दृढप्रयत्नः | = | प्राक्तनयत्नातिशायी आशातनादिपरिहारप्रयत्नः । सा. | ४२ |
| दृढाज्ञानम् | = | अबाध्यमिथ्याज्ञानम् । द्वा. | १२/२२ |
| दृढानुरागः | = | निष्ठुरप्रतिबन्धरूपः । यो.बिं. | ३४२ |
| दृष्टः | = | प्रत्यक्षानुमानप्रमाणोपलब्धः । उ.प. | ८८२ |
| | = | स्वसंवेदनादिसिद्धः । यो.बिं. | २५ |
| दृष्टिः | = | सच्छ्रद्धासङ्गतो बोधो दृष्टिरित्यभिधीयते । यो.दृ. | १७ |
| | = | सच्छ्रद्धासंगतो बोधः । द्वा. | २०/२५ |
| दृष्टिरागः | = | योऽयं दर्शनिनां निजनिजदर्शनेषु युक्तिपथावतारासहेष्वपि कम्बललाक्षारागवत् प्रायेणोत्तारयितुमशक्यः पूर्वरागद्वयापेक्षयातिदृढस्वभावः प्रतिबन्धो विजृम्भते स इति । उ.प. | १८९ |
| दृष्टिवादः | = | दृष्टीनामज्ञानिकादीनां यत्र प्ररूपणा कृता सः, | |
| | * | तासां वा पातो यत्र दृष्टिपातः । त.उ. | १/२० |
| दृष्ट्यनुरागः | = | कुप्रवचनाभिनिवेशः । अ.म. | २१ |
| देवः | = | केवलज्ञानावलोकितलोकालोकः विघटितरागद्वेषमोहः । स.स. | २९ |
| | = | सर्वज्ञो जितरागादिदोषस्त्रैलोक्यपूजितः । यथास्थितार्थवादी च देवोऽर्हन् परमेश्वरः ॥४॥ यो.शा. | २/४ |
| | = | दीव्यन्तीति देवाः - भवनवास्यादयः । ध्या. | ९ |
| देवतास्तवः | = | ऋषभादिदेवतास्तवरूपः प्रणवनमःशब्दादिस्वाहापर्यन्तः । यो.बिं. | ३८२ |

| नाम | व्याख्या | गाथा |
| --- | --- | --- |
| देवदुर्गतयः | = कंदप्पदेवकिव्विस अभिओगा आसुरी य संमोहा ।<br>ता देवदुग्गईओ मरणंमि विराहिआ हुंति ॥<br>(आतुरप्रत्याख्यानम्) ध.प. | २२ |
| देवस्य परीभोगः | = जिनबिम्बनिर्मापणार्थं कल्पितत्वेन जिनदेवद्रव्यस्य परीभोगः-<br>भक्षणं देवस्य परीभोगः । पं. | ८/९ |
| देवोद्देशः | = जिनभवनभक्त्यभिसन्धिमात्रः । षो. | ६/१२ |
| देशना | = स्वतन्त्रधर्मकथारूपा । यो.बिं. | ४२५ |
| देशविरतिपरिणामः | = जिनपूजासत्कारयोः करणलालसः खल्वाद्यो देशविरति-<br>परिणामः । ल.वि. | २६७ |
| देशविराधकः | = ज्ञानदर्शनसंपन्नः क्रियाहीनश्च । ध.प. | १८ |
| देशाराधकः | = मार्गानुसारीक्रियावान् ज्ञानदर्शनहीनश्च । ध.प. | १८ |
| दैवम् | = पुव्वकयं कम्मं चिय चित्तिविवागमिह भन्नई दिव्वो । विं. | ५/१४ |
| दोषः | = कर्मबन्धलक्षणः । द्वा. | ७/९ |
| | = दूषणम्, | |
| | * अनर्थाव्याप्तिः । अ. | १८/४ |
| | = प्रमाणाभावलक्षणः । पञ्च. | ५ |
| | = रागद्वेषमोहा हि दोषास्तथा तथाऽऽत्मदूषणादिति । ध. | ४८९ |
| दोषविगमः | = कषायादिनिरोधरूपः । यो.बिं. | २१७ |
| दोषव्यपोहः | = कथंचिदापन्नदोषशुद्ध्यर्थप्रायश्चित्तलक्षणः । द्वा. | ९/५ |
| दौर्भाग्यम् | = उद्वेजनीयता, अनादेयता । | २/१०३ |
| द्रव्यम् | = द्रवति-गच्छति तांस्तान् पर्यायान् इति । अ. | २/१ |
| द्रव्यज्ञानम् | = अनुपयुक्ततावस्था । त.उ. | १/५ |
| द्रव्यतः | = भावस्य योग्यतामाश्रित्य,<br>* अनुपयोगो द्रव्यम्,<br>* विवक्षितोपयोगशून्यतामाश्रित्य,<br>* आहारवस्त्रादिद्रव्याण्याश्रित्य । अ. | ८/१ |
| द्रव्यतीर्थम् | = जिनजन्मादिभूमयः,<br>* उक्तं च-जम्मं दिक्खा नाणं, तित्थयराणं महाणुभावाणं ।<br>जत्थ य किर निव्वाणं आगाढं दंसणं होइ ॥ स.स. | ४० |
| द्रव्यनिर्जरा | = मोक्षाधिकारशून्या व्रीह्यादीनाम् । त.उ. | १/५ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| द्रव्यप्रत्याख्यानम् | = | अपेक्षादिकृतं प्रत्याख्यानम् । अ. | ८/१ |
| | = | उदग्रवीर्यविरहात्, क्लिष्टकर्मोदयेन यत् ।<br>बाध्यते तदपि द्रव्य-प्रत्याख्यानं प्रकीर्तितम् ॥६॥ अ. | ८/६ |
| द्रव्यबन्धः | = | निगडादिः । त.उ. | १/५ |
| द्रव्य-भावचारित्रम् | = | अभव्यस्य भव्यस्य वानुपयुक्तस्य क्रियानुष्ठानम्,<br>आगमपूर्वकं भावचारित्रम् । त.उ. | १/५ |
| द्रव्य-भावसम्यक्त्वौ | = | जिणवयणमेव तत्तं, एत्थ रुई होइ दव्वसम्मत्तं ।<br>जहभावा णाणसद्धा, परिसुद्धं तस्स सम्मत्तं ॥१०६३॥<br>पं.व. | १०६३ |
| | = | ये मिथ्यादर्शनपुद्गला भवस्य सम्यग्दर्शनतया शुद्धिं<br>प्रतिपत्स्यन्ते, त एव विशुद्धा आत्मपरिणामापन्ना<br>भावसम्यग्दर्शनम् । त.उ. | १/५ |
| द्रव्यमनः | = | विशिष्टाकारपरिणताः पुद्गलाः । यो.शा. | ४/३५ |
| द्रव्यमोक्षः | = | निगडादिविप्रयोगः । त.उ. | १/५ |
| द्रव्यम् | = | गुण-पर्यायवत् द्रव्यम् । ध्या. | ३१ |
| | = | मनोरुचिविकलत्वलक्षणेनाप्रधानभावः । उ.र. | ६१ |
| द्रव्यलिङ्गक्रियाः | = | पूजाद्यभिलाषेणव्यावृत्तमिथ्यात्वादिमोहमलतया द्रव्यलिङ्गप्रधानाः<br>शुद्धश्रमणभावयोग्याः प्रत्युपेक्षणाप्रमार्जनादिकाश्चेष्टाः । उ.प. | २३३ |
| द्रव्यलिङ्गधराः | = | भावशून्यत्वेनाप्रधानसाधुनेपथ्यधारिणः । पं. | १४/४६ |
| द्रव्यसंवरः | = | अपिधानम् । त.उ. | १/५ |
| | = | यः कर्मपुद्गलादानच्छेदः स द्रव्यसंवरः । यो.शा. | ४/८० |
| द्रव्यसम्यक्त्वम् | = | लोकोत्तरबीजपरिग्रहवशतो मिथ्यादृष्टिसंस्तवपरित्यागपूर्वकसंघ-<br>चैत्यादिभक्तिकृत्यपरायणस्यापुनर्बन्धकस्य भवति । प्र. | १५ |
| द्रव्याक्षरम् | = | पुस्तकादिन्यस्ताकारादिरूपम्, | १/२० |
| | * | ताल्वादिकारणजन्यः शब्दो वा, | १/२० |
| | * | एतच्च व्यज्यतेऽर्थोऽनेनेति व्यञ्जनाक्षरमप्युच्यते । त.उ. | १/२० |
| द्रव्याजीवः | = | गुणादिवियुतो बुद्धिस्थापितः । त.उ. | १/५ |
| द्रव्याज्ञा | = | लिंगाइं होंति तीसे ण तदत्थालोअणं न गुणरागो ।<br>नापत्तपुव्वहरिसो विहिभंगे णो भवभयं च ॥१९॥ उ.र. | १९ |
| | = | स्वस्वोचितबाह्यानुष्ठानरूपा । उ.र. | २६ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| द्रव्यास्त्रवः | = आत्मसमवेताः पुद्गला अनुदिता रागादिपरिणामेन । त.उ. | १/५ |
| द्रव्येन्द्रियाणि | = स्पर्शेन्द्रियाद्याकारपरिणतानि पुद्गलद्रव्याणि । यो.शा. | ४/३४ |
| द्वन्द्वसहिष्णुता | = निरुपक्रमक्लिष्टकर्मोदयापतितानामिष्टवियोगानिष्टसम्प्रयोगादीनां व्यसनानां सम्यक् सहनभावः । यो.बिं. | ५३ |
| द्वादशाङ्गम् | = विधिनिषेधविधया स्वसमयपरसमयप्रज्ञापनाविधया वा शुभाशुभसर्वप्रवादमूलत्वम् । ध.प. | २४ |
| द्विजाः | = लब्धदीक्षानामकद्वितीयजन्मानः मुनयः । यो.बिं. | ४४ |
| द्वेषः | = अप्रीतिलक्षणः । यो.श. | ५३ |
| | = अप्रीतिलक्षणः । श्रा. | ३९३ |
| | = ईर्ष्या रोषो दोषो द्वेषः परिवादमत्सरासूयाः । वैरप्रचण्डनाद्यनेके द्वेषस्य पर्यायाः ॥१९॥ | १९ |
| | * क्रोधो मानश्च पुनर्द्वेष इति समासनिर्दिष्टः ॥३२॥ प्रश. | ३२ |
| | = उपशमत्यागात्मको विकारः । गु. | ४/२ |
| | = उपश्रा । ध.प. | ३ |
| | = तत्रैवाग्निज्वालाकल्पमात्सर्यापादनाद् द्वेष इति । ध. | ४९१ |
| | = दुःखांगानां दुःखकारणानां निन्दनं दुःखाभिज्ञस्य तदनुस्मृतिपूर्वकं विगर्हणं द्वेषः । द्वा. | २५/१९ |
| | = द्विष्यतेऽनेनेति, द्वेषवेदनीयं कर्म-आत्मनः क्वचिदप्रीतिपरिणामापादनात्, | |
| | * द्वेषणं द्वेषः, | |
| | * द्वेषवेदनीयकर्मापादितो भावोऽप्रीतिपरिणाम एव । पञ्च. | १ |
| | **[ ध ]** | |
| धन्धणम् | = ध्यान्धीकरणम् । गु. | २/११५ |
| धन्यः | = धर्मधनलब्धा । यो.बिं. | १४० |
| | = सौभाग्यादेयतादिना धनार्हः । यो.बिं. | १८७ |
| | = धर्मधनलब्धारः । ध.प. | १७ |
| | = भावधनलब्धारः । पं. | २/३४ |
| धर्मः | = कर्मानुपादाननिर्जरणलक्षणः । अ. | १३/१ |
| | = कुशलानुष्ठानम् । उ.र. | २३ |
| | = जीवपर्यायः । अ. | ३०/६ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| | = तपश्चरणाद्यनुष्ठानम् । उ.र. | २ |
| | = दुर्गतिगर्तनिपतज्जन्तुजातधरणप्रवणपरिणामः । पं. | १/१ |
| | = दुर्गतिप्रपतत्प्राणिधारणाद्धर्म उच्यते ।<br>संयमादिर्दशविधः सर्वज्ञोक्तो विमुक्तये ॥१०॥ | |
| | * दुर्गतिप्रसृताञ्जन्तून् यस्माज्ञरयते ततः ।<br>धत्ते चैतान् शुभे स्थाने तस्माद्धर्म्म इति स्मृतः ॥ यो.श. | |
| | = दुर्गतौ प्रपतन्तमात्मानं धारयतीति धर्मः । ध्या. | १७ |
| | = दुर्गतौ प्रपन्तमात्मानं धारयतीति धर्म्मः उक्तं च-<br>"दुर्गतिप्रसृताञ्जीवान् यस्माद्धारकः ततः ।<br>धत्ते चैतान् शुभे स्थाने तस्माद्धर्म इति स्मृतः ॥" ल.वि. | २९६ |
| | = धर्मपदार्थः द्विविध- संज्ञानयोगलक्षणः एकः,<br>अन्यः पुण्यलक्षणः । प्र. | ९४ |
| | = प्रवचनम् । पं. | १७/२४ |
| | = प्रवृत्तिनिवृत्तिरूपः । शा.वा. | ३ |
| | = यतोऽभ्युदय-निःश्रेयससिद्धिः सः । यो.शा. | १/५२ |
| | = वचनाद्यदनुष्ठानमविरुद्धाद्यथोदितम् ।<br>मैत्र्यादिभावसंयुक्तं, तद्धर्म इति कीर्त्यते ॥३॥ ध. | ३ |
| | = शुभबन्धरूपः । यो.बिं. | ३८३ |
| | = श्रुतचारित्रलक्षणः । अ. | ५/५ |
| | = सदाचाररूपः । यो.बिं. | ९० |
| | = सम्यग्दर्शनादिमोक्षबीजाधानम् । द्वा. | १०/८ |
| | = सम्यग्दर्शनादिरूपः । पं. | २/२ |
| | = सर्वपुरुषार्थप्रथमस्थानोपन्यस्तः अत एव<br>सर्वसमीहितसिद्ध्यवन्ध्यनिबन्धनः श्रुतचारित्राराधनारूपः, | १६७ |
| | * दुर्ग्गतिप्रवृत्तजन्तुवारनिवारणकरणप्रवणः<br>जीवपरिणतिविशेषरूपः । उ.प. | १८३ |
| | = स्वपरोपकारात्मकः । अ. | २/५ |
| धर्मक्षमा | = आत्मशुद्धस्वभावलक्षणाज्जायमाना क्षान्तिश्चन्दनस्येव<br>शरीरस्य च्छेददाहादिषु सौरभादिस्वधर्मकल्पा<br>परोपकारिणी सहजत्वेनावस्थिताऽविकारिणी । द्वा. | २८/७ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| धर्मप्रवृत्तः | = | मोक्षहेतुसदनुष्ठानसमुपस्थितः । अ. | २५/७ |
| धर्मफलम् | = | तत्राक्लिष्टमनुत्तरं विषयसौख्यम्, हीनभावविगमः, उदग्रतरससम्पत्, प्रभूतोपकारकरणम्, आशयविशुद्धिः, धर्मप्रधानता, अवन्ध्यक्रियत्वम्, विशुद्ध्यमाना-प्रतिपातिचरणावाप्तिः, तत्सात्म्यभावः, भव्यप्रमोद-हेतुता, ध्यानसुखयोगः, अतिशयर्द्धिप्राप्तिः, अपूर्वकरणम्, क्षपकश्रेणिः, मोहसागरोत्तारः, केवलाभिव्यक्तिः परमसुखलाभः । ध. | ४८४/३८६ |
| धर्मबीजम् | = | सम्यक्त्वं, बीजबीजं - तदाक्षेपकशासनप्रशंसादि । पञ्च. | ४ |
| धर्मयौवनकालः | = | चरिमो उ धम्मजुव्वणकालो तहचित्तभेओ त्ति । विं. | ४/१९ |
| धर्मरागः | = | चारित्रधर्मानुरागरूपः । यो.बिं. | २५३ |
| | = | धर्माभिष्वङ्गः, सामग्रीवैकल्यातकरणेऽपि चेतसोऽनुबन्धः । यो.श. | १४ |
| धर्मरागी | = | श्रुत-चारित्रलक्षणधर्मानुरक्तः । पं. | ७/४ |
| धर्मवादः | = | ज्ञातृस्वशास्त्रतत्त्वेन मध्यस्थेनाघभीरुणा । कथाबन्धस्तत्त्वधिया धर्मवादः प्रकीर्तितः ॥ द्वा. | ८/४ |
| | = | धर्मप्रधानो वादः । अ. | १२/१ |
| | = | परलोकप्रधानेन, मध्यस्थेन तु धीमता । स्वशास्त्रज्ञाततत्त्वेन, धर्मवाद उदाहृतः ॥ अ. | १२/६ |
| धर्महेतुप्रसाधनम् | = | साधुसेवा सदा भक्त्या, मैत्री सत्त्वेषु भावतः । आत्मीयग्रहमोक्षश्च, धर्महेतुप्रसाधनम् ॥६॥ शा.वा. | ६ |
| धर्माधर्मौ | = | तन्निर्वाणाशयो धर्मस्तत्त्वतो धर्म उच्यते । भवाशयस्त्वधर्मः स्यात् तथामोहप्रवृत्तितः ॥३०२॥ ब्र.सि. | ३०२ |
| | = | धर्माधर्मव्यवस्थायाः शास्त्रमेव नियामकम् । तदुक्तसेवनाद् धर्मः, अधर्मस्तद्विपर्ययात् ॥ ब्र.सि. | १४३ |
| धर्माभ्यासम् | = | धर्मानुष्ठानम् । उ.र. | १८६ |
| धर्मार्थम् | = | सम्यग्दर्शनादिमोक्षबीजाधाननिमित्तम् । यो.बिं. | ९० |
| धर्मार्थी | = | धर्माभिलाषुकः । यो.बिं. | २२४ |
| | = | परलोकभीरुः । पं.व. | ९७३ |
| धर्मोपदेशः | = | अर्थोपदेशो व्याख्यानम् अनुयोगवर्णनं धर्मोपदेश इत्यनर्थान्तरम् । त.भा. | ९/२५ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| धर्मोपदेशकाः | = | धर्मं संवरनिर्जरारूपं यति-श्रावकसम्बन्धिभेदभिन्नं वा उपदिशन्तीति धर्मोपदेशकाः । यो.शा. | २/९ |
| धर्म्मकथी | = | पडिबोहियभव्वजणो धम्मकही कहणलद्धिल्लो, | ३३ |
| | * | व्याख्यानलब्धिमान् । स.स. | ३८ |
| धर्म्यम् | = | श्रुत-चरणधर्मानुगतम् । ध्या. | ५ |
| धारणम् | = | अशुभव्यापारनिरोधेनावस्थानमिति । ध्या. | ३१ |
| | = | अधिकृतवस्त्वविस्मृतिः । इयं चेह ज्ञानावरणीयकर्मक्षयोपशमसमुत्था अविच्युत्यादिभेदवती प्रस्तुतवस्त्वानुपूर्वी गोचरा चित्तपरिणतिः । ल.वि. | २७५ |
| | = | अर्हद्गुणाविस्मरणरूपा । | २३ |
| | = | चित्तस्य देशबन्धलक्षणा । यो.दृ. | १६२ |
| | = | धारणा प्रतिपत्तिर्यथास्वं मत्यवस्थानमवधारणं च, | |
| | * | धारणा प्रतिपत्तिरवधारणावस्थानं निश्चयः अवगमः अवबोध इत्यनर्थान्तरम् । त.भा. | १/१५ |
| | = | श्रुतार्थाऽविस्मरणानुकूलव्यापाररूपा । उ.र. | १९४ |
| धीरः | = | आशंकावर्जितः बुद्धिमान् वा । पं. | १२/३६ |
| | = | कार्यनान्तरीयकस्वगतपरिभवसहिष्णुः । सा. | ६१ |
| | = | सात्त्विकः । पं. | १९/८ |
| | = | गुर्वाज्ञापालनबद्धकक्षाः साधवः । सा. | ५१ |
| | = | मोहभटरणभङ्गक्षमधैर्यवन्तः । उ.र. | १८९ |
| | = | सत्त्वाधिकैरविवेकिलोकापवादादबिभ्यतः बुद्धिमन्तः वेति । पं. | ३/५० |
| धृतिः | = | उद्वेगादिदोषपरिहारेण चित्तस्वास्थ्यम् । पं. | ३/२७ |
| | = | उद्वेगादिपरिहारेण चेतसः स्वास्थ्यं धृतिः । अ.म. | ७० |
| | = | पतनप्रतिबन्धकः संयोगः । द्वा. | ४/१२ |
| | = | मनःप्रणिधानं, विशिष्टा प्रीतिः । इयमप्यत्र मोहनीयकर्मक्षयोपशमादिसंभूता, रहिता दैन्यौत्सुक्याभ्यां, धीरगम्भीराशयरूपा । ल.वि. | २७४ |
| | = | मनःस्वास्थ्यम् । प्र. | २३ |
| धृतिबलिकः | = | चित्तसमाधानलक्षणसामर्थ्ययुक्तः । पं. | ७/४ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| धृष्टाः | = कुवासनास्तब्धदोषाः । गु. | १/६ |
| धैर्यम् | = व्यसनोपनिपातेऽपि प्रतिज्ञातोऽविचलनम् । यो.बिं. | ४११ |
| | = भयहेतूपनिपातेऽपि निर्भयत्वम् । षो. | ४/४ |
| | = व्यसनाशनिसन्निपातेऽप्यविचलितप्रकृतिभावः । यो.बिं. | ५२ |
| ध्याता | = अमुञ्चन् प्राणनाशेऽपि संयमैकधुरीणताम् ।<br>परमप्यात्मवत् पश्यन् स्वस्वरूपापरिच्युतः ॥२॥<br>उपतापमसंप्राप्तः शीतवातातपादिभिः ।<br>पिपासुरमरीकारि योगामृतरसायनम् ॥३॥<br>रागादिभिरनाक्रान्तं क्रोधादिभिरदूषितम् ।<br>आत्मारामं मनः कुर्वन्निर्लेपः सर्वकर्मसु ॥४॥<br>विरतः कामभोगेभ्यः स्वशरीरेऽपि निःस्पृहः ।<br>संवेगहृदनिर्मग्नः सर्वत्र समतां श्रयन् ॥५॥<br>नरेन्द्रे वा दरिद्रे वा तुल्यकल्याणकामनः ।<br>अमात्रकरुणापात्रं भवसौख्यपराङ्मुखः ॥६॥<br>सुमेरूरिव निष्कम्पः शशीवानन्ददायकः ।<br>समीर इव निःसङ्गः सुधीर्ध्याता प्रकाश्यते ॥७॥ यो.शा. | ७/७ |
| | = मनसश्चेन्द्रियाणां च जयाद्यो निर्विकारधीः ।<br>धर्मध्यानस्य स ध्याता शांतो दांतः प्रकीर्तितः ॥६२॥ अध्या. | १६/६२ |
| | = सुखासनसमासीनः सुश्लिष्टाधरपल्लवः ।<br>नासग्रन्यस्तदृग्द्वन्द्वो दन्तैर्दन्तानसंस्पृशन् ॥१३५॥ | ४/१३५ |
| | प्रसन्नवदनः पूर्वाभिमुखो वाप्युदग्मुखः ।<br>अप्रमत्तः सुसंस्थानो ध्याता ध्यानोद्यतो भवेत् ॥१३६॥ | |
| ध्यानम् | = उत्तमसंहननस्यैकाग्रचिन्तानिरोधो ध्यानम् । त.भा. | ९/२७ |
| | = उपयोगे विजातीयप्रत्ययाव्यवधानभाक् ।<br>शुभैकप्रत्ययो ध्यानं सूक्ष्माभोगसमन्वितम् ॥११॥ द्वा. | १८/११ |
| | = जो किर जयणापुव्वो वावारो सो ण झाणपडिवक्खो ।<br>सो चेव होइ झाणं जुगवं मणवयणकायाणं ॥ अ.म. | ८ |
| | = ध्यातिर्ध्यानम्–अन्तर्मुहूर्तमात्रं चित्तैकाग्रता । पं. | १९/३ |
| | = ध्यानं चैकाग्र्यसंवित्तिः, समापत्तिस्तदेकता ॥२॥ ज्ञा. | ३०/२ |
| | = ध्यायते–चिन्त्यतेऽनेन तत्त्वम् इति ध्यानम्,<br>एकाग्रचित्तनिरोध इत्यर्थः । ध्या. | १ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | = | भवशतसमुपाचितकर्मवनगहनज्वलनकल्पमखिलतपः- प्रकारप्रवरमान्तरतपः क्रियारूपं धर्मध्यानं शुक्लध्यानं च । अ. | ५/२ |
| | = | यत् स्थिरमध्यवसानं तद् ध्यानमभिधीयते । ध्या. | २ |
| | = | विद्यमानक्लिष्टचित्तनिरोधलक्षणोपेक्षासंयमाद् युक्तः । उ.र. | १९० |
| | = | विशिष्टतरं साम्यम् । यो.शा. | ४/११२ |
| | = | शुभैकालम्बनं चित्तं ध्यानमाहुर्मनीषिणः ।<br>स्थिरप्रदीपसदृशं सूक्ष्माभोगसमन्वितम् ॥ यो.बिं. | ३६२ |
| | = | सुदढप्पयत्तवावारणं णिरोहो व विज्जमाणाणं ।<br>झाणं करणाण मयं, ण उ चित्तणिरोहमित्तागं ॥ गु. | १/५५ |
| | = | स्थिरमध्यवसानं यत्तद्ध्यानं चित्तमस्थिरम् ॥ अध्या. | १६/१ |
| | = | स्थिराध्यवसानरूपं धर्म्यं शुक्लं च । | |
| | * | एकालम्बनसंस्थस्य सदृशप्रत्ययस्य च ।<br>प्रत्ययान्तरनिर्मुक्तः प्रवाहो ध्यानमुच्यते ॥ षो. | १४<br>१२/१४ |
| ध्यानान्तरिकाः | = | अनालम्बनध्यानमोचनम्, | १५/१० |
| | * | परतत्त्ववेधकल्पः केवलप्रकाशः । षो. | १५/१० |
| ध्येयम् | = | पिंडस्थं च पदस्थं च रूपस्थं रूपवर्जितम् ।<br>चतुर्धा ध्येयमाम्नातं ध्यानस्यालम्बनं बुधैः ॥८॥ यो.शा. | ७/८ |
| | | **[ न ]** | |
| नत्वा | = | तत्त्वतः स्वाभेदेनांतर्भूतध्यातृध्येयभावेन प्रणिधाय । उ.र. | १ |
| नमस्कारसहितम् | = | नमस्कारश्च-पञ्चमङ्गलरूपस्तेन सहितं-संयुतम्,<br>नमस्कारपाठं यावद्भवति, न परतोऽपि, यत्प्रत्याख्यानम्<br>तन्नमस्कारसहितमभिधीयते । पं. | ५/८ |
| नम्रता | = | औचित्येन नमनशीलता । यो.बिं. | १२७ |
| नयः | = | अनन्तधर्मात्मके वस्तुन्यपेक्षयैकधर्मावधारणम् इति<br>नयसामान्यलक्षणम्, | |
| | * | यदवदाम सत्त्वासत्त्वाद्युपेतार्थेष्वपेक्षावचनं नयः ।<br>न विवेचयितुं शक्यं, विनाऽपेक्षां हि मिश्रितम् ॥ त.उ. | १/३४ |
| | = | सद्भावानयनहेतुराक्षेपणादिरूपः प्रकार इह नयः । यो.श. | २९ |
| | = | नयाः प्रापकाः कारकाः साधका निर्वर्तका<br>निर्भासका उपलम्भका व्यञ्जका इत्यनर्थान्तरम्, | |

| नाम | व्याख्या | गाथा |
|---|---|---|
| | * जीवादीन् पदार्थान् नयन्ति प्राप्नुवन्ति कारयन्ति साधयन्ति निर्वर्तयन्ति निर्भासयन्ति उपलम्भयन्ति व्यञ्ज्यन्तीति नयाः । त.भा. | १/३५ |
| नाथः | = अप्राप्तसम्यग्दर्शनादिगुणाधानेन प्राप्तगुणानां च तत्तदुपायप्ररूपणेन रक्षणतो योगक्षेमकर्त्ता यः सः । उ.प. | १ |
| नाम | = गत्यादिशुभाशुभनमनान् नामयतीति । श्रा. | ११ |
| नामाजीवः | = अजीव इति नाम यस्य क्रियते सः । त.उ. | १/५ |
| नालबद्धानि | = माता पिता भ्राता भगिनी पुत्रो दुहिता चेति षड् नालबद्धानि । गु. | २/२४७ |
| निःसङ्गः | = विषयजस्नेहसङ्गरहितः । ध्या. | ३४ |
| निःस्पृहः | = स्वभावलाभात् किमपि प्राप्तव्यं नावशिष्यते । इत्यात्मैश्वर्यसम्पन्नो, निःस्पृहो जायते मुनिः ॥१॥ ज्ञा. | १२/१ |
| निकर्षः | = 'संयोजनं' सजातीयविजातीयप्रतियोगिकतुल्यत्वादिधर्मसङ्घट्टनं निकर्षः । गु. | ४/९० |
| निकाचना | = स्पृष्टतानन्तरभाविनी बद्धस्य कर्मणः सकलकरणायोग्यतावस्था । त.उ. | १/३ |
| निकाचितः | = उपशमनादिकरणान्तराविषयस्यैव नितरां बद्धस्य निकाचितार्थत्वात् न तु भोगं विना क्षपणाऽयोग्यम् । अ.म. | १०१ |
| निगूहिता | = धृतिबलाऽस्फोरणेनाऽप्रकटीकृता । सा. | ७८ |
| निर्ग्रन्थाः | = दसचउदसविहबज्झब्भंतरगंथा उ जे मुणी मुक्का । ते णिग्गंथा तेसिं, पंचण्ह परूवणं वुच्छं ॥ गु. | ४/२ |
| नित्यः | = अप्रच्युतानुत्पन्नस्थिरैकरूपः । अ. | १४/१ |
| | = सार्वदिकम् साद्यपर्यवसितत्वात् । अ. | ३२/७ |
| नित्यसुखी | = स्वशरीरेऽपि न रज्यति शत्रावपि न प्रदोषमुपयाति । रोगजरामरणभयैरव्यथितो यः स नित्यसुखी ॥२४०॥ | २४० |
| | * धर्मध्यानाभिरतस्त्रिदण्डविरतस्त्रिगुप्तिगुप्तात्मा । सुखमास्ते निर्द्वंद्वो जितेन्द्रियपरीषहकषायः ॥२४१॥ प्रश. | २४१ |
| निदानचिन्तनम् | = निदानाध्यवसायः, अहमनेन तपस्त्यागादिना देवेन्द्रः स्यामित्यादिरूपः । ध्या. | ९ |
| निदानम् | = आर्त्तध्यानविशेषः । पं. | ४/३० |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | = | औदयिकभावप्रार्थनाविशिष्टा तीर्थकरत्वप्रार्थना । कू. | १३ |
| निन्हवाः | = | यथावस्थितं समस्तवस्तुप्रतिपत्तावप्येकत्र कुत्रचिदर्थेऽन्यथाप्रतिपत्त्या यथावज्जिनवदन-विनिर्गतवचनं निह्नुवतेऽपलपन्तीति निन्हवा मिथ्यादृशः । स.स. | ११ |
| निपुणः | = | धर्मपरीक्षादक्षः । उ.र. | २ |
| निभृतासनम् | = | अप्रगल्भतयावस्थानम् । यो.बिं. | ११२ |
| निमन्त्रणासा. | = | अहं भवदर्थमशनाद्यानयामीत्येवं भक्तितो भणनम् इति । पं. | १२/२ |
| | = | गुरुपुच्छाइ मुणीणं अग्गहियसंपत्थणा णिमंतणया । सज्झायाइरयस्स वि कज्जुज्जुत्तस्स सा होइ ॥६२॥ सा. | ६२ |
| | = | प्रागेव ग्रहणादामन्त्रणम् । सा. | ४ |
| निमित्तानि | = | भाविन इष्टादेः सूचकानि । यो.श. | ४३ |
| नियमः | = | अवश्यंकर्तव्यताङ्गीकारः । पं. | १/४ |
| | = | नियमनम्-नियमः, हेयार्थेभ्यः उपरमः । पं. | ५/२ |
| | = | नियोगोऽवश्यं मयैतद्गुरुकार्यं देवकार्यं (वा) कर्तव्यमित्यभिनिवेशलक्षणः । पं. | ३/५ |
| | = | व्यवस्था । ल.वि. | १५१ |
| | = | सदसदाचारप्रवृत्तिनिवृत्तिलक्षणः । ल.वि. | ७४ |
| निरतिचारः | = | यथागृहीतपरिपालनम् । पञ्च. | २ |
| निरनुबन्धयोगः | = | अपायसहितो योगः । द्वा. | १९/१७ |
| निरपाययोगः | = | तद्रहितस्तु (अपायरहितस्तु) निरपायः । यो.विं. | ११ |
| निरपेक्षाः | = | जिनकल्पिकादयः । गु. | २/३३० |
| निरवद्यम् | = | अवद्यं पापमुच्यते, निर्गतमवद्यं यस्मात् तद् । ध्या. | ४६ |
| | = | इहलोकाद्याशंसारहितम् । ध्या. | ४६ |
| निरालम्बनः | = | आलम्बनाद् विषयभावापत्तिरूपान्निष्क्रान्तो निरालम्बनः, यो हि छद्मस्थेन ध्यायते न च स्वरूपेण दृश्यते तद्विषयो निरालम्बन इति यावत् । यो.विं. | १९ |
| | = | आलम्बनाद्विषयभावापत्तिरूपान्निष्क्रान्तो यो हि छद्मस्थेन ध्यायते न च स्वरूपेण दृश्यते योगो ध्यानविशेषः । षो. | १४/१ |
| निरुद्धचित्तम् | = | उपरतविकल्पवृत्तिकमवग्रहादिक्रमच्युतं शुद्धम् । आत्माराममुनीनां निरुद्धं सदा चेतः ॥८॥ अध्या. | २०/८ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| निरुपसर्गः | = | जन्माद्युपसर्गरहितो मोक्षः । प्र. | २३ |
| निरोधः | = | निरोधनं निरोधः प्रलयकरणम् । ध्या. | ३ |
| निर्ग्रन्थः | = | ग्रन्थः कर्माष्टविधं मिथ्यात्वाविरतिदुष्टयोगाश्च ।<br>तज्जयहेतोरशठं संयतते यः स निर्ग्रन्थः ॥१४२॥ प्रश. | १४२ |
| | = | बांधवधनेन्द्रियसुखत्यागात्त्यक्तभयविग्रहः साधुः ।<br>त्यक्तात्मा निर्ग्रन्थस्त्यक्ताहंकारममकारः ॥१७३॥ प्रश. | १७३ |
| निर्जरा | = | निर्जरा वेदना विपाक इत्यनर्थान्तरम् । त.भा. | ९/७ |
| | = | विपाकात्तपसा वा कर्मपरिशाटो निर्जरा । त.उ. | १/४ |
| निर्बन्धः | = | आग्रहः । यो.बिं. | १२९ |
| निर्भयः | = | इहलोकादिसप्तभयविप्रमुक्तः । ध्या. | ३३ |
| निर्भासनम् | = | वस्त्वंशविविक्तीकरणात्मिका दीप्तिः । त.उ. | १/३५ |
| निर्ममत्वम् | = | रागस्यैकस्य प्रतिपक्षभूतम् । यो.शा. | ४/५५ |
| निर्मलबोधः | = | निर्मलबोधोप्येवं शुश्रूषाभावसम्भवो ज्ञेयः ।<br>शमगर्भशास्त्रयोगाच्छ्रुतचिन्ताभावना सारः ॥६॥ षो. | ४/६ |
| निर्लज्जाः | = | स्वतन्त्रतादोषात् । गु. | १/६ |
| निर्वर्तनम् | = | तथाध्यवसायेनाप्रच्युतिः । त.उ. | १/३५ |
| निर्वेदः | = | तात्त्विकसंसारनैर्गुण्यावधारणम् । उ.र. | १०९ |
| | = | नारयतिरियनरामरभवेसु निव्वेयओ वसइ दुक्खं ।<br>अकयपरलोयमग्गो ममत्तविसवेगरहिओ वि ॥१२॥ विं. | ६/१२ |
| | = | निव्वेओ चागिच्छा तुरियं संसारचारयगिहस्स । स.स. | ४५ |
| | = | नैर्गुण्यपरिज्ञानेन भवचारकाद्विरक्तता । यो.विं. | ८ |
| | = | भववैराग्यम् । सम्यग्दर्शनी हि दुःखदौर्गत्यगहने भवकारागारे<br>कर्मदण्डपाशिकैस्तथा तथा कदर्थ्यमानः प्रतिकर्तुमक्षमो<br>ममत्वरहितश्च दुःखेन निर्विण्णो भवति, | |
| | * | विषयेष्वनभिषङ्गः । यो.शा. | २/१५ |
| | = | विषयानभिष्वङ्गः । त.उ. | १/२ |
| निवृत्तिः | = | औत्सुक्यव्यावृत्तिः । श्रा. | ३९९ |
| निवेदनम् | = | विधिनिषेधान्यतर उपदेशः । सा. | ५१ |
| निशीथम् | = | सूत्रार्थभ्याम् अप्रकाशम् । त.उ. | १/२० |
| निश्चयः | = | उपचारपरिहाररूपः । यो.बिं. | ३६९ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| | = कर्तव्यैकाग्रपरिणामः । यो.बिं. | ४११ |
| निश्चयतः | = निश्चयेन-अक्षेपफलं नियमफलं वाऽङ्गीकृत्य । यो.श. | २ |
| निश्चयनयः | = जो णिच्छओ पवट्टइ, हेउसरूवावाबंधपडिपुण्णो ।<br>सो णिच्छयओ णेओ, वायामित्तेण इअरो उ ॥ गु. | १/३८ |
| निश्रा | = रागः,<br>* एषोऽनुवर्त्तितः सन् मह्यमाहारादिकं दास्यतीत्येषाऽपेक्षा<br>लञ्चोपजीवनस्वभावा निश्रा । गु. | २/६३ |
| निषेधिकीसा. | = निषेधेन-असंवृत्तगात्रवेष्टानिवारणेन निर्वृत्ता तत्प्रयोजना<br>वा या शय्यादिप्रवेशक्रिया सा । पं. | १२/२ |
| | = निषेधेन निर्वृता । सा. | ४ |
| | = पापकर्मनिषेधक्रियागोचरा । सा. | ३९ |
| निष्पन्नयोगचिह्नम् | = मैत्र्यादियुक्तं विषयेष्वचेतः प्रभाववद्धैर्यसमन्वितं च ।<br>द्वन्द्वैरधृष्यत्वमभीष्टलाभः जनप्रियत्वं च तथा परं स्यात् ॥<br>* दोषव्यपायः परमा च तृप्तिरौचित्ययोगः समता च गुर्वी ।<br>वैरादिनाशोऽथ ऋतम्भरा धीर्निष्पन्नयोगस्य तु चिह्नमेतत् ॥<br>यो.दृ. | १६१ |
| निष्फलारम्भसङ्गतः | = सर्वत्राऽतत्त्वाभिनिवेशाद्वन्ध्यक्रियासम्पन्नः । यो.बिं. | ८७ |
| निसर्गः | = एकार्थः परिणामो भवति निसर्गः स्वभावश्च ॥२२३॥ प्रश. | २२३ |
| | = गुर्वाद्युपदेशरहितस्वभावः । त.उ. | १/३ |
| | = निसर्गः परिणामः स्वभावः अपरोपदेश इत्यनर्थान्तरम् । त.भा. | १/३ |
| निस्सारम् | = अपगतरामणीयकम् । त.उ. का. | १/१५ |
| नीतिः | = परमारथचिन्तारूपा । यो.बिं. | ३०८ |
| नैगमः | = निगमेषु येऽभिहिताः शब्दास्तेषामर्थः शब्दार्थपरिज्ञानं च<br>देशसमग्रगाही नैगमः । त.भा. | १/३५ |
| नैमित्तिकः | = नेमित्तिओ निमित्तं कज्जंमि पउंजए निउणं, | ३४ |
| | * त्रिकालज्ञानवेत्ता । स.स. | ३८ |
| नैमित्तिकीसंज्ञा | = जातिप्रवृत्तिनिमित्तिका संज्ञा । त.उ. | १/३५ |
| न्यायः | = द्विज-क्षत्रिय-विट्-शूद्राणां स्ववृत्त्यनुष्ठानम् । श्रा. | ३२५ |
| | = सद्विचारः । शा.वा. | ४५० |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| न्यायात्तम् | = | न्यायेन ब्राह्मणक्षत्रियविट्शूद्राणां स्वजातिविहितव्यापारेणात्तं स्वीकृतम् ! षो. | ५/१३ |
| | | **[ प ]** | |
| पक्षपातः | = | गुणबहुमान–तत्प्रशंसा–साहाय्यकरणादिना अनुकूला प्रवृत्तिः । यो.शा. | १/५३ |
| | = | गुणानालोचनपूर्व एव रागः । द्वा. | ४/३ |
| पण्डितः | = | पंडितः सर्वयत्नेन शास्त्रतत्त्वं परीक्षते । तत्त्वतस्तस्य मार्गानुसारितयोत्कृष्टाचारत्वात् । द्वा. | २/६ |
| | = | धर्मग्रन्थकरणपेशलमतयः । गु. | १/९ |
| पदस्थम् | = | यत् पदानि पवित्राणि समालम्ब्य विधीयते । तत् पदस्थं समाख्यातं ध्यानसिद्धान्तपारगैः ॥१॥ यो.शा. | ८/१ |
| पदार्थः | = | पद्यते गम्यतेऽर्थः सामान्यरूपोऽचालिताऽप्रत्यवस्थापितो येनेति । उ.र. | १५५ |
| पदार्थत्वम् | = | पदशक्तिविषयत्वम् । त.उ. | १/४ |
| पदार्थरसिकः | = | आगमोक्तदेवतत्वगुरुतत्त्वागमतत्त्वजीवादिभावप्रीतियुक्तः । पं. | २/३४ |
| परपाषण्डसंस्तवः | = | परपाषण्डैः सह परिचयो यः सः संस्तवो भवति । श्रा. | ८८ |
| परपाषाण्डानां प्रशंसा | = | सर्वज्ञप्रणीतपाषण्डव्यतिरिक्तानां पुण्यभाज एते सुलब्धमेभिर्मानुजं जन्म दयालव एत इत्यादिरूपप्रशंसा । श्रा. | ८८ |
| परमनिर्वृतिः | = | सकलसांसारिकसुखातिशायिमोक्षसुखम् । सा. | १ |
| परमपदम् | = | पुण्यानुबन्धिपुण्यभोगोचितं स्थानम् । गु. | १/६ |
| परमर्षयः | = | ऋषयः सामान्यकेवलिनस्तेभ्यः परमाः । त.उ. | १/२० |
| परमसिद्धिः | = | अणिमादिसिद्ध्यपेक्षया प्रधाना पुरुषार्थनिष्पत्तिर्निवाणमित्यर्थः । पं. | ३/१४ |
| परमागमः | = | यथावस्थितसकलपदार्थसार्थपरमार्थतया प्रधानो य आगमो द्वादशाङ्गीरूपः सिद्धान्तः । स.स. | १३ |
| परमात्मा | = | चिद्रूपानन्दमयो निःशेषोपाधिवर्जितः शुद्धः । अत्यक्षोऽनन्तगुणः परमात्मा कीर्तितस्तज्ज्ञैः ॥८॥ यो.शा. | १२/८ |
| | = | ज्ञानं केवलसंज्ञं योगनिरोधः समग्रकर्म्महतिः । सिद्धिनिवासश्च यदा परमात्मा स्यात्तदा व्यक्तः ॥२४॥ अध्या. | २०/२४ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | = | परमश्चासावात्मा च परमात्मा सकलकर्मरहितः देवाधिदेवरित्यर्थः । शा.वा. | १ |
| | = | निःशेषकलङ्करहितः, | |
| | * | केवलज्ञानादिपरिणतस्तु परमात्मा, | |
| | * | ततः परं (क्षीणमोहादुपरि) तु परमात्मा । अ.म. | १२५ |
| परमाध्यात्मम् | = | जा खलु सहावसिद्धा किरिआ अप्पाणमेव अहिगिच्च । भण्णइ परमज्झप्पं सा दंसण-णाण-चरणड्ढा । अ.म. | ३ |
| परमानन्दः | = | सुस्वास्थ्यं, तदन्यनिरपेक्षत्वादिति । ध. | ५३२ |
| परमानन्दरूपम् | = | प्रकृष्टाह्लादस्वभावम् । अ. | ३२/८ |
| परमानन्दसुखम् | = | मोक्षसुखम्, | |
| | * | सर्वसांसारिकसुखातिशायिसुखम् । षो. | १५/१६ |
| परम्परफलम् | = | सुगतिजन्मोत्तमस्थानपरम्परा निर्वाणाप्तिरिति, | ४४९ |
| | * | विशिष्टदेवस्थानमिति । ध. | ४५० |
| परलोकः | = | जन्मान्तरं प्रधानं जन्म वा । पं. | १/२ |
| | = | वर्त्तमानभावापेक्षया भवान्तररूपः । उ.प. | ४३६ |
| परादृष्टिः | = | समाधिनिष्ठा तु परा तदासङ्गविवर्जिता । सात्मीकृतप्रवृत्तिश्च तदुत्तीर्णाशयेति च ॥१७८॥ यो.दृ. | १७८ |
| परानन्दकारणम् | = | नैरपेक्ष्यादनौत्सुक्य-मनौत्सुक्याच्च सुस्थता । सुस्थता च परानन्द-स्तदपेक्षां क्षयेद् मुनिः ॥१९॥ यो.सा. | ५/१९ |
| परार्थकरणम् | = | परप्रयोजननिष्पादनम् । यो.दृ. | ८९ |
| | = | विहितानुष्ठानपरस्य तत्त्वतो योगशुद्धिसचिवस्य । भिक्षाटनादि सर्व्वं परार्थकरणं यतेर्ज्ञेयम् ॥५॥ षो. | १३/५ |
| परार्थरसिकः | = | परोपकारबद्धचित्तः । यो.बिं. | २७२ |
| परावर्तनम् | = | परावर्तनं तु पूर्वाधीतस्यैव सूत्रादेरविस्मरण-निर्जरानिमित्तमभ्यासकरणम् । ध्या. | ४२ |
| परिग्रहः | = | पुढवाइसु आरंभो, परिग्गहो धम्मसाहणं मुत्तुं । मुच्छा य तत्थ बज्झो, इयरो मिच्छत्तमाईओ ॥७॥ पं.व. | ७ |
| | = | मूर्च्छा परिग्रहः, | ७/१२ |
| | * | चेतनावत्स्वचेतनेषु बाह्याभ्यन्तरेषु द्रव्येषु मूर्च्छा परिग्रहः । त.भा. | ७/१२ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| परिज्ञा | = ज्ञपरिज्ञाप्रत्याख्यानपरिज्ञारूपा द्विविधा । पञ्च. | ४ |
| परिणतजिनवचनाः | = *सम्यक् श्रद्धागोचरीकृतप्रवचनतत्त्वाः* । सा. | ६३ |
| परिणताः | = परिणतं परिपाकमापन्नं जीवेन सहैकीभावमागतं चारित्रं येषां ते परिणताः, इतरेऽपरिणताः । गु. | २/३३० |
| परिणामः | = अपरापरपर्यायगमनम्, | |
| | * *परिणामो ह्यर्थान्तरगमनं, न तु सर्वथा व्यवस्थानम् ।* न च सर्वथा विनाशः, परिणामस्तद्विदामिष्टः ॥ अ. | १०/६ |
| | = केनचिद्रूपेणान्वयित्वे सति केनचिद्रूपेण व्यतिरेकित्वं परिणामः । षो. | १६/५ |
| | = चित्तभावः । द्वा. | ७/३० |
| | = जीवाध्यवसायः । पं. | ३/२९ |
| | = परि समन्ताद् नमनं परिणामः सुदीर्घकालं पूर्वापरार्थावलोकनादिजन्य आत्मधर्म इत्यर्थः । उ.प. | ३८ |
| | = शुभान्तःकरणपरिणतिरूपः । उ.र. | ५ |
| | = सम्यक्परिणतजिनवचना मध्यस्थवृत्तयः । गु. | १/४९ |
| परिभोगः | = परि-आवृत्त्या बहिर्वा भोजनं परिभोगो वस्त्रादिभोगः । पं. | १/२१ |
| | = परिभुज्यत इति पुनः पुनः भुज्यत इति वस्त्रादिः, * बहिर्भोगः परिभोगः परिशब्दस्य बहिर्वाचकत्वात् । श्रा. | २८४ |
| परिशुद्धः | = इहलोकाशंसादिपरिहारेण शुद्धः । यो.बिं. | १३४ |
| | = केवलमाज्ञापेक्षी पुष्टालम्बनः । पञ्च. | ५ |
| | = प्रणिधानाद्याशयविशुद्धिमान् । यो.विं. | १ |
| | = निर्दूषणम् । पं. | ३/१ |
| | = सर्वतो भावविशुद्धा प्रतिपत्तिमीमांसोत्तरकालभाविनीदमित्थमेवेते निश्चयाकारापरिच्छत्तिः तत्त्वविषयैव । षो. | १६/१४ |
| परिशुद्धाज्ञायोगः | = दीर्घकालाऽऽदरनैरंतर्यासेवितविशुद्धाज्ञासंपत्तिः । उ.र. | ४४ |
| परीक्षाविधिः | = अयमित्थंभूतोऽनित्थंभूतो वेति विशेषनिर्द्धारणप्रकारम् । ध.प. | १ |
| परीभोगः | = भक्षणम् । पं. | ८/९ |
| परीषहजयः | = क्षुद्वेदनाद्याकुलताप्रतिपक्षः सामायिकरूपस्थिरतापरिणाम एव निश्चयतः परीषहविजयः । अ.म. | २७ |

| नाम | | व्याख्या | गाथा |
| --- | --- | --- | --- |
| परोपकारः | = | स्वव्यतिरिक्तानामुपकार आयतिहितानुकूलो व्यापारस्तस्य स्वोपकारानुबन्धप्रधानत्वात् । उ.र. | १९५ |
| पर्याप्तिः | = | करणशक्तिः । श्रा. | २१ |
| पर्यायाः | = | समानप्रवृत्तिनिमित्तकनानाशब्दाः, | |
| | * | तत्त्वभेदवाचकनानाशब्दाः, तद्व्याख्यानं तत्र व्युत्पत्तिव्यवहारसौलभ्यार्थम् । गु. | ४/४६ |
| पर्व: | = | पूरणात् धर्मोपचयहेतुत्वात् । श्रा. | ३२१ |
| पात्रः | = | दायकलोकरक्षाकरः । यो.बिं. | १२१ |
| पात्रविशेषः | = | सम्यग्दर्शनज्ञानचारित्रतपःसम्पन्नता इति । त.भा. | ७/३४ |
| पापक्षयः | = | ज्ञानावरणादिक्लिष्टकर्मप्रलयः । द्वा. | १८/८ |
| पापजुगुप्सा | = | पापजुगुप्सा तु तथा सम्यक्परिशुद्धचेतसा सततम् ।<br>पापोद्वेगोऽकरणं तदचिन्ता चेत्यनुक्रमतः ॥५॥ षो. | ४/५ |
| पापाः | = | जे पुण गुणेहि हीणा, मिच्छद्दिट्ठी य सव्वपासत्था ।<br>पंथगणाया मुद्धे, सीसे बोलंति ते पावा ॥२०४॥ यति. | २०४ |
| पापाशयकरम् | = | मोक्षपथप्रतिकूलचित्तवृत्तिहेतुः । यो.बिं. | ३७३ |
| पाराञ्चिकप्रायश्चित्तम् | = | पुरिसाविसेसं पप्पा पावविसेसं च विसयभेएण ।<br>पायच्छित्तस्संतं गच्छंतो होइ पारंची ॥१६॥ विं. | १६/१६ |
| पारिणामिकीबुद्धिः | = | अणुमाणहेउदिट्ठंतसाहिया वयविवक्कपरिणामा ।<br>हियनिस्सेसफलवई बुद्धि परिणामिया णाम ॥४८॥ उ.प. | ४८ |
| पारिभाषिकीसंज्ञा | = | नामकरणसंस्काराधीनसंकेतशलिनी संज्ञा । त.उ. | १/३५ |
| पारिव्राज्यम् | = | परिव्राजो भावः, | |
| | * | मस्करित्वं, | |
| | * | गृहस्थभावत्यागः । अ. | १८/८ |
| पुण्योपायाः | = | दया भूतेषु वैराग्यं, विधिदानं यथोचितम् ।<br>विशुद्धा शीलवृत्तिश्च, पुण्योपायाः प्रकीर्तिताः ॥ षो. | ४/१६ |
| पुद्गलपरावर्तः | = | त्रैलोक्यगतपुद्गलानामौदारिकादिप्रकारेण ग्रहणम् । श्रा. | ७२ |
| पुद्गलाः | = | रूपिणः पुद्गलाः, | ५/४ |
| | * | स्पर्शरसगन्धवर्णवन्तः पुद्गलाः । त.भा. | ५/२३ |
| पुरुषकारः | = | कालाइएहिं तप्पायणं तु तह पुरिसगारू त्ति ॥१४॥ विं. | ५/१४ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| पुरुषोत्तमाः | = आकालमेते परार्थव्यसनिनः, उपसर्जनीकृतस्वार्था, उचितक्रियावन्त, अदीनभावाः, सफलारम्भिणः, अदृढानुशयाः, कृतज्ञतापतयः, अनुपहतचित्ताः, देवगुरुबहुमानिनः तथा गम्भीराशया इति । ल.वि. | ७८ |
| पुलाकः | = गतसारो धान्यकणः पुलाकशब्देन भण्यते, निःसारत्वसाधर्म्यात् तेन तुल्यचरणः पुलाक उच्यते । गु. | ४/७ |
| पुष्टभावालम्बनम् | = तीर्थाव्यवच्छित्तिग्रन्थाध्ययनादिः । गु. | १/१२० |
| पुष्टालम्बनम् | = सद्भावकारणम् । द्वा. | १/५ |
| पुष्टालम्बनसेवी | = ज्ञानवैयावृत्त्यादिसमर्थालंबनेनापवादपथप्रवृत्तिमान् । उ.र. | ८४ |
| पुष्टिः | = उपचयः । द्वा. | १०/१० |
| | = पुण्योपचयः । यो.विं. | १ |
| | = पुण्योपचयः, | ३/४ |
| | * प्रवर्द्धमानपुण्ययोगः । षो. | ३/४ |
| पूजनम् | = गन्धमाल्यादिभिः समभ्यर्चनम् । ल.वि. | २६३ |
| | = गन्धमाल्यादिभिरर्चनम् । प्र. | २३ |
| | = भक्तपानवस्त्रपात्रप्रणामादिभिरभ्यर्चनम् । अ. | २४/८ |
| पूजा | = अभ्यर्थनादिरूपा । श्रा. | ३५० |
| पूज्याः | = लोकलोकोत्तरभावानुगता महान्तः । उ.र. | १९६ |
| पूरकः | = अन्तर्वृत्तिश्च प्रश्वासः । द्वा. | २२/१७ |
| | = समाकृष्य यदाऽपानात् पूरणं स तु पूरकः । यो.शा. | ५/७ |
| पूर्तम् | = वापीकूपतडागानि, देवतायतनानि च । अन्नप्रदानमेतत्तु, पूर्तं तत्त्वविदो विदुः ॥११७॥ यो.दृ. | ११७ |
| | = वापीकूपतडागानि देवतायतनानि च । अन्नप्रदानमित्येतत्पूर्तमित्यभिधीयते ॥५८८॥ शा.वा. | ५८८ |
| पूर्वसेवा | = योगप्रासादप्रथमभूमिकारूपा । यो.बिं. | १०९ |
| | = योगप्रासादप्रथमभूमिकोचिताचाररूपा । ध.प. | १२ |
| | = योगाद्यर्थं यमनियमाराधनरूपा । यो.बिं. | ९७ |
| पृथक्त्वम् | = द्विप्रभृतिरा नवभ्यः श्रा. | ३०२ |
| पोष्यवर्गः | = मातापितादिपोषणीयलोकः । यो.बिं. | १२१ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| पौरुषघ्नी भिक्षा | = | दीक्षाया विरोधिनी-दीक्षावरणकर्मबन्धनकारिणी भिक्षा । द्वा. | ६/११ |
| | = | प्रवज्यां प्रतिपन्नो यस्तद्विरोधेन वर्तते । असदारम्भिणस्तस्य, पौरुषघ्नीति कीर्तिता ॥ अ. | ५/४ |
| पौषधः | = | पोषं-पुष्टिं प्रक्रमाद्धर्मस्य धत्ते-करोतीति परौषधः-पर्वदिनानुष्ठानम् । पं. | १/२९ |
| | = | पौषधः पर्वेत्यनर्थान्तरम् । त.भा. | ७/१६ |
| | = | श्राद्धानां पर्वदिनानुष्ठानम् । प्र. | ७० |
| | = | पर्वदिनानुष्ठेयमुपवासादिः । पं. | १०/३ |
| | = | पोषयति-पुष्णाति कुशलधर्मान्-शुभसमाचारान् प्राणातिपातविरमणादीन् यस्मात् तत् आहारादित्यागानुष्ठानम् भोजनदेहसत्काराब्रह्मव्यापारपरिहारकरणम् । पं. | १०/१४ |
| पौषधप्रतिमा | = | पोसहकिरियाकरणं पव्वेसु तहा तहा सुपरिसुद्धं । जइभावभावसाहगमणघं तह पोसहप्पडिमा ॥७॥ विं. | १०/७ |
| प्रकटः | = | अनुभवसिद्धः । यो.श. | ४८ |
| प्रकृतिः | = | सत्त्वरजस्तमसां साम्यावस्था । यो.बिं. | २८ |
| | = | स्वभावलक्षणा । यो.बिं. | १८४ |
| प्रज्ञा | = | अविसंवादिनी बुद्धिः । द्वा. | २२/९ |
| | = | बहुबहुविधादिगहनविषयावबोधशक्तिः । ल.वि. | ३७० |
| प्रज्ञापना | = | आगमार्थोपदेशनम् । अ. | २२/१ |
| | = | सामान्यस्य भेदानां प्ररूपणा । गु. | ४/६ |
| प्रज्ञापनाप्रियः | = | गुणवत्पुरुषप्रज्ञापनाप्रीतिमान् । यो.बिं. | ३५३ |
| प्रज्ञापनीभाषा | = | श्रद्धातिशयजनकफलज्ञापनमात्रपरा भाषा । उ.र. | ३६ |
| प्रज्ञापनीयः | = | कथञ्चिदनाभोगादन्यथाप्रवृत्तिवापि तथाविधगीतार्थेन सम्बोधयितुं शक्यः । उ.प. | १९९ |
| | = | कथञ्चिदनाभोगादन्यथाप्रवृत्तौ तथाविधगीतार्थेन सम्बोधयितुं शक्यत्वात्तथाविधकर्मक्षयोपशमादविद्यमानाऽसदभिनिवेशः । उ.र. | १० |
| | = | कथञ्चिदनाभोगादन्यथाप्रवृत्तौ तथाविधगीतार्थेन सम्बोधयितुं शक्यस्तथाविधकर्मक्षयोपशमादविद्यमानासदभिनिवेशः प्राप्तव्यमहानिधितद्ग्रहणान्यथाप्रवृत्तसुकरसम्बोधननरवत् । पं. | ३/६ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | = | कुतोऽप्यनाभोगात् सामाचारीतः स्खलनेऽपि संविग्नैर्गीतार्थैश्च प्रज्ञापयितुं शक्यः । उ.र. | ९१ |
| प्रणम्य | = | प्रकर्षेण भक्तिश्रद्धाऽतिशयलक्षणेन नत्वा । ध.प. | १ |
| | = | प्रकर्षेण मनोवाक्काययोगैर्नत्वेत्यर्थः । ध्या. | १ |
| प्रणिधानम् (पूर्व) | = | क्रियमाणस्तवोपयोगरूपम् । कू. | १३ |
| प्रणिधानम् (प्रान्तं) | = | स्तवफलप्रार्थनारूपम् । कू. | १३ |
| प्रणिधानम् | = | दृढाध्यवसानलक्षणम् । ध्या. | १९ |
| | = | प्रणिधानं क्रियानिष्ठमधोवृत्तिकृपानुगम् ।<br>परोपकारसारं च चित्तं पापविवर्जितम् ॥१॥ द्वा. | १०/११ |
| | = | प्रणिधानं तत्समये स्थितिमत्तदधः कृपानुगं चैव ।<br>निरवद्यवस्तुविषयं परार्थनिष्पत्तिसारं च ॥ षो. | ३/७ |
| | = | प्रशस्तावधानम् । द्वा. | २२/१२ |
| | = | प्रार्थनागर्भमैकाग्र्यम् । पं. | ४/२९ |
| | = | शुभार्थप्रार्थनारूपं विशिष्टचित्तैकाग्रतागर्भम् । पं. | ३/१७ |
| प्रणिधानादयः | = | क्रियाशुद्धिहेतवः । द्वा. | १०/९ |
| प्रतिक्रमणप्रायश्चित्तम् | = | सहस च्चिय अस्समियाइ भावगमणे य चरणपरिणामा ।<br>मिच्छादुक्कडदाणा तग्गमणं पुण पडिक्कमणं ॥८॥ विं. | १६/८ |
| प्रतिक्रमणम् | = | प्रतिक्रमणं मिथ्यादुष्कृतसंप्रयुक्तं प्रत्यवमर्शः प्रत्याख्यानं कायोत्सर्गकरणं च । त.भा. | ९/२२ |
| | = | स्वस्थानाद् यत्परं स्थानं, प्रमादस्य वशाद् गतः ।<br>भूयोऽप्यागमनं तत्र, प्रतिक्रमणमुच्यते ॥ यो.बिं. | ३९७ |
| | = | शुभयोगेभ्योऽशुभयोगान्तरं क्रान्तस्य शुभेष्वेव क्रमणात् प्रतीपं क्रमणम्, यदाह –<br>* 'स्वस्थानाद् यत परस्थानं प्रमादस्य वशाद् गतः ।<br>तत्रैव क्रमणं भूयः प्रतिक्रमणमुच्यते ॥'<br>* प्रतिकूलं वा गमनं प्रतिक्रमणम्, यदाह–<br>'क्षायोपशमिकाद् भावादौदयिकवशं गतः ।<br>तत्रापि च स एवार्थः प्रतिकूलगमनात् स्मृतः ॥'<br>* प्रति प्रति क्रमणं वा प्रतिक्रमणम्, उक्तं च–<br>निःशल्यस्य यतेर्यत् तद् वा ज्ञेयं प्रतिक्रमणम् ॥' यो.शा. | ३/१२९ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| प्रतिक्रमणाध्ययनम् | = असंयमस्थानं प्राप्तस्य यतेस्तस्मात् प्रतिनिवर्तनं यत्र वर्ण्यते तद् । त.उ. | १/२० |
| प्रतिपत्तिः | = अविकलाप्तोपदेशपालनम् । ल.वि. | ४३ |
| प्रतिपृच्छासा. | = एकशो निषेधे प्रयोजनवशाद् गुरोः प्रतिप्रच्छन्नम् । सा. | ४ |
| | = तान् प्रति पुनरपि पृच्छा-प्राग्नियुक्तेन कार्यकरणकाले प्राग्निषिद्धेन वा पुनः प्रयोजनतः कर्तुकामेन गुरोः प्रच्छनम् । पं. | १२/२ |
| | = खलणाइ पवित्तीए तिक्खुत्तो अहव विहिपओगे वि ।<br>पुव्वणिसिद्धे अण्णे पडिपुच्छमुवट्ठिए बिंति ॥५२॥ सा. | ५२ |
| | = पुच्छा किर पडिपुच्छा, गुरुपुव्वणिवेइयस्स अट्ठस्स ।<br>कज्जंतराइजाणणहेउं धीराण किइसमए ॥५१॥ सा. | ५१ |
| प्रतिभा | = निमित्तानपेक्षं मनोमात्रजन्यमविसंवादकं झगित्युपद्यमानं ज्ञानं प्रतिभा । द्वा. | २६/१० |
| प्रतिमाः | = चैत्यानि ताश्चोद्ध्र्वतिर्यगधोकव्यवस्थिताः शाश्वताशाश्वतजिनभवनप्रतिष्ठितास्तीर्थकृन्मूर्त्तयः । स्र.स. | १८ |
| प्रतिमाप्रतिमा | = पव्वेसु चेव राइं असिणाणाइकिरियासमाजुत्तो ।<br>मासपणगावहि तहा पडिमाकरणं तु तप्पडिमा ॥८॥ विं. | १०/८ |
| | * असिणाण वियडभोई मउलियडो रत्तिबंभमाणेण ।<br>पडिवक्खमंतजावाइसंगओ चेव सा किरिया ॥९॥ | १०/९ |
| प्रतिवादाः | = परोपन्यस्तपक्षप्रतिवचनरूपाः । द्वा. | २३/५ |
| प्रतिश्रोतवृत्तिः | = इन्द्रियकषायप्रतिकूला वृत्तिः । द्वा. | १४/१५ |
| प्रतिषिद्धः | = विपरीतफलत्वेनोपदिष्टः । षो. | ७/४ |
| प्रतिसेवकनिर्ग्रन्थः | = यावन्मूलगुणप्रतिसेवना तावद् । गु. | १/९२ |
| प्रतिसेवना | = सञ्ज्वलनोदयवशेन प्रतिकूला यथास्थिताचारविपरीता सेवा । गु. | ४/५४ |
| प्रतिस्रोतः | = इन्द्रियकषायप्रतिकूला वृत्तिः । यो.बिं. | २०२ |
| | = अनुस्रोतप्रतीपतया प्रतिस्रोतः । उ.प. | २५२ |
| प्रतीतिः | = अनुभवः । शा.वा. | १२५ |
| प्रत्यपायाः | = उन्मादरोगधर्मभ्रंसलक्षणा अनर्थाः । पं. | ३/४३ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| प्रत्यभिज्ञानम् | = | अनुभवस्मृतिहेतुकं तिर्यगूर्ध्वतासामान्यविषयं प्रसिद्धम् । त.उ. | १/१३ |
| | = | सोऽयमित्येवंरूप: प्रत्यवमर्श: । अ. | १६/६ |
| प्रत्यय: | = | प्रतीयते भाव्यर्थोऽस्मादिति । यो.बिं. | २३१ |
| प्रत्याख्यानपरिज्ञा | = | तद्गर्भक्रियारूपा । पञ्च. | ४ |
| प्रत्याख्यानम् | = | प्रति प्रवृत्तिप्रातिकूल्येन, आ मर्यादया, ख्यानं कथनम्, प्रत्याख्यानम्, | |
| | * | निषेधेन विधिना वा प्रतिज्ञा । अ. | ८/१ |
| | = | प्रति-प्रवृत्तिप्रतिकूलतया आ-मर्यादया ख्यानं-प्रकथनम् प्रत्याख्यानम् । पं. | ५/२ |
| | = | रागेण व दोसेण व परिणामेण व न हीलियं जं तु । तं खलु भावविसुद्धं पच्चक्खाणं मुणेयव्वं ॥ पं. | ५/५ |
| प्रत्याख्यानाध्ययनम् | = | मूलोत्तरगुणधारणीयता यत्र ख्याप्यते तत् । त.उ. | १/२० |
| प्रत्याख्यापक: | = | किइकम्माइविहिण्णू उवओगपरो च असढभावो य । संविग्गथिरपइण्णो पच्चक्खावितओ होइ ॥ पं. | ५/५ |
| प्रत्याहार: | = | स्थानात् स्थानान्तरोत्कर्ष: प्रत्याहार: प्रकीर्त्यते । यो.शा. | ५/८ |
| प्रत्येकबुद्ध: | = | बाह्यवृषभादिदर्शनसापेक्षदीक्षालाभ: । उ.प. | ४१९ |
| प्रधानकार्यम् | = | विशिष्टफलदायिनं प्रयोजनम् । यो.बिं. | १२९ |
| प्रधानद्रव्याज्ञा | = | क्रियायां विधिशुद्धोपयोगयोगादेव । उ.र. | ३८ |
| प्रभादृष्टि: | = | ध्यानप्रिया प्रभा प्रायो नास्यां रूगत एव हि । तत्त्वप्रतिपत्तियुता विशेषेण शमान्विता ॥१७०॥ यो.दृ. | १७० |
| प्रभावका: | = | पावयणी धम्मकही वादी नेमित्तओ तवस्सी य । विज्जा सिद्धो य कवी, अठेव पभावगा भणिया ॥ अ. | |
| | * | श्रावकस्तु कार्पण्यपरिहारतो विधिमता जिनबिम्बस्थापनयात्राकरणेन शासनप्रभावक: । अ. | २३/३ |
| प्रभावनम् | = | प्रावचनिकत्वादिप्रकारैर्जिनप्रवचनप्रकाशनापादनम् । पं. | १५/२४ |
| | = | तैस्तैर्धर्म्मकृत्यैरर्हन्मतोन्नतिकरणम् । स.स. | ४० |
| प्रमाणम् | = | अविसंवादिज्ञानम् । द्वा. | ८/१२ |
| | = | जं सव्वहा न सुत्ते पडिसिद्धं नेव जीववहहेऊ । तं सव्वंपि पमाणं, चारित्तधणाण भणिअं च ॥१०॥ यति. | १० |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | = | प्रमीयते ज्ञेयमेभिरिति । ध्या. | ४७ |
| | = | प्रवृत्तिनिवृत्तिहेतुः । यो.बिं. | ४४१ |
| | = | माध्यस्थ्यसहितं ह्येकपदज्ञानमपि प्रमा । अ.उ. | १/७३ |
| प्रमाणसञ्ज्ञा | = | अन्योन्यं-परस्परं मिलितानाम्-अर्पणानर्पणाभ्यां संभूय साकल्येन सप्तभङ्गोपस्थापकतया संबद्धानां नयानां प्रमाणसञ्ज्ञा, सप्तभङ्गपरिकरितपरिपूर्णार्थ-बोधकतापर्याप्तिमद्वाक्यस्यैव प्रमाणवाक्यत्वात् । गु. | १/५५ |
| प्रमादः | = | अज्ञानसंशयमिथ्याज्ञानादिरष्टप्रकारः । उ.र. | १९७ |
| | = | स्मृत्यनवस्थानं कुशलेष्वनादरः योगदुष्प्रणिधानं चेत्येष प्रमादः । त.भा. | ८/१ |
| प्रमोद (मुदिता) | = | सुखमात्रे सद्धेतावनुबन्धयुते परे च चतुर्विधा । षो. | १३/१० |
| | = | परसुखतुष्टिः । षो. | ४/१५ |
| | = | अपास्ताशेषदोषाणां वस्तुतत्त्वावलोकिनाम् ।<br>गुणेषु पक्षपातो यः स प्रमोदः प्रकीर्त्तितः ॥११९॥ यो.शा. | ४/११९ |
| | = | प्रमोदो नाम विनयप्रयोगः । वन्दनस्तुतिवर्णवादवैयावृत्त्यकरणादिभिः सम्यक्त्वज्ञानचारित्रतपोऽधिकेषु साधुषु परात्मोभयकृतपूजाजनितः सर्वेन्द्रियाभिव्यक्तो मनःप्रहर्ष इति । त.भा. | ७/६ |
| | = | बहुमानाशयलक्षणम् । यो.श. | ७९ |
| प्रयासः | = | प्रवृत्त्युत्कर्षः । यो.दृ. | ९८ |
| प्रवचनम् | = | प्रकर्षेण नामादिभिर्नयप्रमाणनिर्देशादिभिश्च जीवादयोऽर्था उच्यन्तेऽनेन तत् । त.उ. | १/२० |
| प्रवचनवत्सलत्वम् | = | अर्हच्छासनानुष्ठायिनां श्रुतधराणां बालवृद्धतपस्विशैक्षक-ग्लानादीनां च सङ्ग्रहोपग्रहानुग्रहकारित्वम् । त.भा. | ६/२३ |
| प्रवचनी | = | प्रवचनं द्वादशाङ्गं गणिपिटकम्, तदस्यास्त्यतिशयवदिति प्रवचनी युगप्रधानागमः । यो.शा. | २/१६ |
| प्रवर्तकः | = | प्रवर्तयिता परलोकक्रियासु । यो.बिं. | २२४ |
| प्रवर्तिनी | = | गीतार्था कृतकरणा कुलजा परिणामिनी च गम्भीरा ।<br>चिरदीक्षिता च वृद्धा प्रवर्तिनी संयती भणिता ॥२५५॥ मार्ग. | २५५ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| | = गीअत्था कयकरणा, कुलजा परिणामिआ य गंभीरा ।<br>चिरदिक्खिआ य वुड्ढा, अज्जावि पवित्तिणी भणिआ ॥१३१७॥<br>पं.व. | १३१७ |
| प्रवृत्तः | = तृतीयवारं प्रकटीभूतः । गु. | २/३२ |
| प्रवृत्तचक्रयोगिनः | = प्रवृत्तचक्रास्तु पुनर्यमद्वयसमाश्रयाः ।<br>शेषद्वयार्थिनोऽत्यन्तं शुश्रूषादिगुणान्विताः ॥२१२॥ यो.दृ. | २१२ |
| | = प्रवृत्तचक्रास्तु पुनर्यमद्वयसमाश्रयाः ।<br>शेषद्वयार्थिनोऽत्यन्तं शुश्रूषादिगुणान्विताः ॥२३॥ द्वा. | १९/२३ |
| प्रवृत्तिः(प्रवृत्तियोगः) | = अधिकृतधर्मस्थानोद्देशेन तदुपायविषय इतिकर्तव्यताशुद्धः शीघ्रक्रियासमाप्तीच्छादिलक्षणौत्सुक्यविरहितः प्रयत्नातिशयः ।<br>यो.विं. | १ |
| | = चिकीर्षितकार्यव्यापारः । सा. | ५२ |
| | = तत्रैव तु प्रवृत्तिः शुभसारोपायसङ्गतात्यन्तम् ।<br>अधिकृतयत्नातिशयादौत्सुक्यविवर्जिता चैव । षो. | ३/८ |
| | = प्रवृत्तिः प्रकृतस्थाने यत्नातिशयसंभवा ।<br>अन्याभिलाषरहिता चेतःपरिणतिः स्थिरा ॥१२॥ द्वा. | १०/१२ |
| | = सद्धर्मव्यापारेषु प्रवर्तनम् । पं. | ४/२९ |
| | = सर्वत्र शमसारं तु यमपालनमेव यत् ।<br>प्रवृत्तिरिह विज्ञेया द्वितीयो यम एव तत् ॥२१६॥ यो.दृ. | २१६ |
| | = सव्वत्थुवसमसारं तत्पालणमो पवत्ती उ ॥५॥ विं. | १७/५ |
| | = सव्वत्थुवसमसारं तप्पालणमो पवत्ती उ । यो.विं. | ५ |
| प्रवृत्तियमः | = स प्रवृत्तियमो यत्तत्पालनं शमसंयुतम् ॥२६॥ द्वा. | १९/२६ |
| प्रव्रज्या | = पव्वयणं पव्वज्जा, पावाओ सुद्धचरणजोगेसु ।<br>इअ मुक्खं पइ वयणं, कारणकज्जोवयाराओ ॥५॥ पं.वं. | ५ |
| | = भवान्तरकृतानां पापानां प्रायश्चित्तम् । पं. | १६/४८ |
| प्रव्रज्यार्हः | = अथ प्रव्रज्यार्हः आर्यदेशोत्पन्नः १, विशिष्टजाति-<br>कुलान्वितः २, क्षीणप्रायकर्ममलः ३, तत एव<br>विमलबुद्धिः ४, 'दुर्लभं मानुष्यम्, जन्म<br>मरणनिमित्तम्, सम्पदश्चपलाः, विषया दुःखहेतवः,<br>संयोगे वियोगः, प्रतिक्षणं मरणम्, दारुणो विपाकः' | |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | | इत्यवगतसंसारनैर्गुण्यः ५, तत एव तद्विरक्तः ६, प्रतनुकषायः ७, अल्पहास्यादिः ८, कृतज्ञः ९, विनीतः १०, प्रागपि राजाऽमात्य-पौरजन बहुमतः ११, अद्रोहकारी १२, कल्याणाङ्गः १३, श्राद्धः १४, स्थिरः १५, समुपसम्पन्न १६ श्चेति ॥ ध. | २२९ |
| प्रशंसा | = | गुणकित्तणं । स.स. | ३० |
| | = | ज्ञानदर्शनगुणप्रकर्षोद्भावनं भावतः प्रशंसा । त.भा. | ७/१८ |
| प्रशमः | = | क्रोधकण्डूविषयतृष्णोपशमः । यो.विं. | ८ |
| | = | रागद्वेषमन्दतालक्षणः । उ.र. | ८ |
| | = | सुपरीक्षितप्रवक्तृप्रवाच्यप्रवचनतत्त्वाभिनिवेशाद्दोषाणामुपशमः, | |
| | * | इन्द्रियार्थपरिभोगनिवृत्तिर्वा । त.उ. | १/२ |
| | = | पयईय व कम्माणं वियाणिउं वा विवागमसुहं ति । अवरद्धे वि न कुप्पइ उवसमओ सव्वकालं पि ॥१०॥ विं. | ६/१० |
| प्रशस्तरागः | = | स्वर्गहेतुः । गु. | १/९८ |
| प्रश्नः | = | शङ्किते सूत्रादौ संशयापनोदाय गुरुप्रच्छनं प्रश्नः । ध्या. | ४२ |
| प्रश्नव्याकरणम् | = | प्रश्नितस्य जीवादेर्यत्र प्रतिवचनं भगवता दत्तं तत् । त.उ. | १/२० |
| प्रश्वासः | = | कोष्ठ्यस्य वायोर्निःश्वासनं प्रश्वासः । यो.शा. | ५/४ |
| प्रसङ्गः | = | प्ररूपणीयमध्ये स्मृतार्थविस्तारणम् । यो.विं. | १७ |
| प्राज्ञः | = | बहुबहुविधादिग्राहकबुद्धिमान् । उ.प. | ८५२ |
| | = | बहुबहुविधादिग्राहकबुद्धिमान् । उ.र. | १५० |
| | = | युक्तायुक्तविभागज्ञः पुमान् । यो.बिं. | ७० |
| प्राणायामः | = | प्राणस्य मुखनासान्तरसंचारिणो वायोः आ समन्तात् यमनं गतिविच्छेदः प्राणायामः । | ५/१ |
| | * | प्राणायामो गतिच्छेदः श्वास-प्रश्वासयोर्मतः । यो.शा. | ५/४ |
| प्रातिभज्ञानम् | = | प्रतिभैव प्रातिभमदृष्टार्थविषयो मतिज्ञानविशेषः । षो. | १५/६ |
| | = | मार्गानुसारिप्रकृष्टोहाख्यज्ञानम् । यो.दृ. | ८ |
| | = | सहजप्रतिभाप्रभवम् । यो.बिं. | ५२ |
| प्राभृतज्ञः | = | व्याकरणोत्पत्तिमूलशब्दप्राभृतनिष्णातो गुरुः । त.उ. | १/५ |
| प्रावचनिकः | = | कालोचियसुत्तधरो, पावयणी तित्थवाहगो सूरी । स.स. | ३३ |
| प्रीतिः | = | तत्करणादौ हर्षः । यो.विं. | ७ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| प्रीत्यनुष्ठानम् | = | यत्रादरोऽस्ति परमः प्रीतिश्च हितोदया भवति कर्तुः ।<br>शेषत्यागेन करोति यच्च तत्प्रीत्यनुष्ठानम् ॥३॥ षो. | १०/३ |
| | = | यत्रानुष्ठाने प्रयत्नातिशयोऽस्ति परमा च प्रीतिरुत्पद्यते<br>शेषत्यागेन च यत्क्रियते तत् । यो.विं. | १८ |
| प्रेतः | = | अधमा व्यन्तराः । यो.शा. | ३/४८ |
| प्रेमः | = | प्रियेषु प्रीतिहेतुः । गु. | ४/२ |
| प्रेष्यः | = | बलाद्विनियोज्यः । श्रा. | ३२० |
| प्रैषप्रतिमा | = | तेहिं पि न कारेई नवमासे जाव पेसपडिम त्ति ।<br>पुव्वोइया उ किरिया सव्वा एयस्स सविसेसा ॥१५॥ विं. | १०/१५ |
| | | **[ फ ]** | |
| फलावञ्चकयोगः | = | फलावञ्चकयोगस्तु सद्भ्य एव नियोगतः ।<br>सानुबन्धफलावाप्तिर्धर्मसिद्धौ सतां मता ॥२२१॥ यो.दृ. | २२१ |
| | = | फलावञ्चकयोगस्तु सद्भ्य एव नियोगतः ।<br>सानुबन्धफलावाप्तिर्धर्मसिद्धौ सतां मता ॥३१॥ द्वा. | १९/३१ |
| | | **[ ब ]** | |
| बकुशः | = | यस्यातिचारपङ्कतः 'बकुशं' शबलं कर्बुरमित्यनर्थान्तरं<br>चारित्रं स बकुश उच्यते । गु. | ४/१३ |
| | = | यावन्मूलगुणप्रतिसेवना तावद् । गु. | १/९२ |
| बन्धः | = | अभिनवकर्मग्रहणम्, अभिनवपदेन संक्रमव्यवच्छेदः । त.उ. | १/४ |
| बन्धः | = | नामैकक्षेत्रावस्थितानां कर्मयोग्यस्कन्धानां<br>रागद्वेषस्नेहावलीढसकलात्मप्रदेशेष्वाहारपुद्गलानामिव<br>परिणामकः सम्बन्धः । त.उ. | १/३ |
| बलम् | = | शारीरम् शक्तिविशेषः अथवा सामर्थ्यम् । सा. | ११ |
| बलवीर्ये | = | बलं हि शारीरम्, वीर्यं चान्तरशक्तिविशेषः । अ.म. | ९६ |
| बलादृष्टिः | = | सुखासनसमायुक्तं, बलायां दर्शनं दृढम् ।<br>परा च तत्त्वशुश्रूषा, न क्षेपो योगगोचरः ॥४९॥ यो.दृ. | ४९ |
| बहिरात्मा | = | आत्मधिया समुपात्तः कायादि कीर्त्यतेऽत्र बहिरात्मा । यो.शा. | १२/७ |
| | = | विषयकषायावेशस्तत्त्वाश्रद्धा गुणेषु च द्वेषः ।<br>आत्माज्ञानं च यदा बाह्यात्मा स्यात्तदा व्यक्तः ॥२२॥<br>अध्या. | २०/२२ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| बहुमानः | = | आराध्यत्वज्ञानलक्षणः । गु. | १/६६ |
| | = | उपादेयत्वज्ञानरूपश्रद्धाजनितः प्रमोदोऽनुमोदनाख्यः, | |
| | * | भावप्रतिबन्धः । उ.र. | २८ |
| | = | चिन्तारत्नकामदुघादिवस्तुभ्योऽपि समधिकोपादेयपरिणामः । उ.प. | १६२ |
| | = | प्रीतिः । पं. | ९/४६ |
| | = | भावप्रतिबन्धः । पं.व. | १५ |
| | = | स्वविषयशक्त्यनिगूहनदृढपक्षपातलक्षणः । गु. | १/४० |
| | = | अन्तरङ्गा प्रीतिः । स.स. | १० |
| | = | आन्तरभावप्रतिबन्धरूपः । द्वा. | २९/८ |
| | = | मनसि निर्भरा प्रीतिर्दर्शनादेव परमानन्दोल्लासः । स.स. | २१ |
| बहुश्रुतः | = | परिपठितबह्वागमः । उ.र. | १५३ |
| बह्वीनिर्जरा | = | स्वातिशयानुविहितातिशया कर्महानिः । सा. | ५७ |
| बालः | = | गीतार्थोपदेशावधारणयोग्यतारहितः । द्वा. | ६/६ |
| | = | निश्चितं असदारंभी निषिद्धकार्यकारी, | १/३ |
| | * | विवेकविकलो धर्मेच्छुरपि लिङ्गं बाह्यं वेषं पश्यति प्राधान्येन । षो. | १/२ |
| | = | बालो रतो लिंगे, लिंगमात्रप्राधान्यापेक्षयाऽसदारंभत्वात् । द्वा. | २/६ |
| | = | हिताहितविवेकशून्यः । यो.दृ. | ३० |
| बालतपस्वित्वम् | = | मिथ्यादृष्टित्वाविनाभावी । ध.प. | १९ |
| बाह्यशौचम् | = | मृज्जलादिभिः कायप्रक्षालनम् । द्वा. | २२/२ |
| बाह्यात्मा | = | आत्मत्वेन गृह्यमाणः कायादिः, | |
| | * | मिथ्यादर्शनादिभावपरिणतो बाह्यात्मा, | |
| | * | आद्यगुणस्थानत्रये बाह्यात्मा । अ.म. | १२५ |
| बुद्धः | = | विशिष्टविवेकसम्पन्नः, | |
| | * | सर्वयत्नेन सर्वादरेणागमतत्त्वं सिद्धान्तपरमार्थं परीक्षते । षो. | १/२ |
| बुद्धिः | = | अतिनिपुणोहापोहरूपप्रज्ञा । उ.प. | ३७ |
| | = | इन्द्रियार्थाश्रया । यो.दृ. | १२१ |
| | = | तथाविधोहरहितं शब्दार्थश्रवणमात्रजं ज्ञानम् । द्वा. | २३/२३ |
| बुद्धिभेदः | = | यथाकथञ्चित् क्रियमाणायामधिकृतक्रियायामनास्थया | |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | | क्षुद्रसत्त्वतया च शुद्धकरणासामर्थ्यात् करणपरिणामविघटनम् । ल.वि. | २५ |
| बुद्धिमान् | = | प्रस्तुतबुद्धिधनः । उ.प. | १६२ |
| | = | युक्तायुक्तविवेचनचतुरशेमुषीपरिगतः । उ.र. | ८५ |
| बुधः | = | युक्त्यागमहृदयज्ञः । अ. | ११/४ |
| बोधः | = | सदसत्प्रवृत्तिनिवृत्तिहेतुर्ज्ञानविशेषः । ल.वि. | ७४ |
| बोधिः | = | जिनप्रणीतधर्मप्राप्तिः । | १५१ |
| बोधिलाभः | = | प्रेत्य जिनधर्मप्राप्तिः । प्र. | २३ |
| | = | सम्यग्दर्शनावाप्तिः । पं. | ७/३६ |
| ब्रह्म | = | उपस्थसंयमः । द्वा. | २१/२ |
| ब्रह्मचर्यम् | = | ब्रह्म-कुशलानुष्ठानम् तत्र चरणीयं चर्यम् । श्रा. | ३२१ |
| | = | मेहुणसन्नाविजएण पंचपरियारणापरिच्चाओ ।<br>बंभे मणवत्तीए जो सो बंभं सुपरिसुद्धं ॥१४॥ विं. | ११/१४ |
| | = | व्रतप्ररिपालनाय ज्ञानाभिवृद्ध्ये कषायपरिपाकाय च गुरुकुलवासः । त.भा. | ९/६ |
| | = | 'ब्रह्म' कुशलं कर्म तदेव चर्यते सेव्यते इति चर्यमिति, | |
| | * | मनोवाक्कायैः कामसेवनवर्जनम् । अ. | ३/६ |
| ब्रह्मव्रतम् | = | दिव्यौदारिककामाणां कृताऽनुमत-कारितैः ।<br>मनोवाक्कायतस्त्यागो ब्रह्माष्टादशधा मतम् ॥२३॥ यो.शा. | १/२३ |
| ब्राह्मीलिपिः | = | अक्षरविन्यासः । प्र. | ३ |
| | | **[ भ ]** | |
| भक्तिः | = | स्वस्य सुपात्रतो भवनिस्तारवांछा । द्वा. | १/२० |
| | = | उचितान्नपानादिसम्पादनपादधावनग्लानावस्थाप्रति-जागरणादिरूपा । उ.प. | १६२ |
| | = | उचितोपचाररूपा । द्वा. | २९/८ |
| | = | बाह्यविनयरूपा । पं.व. | १५ |
| | = | बाह्या प्रतिपत्तिः - सम्मुखगमनासनदाननमस्करणसेवाकरणानुगमनादिका । स.स. | २१ |
| | = | विनय-वैयावृत्त्यरूपा प्रतिपत्तिः । यो.शा. | २/१६ |
| | = | वैयावृत्त्यादिप्रतिपत्तिरूपा । उ.र. | २३ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| | = सेवा बहुमानश्च । अ. | ३/६ |
| भक्त्यनुष्ठानम् | = एतत्तुल्यमप्यालम्बनीयस्य पूज्यत्वविशेषबुद्ध्या विशुद्धतरव्यापारम् । यो.विं. | १८ |
| | = गौरवविशेषयोगाद्बुद्धिमतो यद्विशुद्धतरयोगम् । क्रिययेतरतुल्यमपि ज्ञेयं तद् भक्त्यनुष्ठानम् ॥४॥ षो. | १०/४ |
| भगवद्बहुमानः | = भवाभिनन्दिदोषप्रतिपक्षमोक्षाशयभावस्य तत्त्वतो भगवद् बहुमानरूपत्वात् । ध.प. | ३५ |
| भगवद्भक्तिः | = उपदेशपालनैव नान्या, कृतकृत्यत्वादिति । ध. | ४१२ |
| भगवन्तः | = भगः समग्रैश्वर्यादिलक्षणः, स विद्यते येषां ते भगवन्तः । पञ्च. | १ |
| | = अनुत्तरज्ञानशाली । त.उ. का. | १/२२ |
| भद्रकः | = निरुपमकल्याणमूर्त्तिः । द्वा. | २०/३२ |
| भद्रमूर्तिः | = प्रियदर्शनः । यो.दृ. | ३३ |
| भवः | = भव एव महाव्याधिर्जन्ममृत्युविकारवान् । विचित्रमोहजननस्तीव्ररागादिवेदनः ॥१८८॥ यो.दृ. | १८८ |
| | = भवन्ति अस्मिन् कर्मवशवर्तिनः प्राणिन इति । श्रा. | ४८ |
| भवबालकालः | = अचरिमपरियट्टेसुं कालो भवबालकालमो भणिओ । विं. | ४/१९ |
| भवरागाभाववान् | = नैव उत्कटेच्छा विषयीकरोति संसारम्, तत्र सुखस्य दुःखानुबन्धित्वेनाऽनिष्टत्वप्रतिसन्धानात् । उ.र. | २२ |
| भवरूपचिन्तनम् | = संसारस्वभावालोचनं तद् यथा-असारं जन्म, आश्रयो जरादीनाम्, व्याप्त दुःखगणेन, चला विभूतयः, अनवस्थिताः स्नेहाः दारुणं विषय-विषम्, रौद्रः पापकर्मविपाकः, पीडाकरोऽनुबन्धेन, मिथ्याविकल्पं सुखम्, सदा प्रवृत्तो मृत्युरिति, न धर्माद् ऋतेऽत्र किञ्चित् कर्तुं न्याय्यम् इत्येवमादि । यो.श. | ४५ |
| भवानुबन्धिः | = संवेगशून्यं महर्द्धिभोगगृद्धावध्यवसानम् । पञ्च. | १ |
| भवाभिनन्दी | = असारोऽप्येष संसारः सारवानिव लक्ष्यन्ते दधिदुग्धांबुतांबूलपण्यपण्यांगनादिभिः, इत्यादिवचनैः संसाराभिनन्दनशीलः । द्वा. | १०/५ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | = | क्षुद्रो लोभरतिर्दीनो मत्सरी भयवान् शठः ।<br>अज्ञो भवाभिनंदी स्यान्निष्फलारम्भसङ्गतः ॥६॥ अध्या. | २/६ |
| | = | क्षुद्रो लोभरतिर्दीनो मत्सरी भयवान् शठः ।<br>अज्ञो भवाभिनन्दी स्यान्निष्फलारंभसंगतः ॥५॥ द्वा. | १०/५ |
| | = | संसाराभिनन्दनशीलः । यो.बिं. | ८७ |
| | = | क्षुद्रो लाभरतिर्दीनो, मत्सरी भयवान् शठः ।<br>अज्ञो भवाभिनन्दी स्यान्निष्फलारम्भसङ्गतः ॥७६॥ | ७६ |
| | * | संसारबहुमानी । यो.दृ. | ७६ |
| भवाभिष्वङ्गः | = | इहामुत्र फलापेक्षा भवाभिष्वङ्ग उच्यते ॥१०॥ द्वा. | १३/१० |
| | = | अत्यन्तदृढसांसारिकफलवन्ध्यम् । यो.बिं. | ९७ |
| भव्यः | = | निर्वाणार्हजीवः । यो.बिं. | २६५ |
| भव्यत्वम् | = | सिद्धिगमनयोग्यत्वम् । पञ्च. | ५ |
| | = | सिद्धिगमनयोग्यत्वम्, अनादिपारिणामिको भावः । ल.वि. | १०३ |
| भव्यसत्त्वाः | = | मोक्षगमनयोग्याः अपुनर्बन्धकादिजन्तवः । यो.विं. | ७ |
| भव्याः | = | भगवद्बहुमानितयासन्नसिद्धिकाः । उ.र. | १ |
| | = | सिद्धिगमनयोग्याः, अनादिपारिणामिकभव्यभावयोगाद् । श्रा. | ६६ |
| | = | सेत्स्यन्तः । त.उ. | १/३२ |
| भावः | = | चित्तपरिणामलक्षणः । श्रा. | २१५ |
| | = | चित्तप्रणिधानरूपः । अ.म. | ६९ |
| | = | परमार्थः । यो.बिं. | १६ |
| | = | भवनं भावः परिणामः, | २/१ |
| | * | शुभध्यानलक्षणं कारणभूतम्, | २/१ |
| | * | उपयोगभावात्मकजीवलक्षणम्, | २/१ |
| | * | औदायिकभावकारणभूतकर्ममललक्षणम्, | २/१ |
| | * | परमार्थः, | २/१ |
| | * | अध्यवसायः । अ. | २/१ |
| | = | शुद्धपरिणामः । द्वा. | ७/३१ |
| | = | शुद्धरूपः परिणामम् । यो.बिं. | ३४९ |
| भावक्रिया | = | निर्वाणसाधिका । पञ्च. | ४ |
| भावचैत्यवन्दनम् | = | अमृतानुष्ठानरूपम् । यो.विं. | ११ |

... सूरि ज्ञान भंडार<br>... सूरि म.सा.<br>... पाछीयानी पोळ,<br>अमदावाद-३८० ००१.

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| भावजैनत्वम् | = | येषां तु माध्यस्थ्यावदातबुद्धीनां विप्रतिपत्तिविषयप्रकारांशे नाग्रहस्तेषां मुख्यसर्वज्ञाभ्युपगन्तृत्वाद् भावजैनत्वं स्याद् । ध.प. | १४ |
| भावज्ञानम् | = | उपयोगपरिणतिविशेषावस्था । त.उ. | १/५ |
| भावद्रव्याणि | = | भाव्यन्ते-स्वप्रतियोगिना स्वगुणैरात्मभावमापद्यन्त इति, | |
| | * | प्रतियोगिनि सति तद्गुणापेक्षया तथाभवनशीलानि भावुकानि, तद्विपरीतान्यभाव्यानि । गु. | ३/१२८ |
| भावना (पूजा) | = | भगवत्पूजादर्शनाद् बहवो जीवा सम्यग्दर्शननैर्मल्यमासाद्य चारित्रप्राप्त्या सिद्धिसौधमध्यासतामिति भावना । प्र. | २६ |
| भावना | = | अध्यात्मस्यैव प्रतिदिनं प्रवर्धमानश्चित्तवृत्तिनिरोधयुक्तोऽभ्यासः । यो.विं. | ३ |
| | = | अभ्यासः । द्वा. | २४/१५ |
| | = | अभ्यासो वृद्धिमानस्य भावना बुद्धिसंगतः । द्वा. | १८/९ |
| | = | अभ्यासोऽस्यैव विज्ञेयः प्रत्यहं वृद्धिसङ्गतः । मनःसमाधिसंयुक्तः, पौनःपुन्येन भावना ॥ यो.बिं. | ३६० |
| | = | रागादिप्रतिपक्षभावनम् । यो.श. | ५२ |
| भावनाज्ञानम् | = | ऐदम्पर्यगतं यच्च, विध्यादौ यत्नवच्च यत् । तृतीयं तदशुद्धोच्च-जात्यरत्नविभानिभम् ॥६७॥ अ.उ. | १/६७ |
| | = | भगवदाज्ञाप्राधान्यद्योतकं तात्पर्यवृत्तितो जायमानं ज्ञानम् । द्वा. | २/१३ |
| | = | हेतुस्वरूपफलभेदेन कालत्रयविषयम्, | १०/१२ |
| | * | अमृतरसास्वादकल्पम्, | १०/१३ |
| | * | हितकरणं फलम्, | ११/६ |
| | * | ऐदम्पर्यगतं यद्विध्यादौ यत्नवत्तथैवोच्चैः । एतत्तु भावनामयशुद्धसद्रत्नदीप्तिसमम् ॥९॥ षो. | ११/९ |
| भावनामार्गः | = | स बन्धुः परमध्यानस्य, स योग एव, अनुष्ठेयश्चायं श्रावकेण, असारो जीवलोक इन्द्रजालतुल्यः, विषयकल्पा विषयाः, वज्रसारं दुःखम्, चलाः प्रियसङ्गमाः, अस्थिरा सम्पत्, दारुणः प्रमादः, महादौर्गत्यहेतुः, दुर्लभं मानुष्यं महाधर्मसाधनम्, इति अलं सामान्येन, करोम्यत्र यत्नम्, न | |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | | युक्तात्रोपेक्षा, प्रभवति मृत्युः, दुर्लभं दर्शनं सद्गुरुयोगश्च इति प्रशस्तभावगतेन । यो.श. | ३१ |
| भावनाविधिः | = | अनित्यत्वादिभावनामार्गः । शा.वा. | ६४१ |
| भावनिर्जरा | = | कर्मपरिशाटः सम्यग्ज्ञानाद्युपदेशानुष्ठानपूर्वकः । त.उ. | १/५ |
| भावपूजा | = | स्तुतिस्तोत्रगीतनृत्यवादित्रादिभेदैरनेकधा । स.स. | १६ |
| भावप्रधानम् | = | परमार्थसारम् । षो. | २/११ |
| भावबन्धः | = | प्रकृत्यादिः । त.उ. | १/५ |
| भावमनः | = | तद्द्रव्योपाधिः संकल्पात्मक आत्मपरिणामः । यो.शा. | ४/३५ |
| भावमलम् | = | तत्तत्पुद्गलादिसम्बन्धयोग्यतालक्षणम् । यो.द्द. | ३० |
| भावमोक्षः | = | समत्कर्मक्षयलाञ्छन इति । त.उ. | १/५ |
| भावयतित्वम् | = | आसयसुद्धीइ तओ, गुरुपरतंतस्स सुद्धलिंगस्स । भावजइत्तं जुत्तं, अज्झप्पज्झाणणिरयस्स ॥२२५॥ यति. | २२५ |
| भावयोग्यत्वम् | = | फलजननयोग्यत्वम् । उ.र. | १७ |
| भावविशुद्धः | = | जं दव्वखेत्तकालाइसंगयं भगवया अणुट्ठाणं । भणियं भावविसुद्धं निप्फज्जइ जह फलं तह उ ॥७७८॥ उ.प. | ७७८ |
| भाववृद्धिः | = | प्रशस्तपरिणामवर्धनमेव पुलकोद्भेदादिचिह्नवद्भक्तिभररूप-भावविशेषः एव । पं. | ३/११ |
| भावशुद्धिः | = | मनसाऽसंक्लिश्यमानता । अ. | २२/१ |
| | = | यमनियमादिना मनसोऽसंक्लिश्यमानता । द्वा. | ६/२६ |
| भावसंवरः | = | गुप्त्यादिपरिणामापन्नो जीवः । त.उ. | १/५ |
| | = | भवहेतुक्रियात्यागः स पुनर्भावसंवरः ॥८०॥ यो.शा. | ४/८० |
| भावसाधुः | = | निर्व्याजयतिः । उ.र. | १२६ |
| भावसारः | = | स्वतो वासितेनान्तःकरणेन संवेगसारः । यो.श. | २९ |
| | = | तत्त्वपरिणतिप्रधानम् । यो.बिं. | १६० |
| | = | शुद्धश्रद्धाप्रधानम् । यो.बिं. | १६० |
| भावस्नानम् | = | ध्यानाम्भसा तु जीवस्य, सदा यच्छुद्धिकारणम् । मलं कर्म समाश्रित्य, भावस्नानं तदुच्यते ॥६॥ अ. | २/६ |
| भावाक्षरम् | = | अन्तःस्फुरदकारादिज्ञानरूपम् । त.उ. | १/२० |
| भावाचार्याः | = | पञ्चविधाचारपालनतदुपदर्शनगुणान्विताः । गु. | १/१३ |
| भावाजीवः | = | गत्याद्युपग्रहकारी धर्मादिः । त.उ. | १/५ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| भावाज्ञा | = | सद्भूताज्ञापरिणामः । उ.प. | २५९ |
| | = | सम्यग्दर्शनादिरूपा । ध.प. | १५ |
| भावाभ्यासः | = | सम्यग्दर्शनादीनां भावानां भवोद्वेगपूर्वमभ्यासश्च भावाभ्यासः । उ.र. | १८६ |
| | = | भवादुद्विग्नस्य सम्यग्दर्शनादीनां भावानामभ्यासः । उ.प. | ९४९ |
| भावाभ्यासानुष्ठानम् | = | दूरं भवादुद्विग्नस्य सम्यग्दर्शनादीनां भावानामभ्यासः । ध.प. | १७ |
| भावार्थः | = | भावः तत्त्वमैदंपर्यं तेन तद्रूपो वा 'अर्थः' अभिधेयो भावार्थः । पं. | १/१ |
| भावाश्रवः | = | आत्मसमवेताः पुद्गला उदिता रागादिपरिणामेन । त.उ. | १/५ |
| भावेन्द्रियाणि | = | स्पर्शादिष्वभिलाषोपायरूपाणि । यो.शा. | ४/३४ |
| भाषासमितिः | = | हितमितासन्दिग्धानवद्यार्थनियतभाषणम् । त.भा. | ९/५ |
| | = | अवद्यत्यागतः सर्वजनीनं मितभाषणम् ।<br>प्रिया वाचंयमानां सा भाषा समितिरुच्यते ॥३७॥ यो.शा. | १/३७ |
| भिक्षा | = | विधिना पिण्डानयनम् । पं.व. | २३० |
| | = | समुदानम् । अ. | ६/३ |
| भिन्नग्रन्थिः | = | अपूर्वकरणवज्रप्रहारविदारितघनरागद्वेषमोहपरिणामः । यो.बिं. | ७२ |
| | = | विदारितातितीव्ररागद्वेषपरिणामः । यो.बिं. | २०३ |
| भेदाः | = | तत्त्वसाक्षाद्व्याप्यधर्मवन्तः, तद्व्याख्यानं न्यूनाधिकसङ्ख्याव्यवच्छेदार्थमुपयुज्यते । गु. | ४/४६ |
| भोगः | = | सकृदेव भुज्यते यः स भोगोऽन्नस्त्रगादिकः । यो.शा. | ३/५ |
| | = | इन्द्रियार्थसुखसम्बन्धः । द्वा. | २४/५ |
| | = | भोगान्तरायकर्मक्षयोपशमसध्रीचीनसातवेदनीयादिपुण्य-प्रकृतिविपाकोदयादेव हि जन्तूनां भोग उपजायते । अ.म. | ५४ |
| | = | सकृद्भुज्यत इति आहारमाल्यादिः । श्रा. | २६ |
| भोजनविधिः | = | उचितदानक्रियाभावे नियोगः, कीटिकाज्ञातम्, परिग्रहेक्षा, औचित्येन वर्त्तनम्, स्थानोपदेशः, नियमे स्मृतिः, अधिकक्रिया, व्रणलेपवद् भोगाः । यो.श. | ३० |
| भ्रमः | = | अन्तर्विप्लवः । द्वा. | १८/१५ |
| भ्रान्तिः | = | अतस्मिंस्तद्ग्रहरूपा । षो. | १४/३ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| | **[ म ]** | |
| मग्नः | = प्रत्याहृत्येन्द्रियव्यूहं, समाधाय मनो निजम् ।<br>दधच्चिन्मात्रविश्रान्तिं, मग्न इत्यभिधीयते ॥१॥ ज्ञा. | २/१ |
| मङ्गलम् | = विघ्नविघातकम् वस्तु । पं. | १२/२७ |
| | = मङ्गं-कल्याणं लातीति मङ्गलम्,<br>* मां गालयति पापादिति वा । सा. | ४९ |
| मतिः | = तात्कालिकी प्रतिभा । यो.शा. | ३/१३ |
| मतिज्ञानम् | = इन्द्रियानिन्द्रियव्यापारजन्यं ज्ञानम् । त.उ. | १/९ |
| | = मतिः स्मृतिः संज्ञा चिन्ताऽभिनिबोध इत्यनर्थान्तरम् ।<br>त.भा. | १/१३ |
| | = यदिन्द्रियानिन्द्रियनिमित्तं वर्तमानकालविषयपरिच्छेदि । त.उ. | १/१३ |
| मतिमान् | = आयतिहितज्ञः । षो. | ६/२ |
| | = मार्गानुसारिप्रज्ञः । यो.बिं. | २२१ |
| मत्यज्ञानम् | = मिथ्यादृष्टिपरिगृहीता मतिर्मत्यज्ञानम् । त.उ. | १/३२ |
| मत्सरी | = परकल्याणदुःस्थितः । यो.दृ. | ७६ |
| | = परकल्याणदुःस्थितः । द्वा. | १०/५ |
| | = परकल्याणदुःस्थितः । यो.बिं. | ८७ |
| मदः | = कुलबलैश्वर्य-रूप-विद्यादिभिरहङ्कारकरणं परप्रघर्षनिबन्धनं<br>वा मदः । यो.शा. | १/५६ |
| मध्यमः | = वृत्तान्वेषी तु मध्यमः, वृत्तप्राधान्यापेक्षी, बालापेक्षया<br>मध्यमाचारत्वात् । द्वा. | २/६ |
| | = मध्यमविवेकसम्पन्नो वृत्तं विचारयति । | १/२ |
| | * गुरुलाघवज्ञानसाध्यकार्यानाचरणसूत्रदृष्टमात्रकार्याचरणाभ्यां<br>मध्यमाचारः । षो. | १/३ |
| मध्यमाराधकाः | = जे सेसा सुक्काए, अंसा जे आवि पम्हलेसाए ।<br>ते पुण जो सो भणिओ, मज्झिमओ वीअरागेहिं ॥१६९५॥<br>पं.व. | १६९५ |
| मध्यस्थः | = अपक्षपतितः । अ. | १६/८ |
| | = आत्यन्तिकस्वदर्शनानुरागपरदर्शनद्वेषरहितः । | ८/४ |
| | = आत्यन्तिकस्वदर्शनानुरागपरदर्शनद्वेषरहितः । अ. | १२/६ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| | = नयेषु स्वार्थसत्येषु मोघेषु परचालने । समशीलं मनो यस्य, स मध्यस्थो महामुनिः ॥३॥ ज्ञा. | १६/३ |
| | = मध्ये तिष्ठति मध्यस्थः राग-द्वेषयोरिति । ध्या. | ११ |
| | = रागद्वेषरहितशास्त्रप्रसिद्धाऽऽभाव्यानाभाव्य साधुत्वासाधुत्वादिपरीक्षारूपव्यवहारकारीत्यर्थः । ध.प. | ३ |
| | = स्वदर्शनरागपरदर्शनद्वेषयोर्मध्यभागवर्ती । यो.बिं. | १ |
| | = धर्मस्य परीक्षामूलम्, | २ |
| | * मज्झत्थो अ अणिस्सियववहारी तस्स होइ गुणपक्खो । णो कुलगणाइणिस्सा इय ववहारंमि सुपसिद्धं ॥३॥ ध.प. | ३ |
| मनःपर्यायज्ञानम् | = भावमनःपर्यायमात्रसाक्षात्कारि । त.उ. | १/९ |
| मनःशुद्धिः | = जिनगुणप्रणिधानलक्षणा । गु. | ३/१७३ |
| मनसः प्रसादः | = मनसः परमनिर्मलता । त.उ. का. | १/८ |
| मनुजत्वम् | = धर्मश्रवणादिसामग्र्युपहितं नरभवम् । उ.र. | २ |
| मनोगुप्तिः | = आर्त्तरौद्रध्यानानुबन्धिकल्पनाजालवियोगः परममाध्यस्थ्यपरिणतिर्योगनिरोधावस्थाभावी सर्वथा मनोनिरोधश्चेति त्रिधा । अ.म. | ५७ |
| | = विमुक्तकल्पनाजालं समत्वे सुप्रतिष्ठितम् । आत्मारामं मनस्तज्ज्ञैर्मनोगुप्तिरुदाहृता ॥४१॥ यो.शा. | १/४१ |
| | = सावद्य सङ्कल्पनिरोधः कुशलसङ्कल्पः कुशलाकुशलसङ्कल्पनिरोध एव वा मनोगुप्तिरिति । त.भा. | ९/४ |
| मनोदुष्प्रणिधानम् | = क्रोधलोभद्रोहाभिमानेर्ष्यादयः कार्यव्यासङ्गसम्भ्रमः । यो.शा. | ३/११५ |
| मनोयोगः | = औदारिकवैक्रियाहारकशरीरव्यापाराहृतमनोद्रव्य-समूहसाचिव्याज्जीवव्यापारः । ध्या. | ३ |
| | = मनोयोग्यपुद्गलात्मप्रदेशपरिणामो मनोयोगः । त.भा. | ६/१ |
| मनोयोगप्रधाना पूजा | = तइया परत्तगया सव्वुत्तमवत्थुमाणसनिओगा । सुद्धमणजोगसारा विन्नेया सव्वसिद्धिफला ॥५॥ विं. | ८/५ |
| मन्त्रः | = विद्येतररूपः । यो.बिं. | ५७ |
| | = विशिष्टवर्णानुपूर्वीलक्षणः । ध्या. | ७१ |
| मन्दमतिः | = विस्तृतावगाहनाक्षमधीः । षो. | १६/१६ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| ममत्वपरिणामः | = | प्राप्तेष्टवस्त्ववियोगाध्यवसानाऽप्राप्तत-भिलाषलक्षणार्त्तध्यानरूपः । अ.म. | ६ |
| मरणम् | = | प्राणपरित्यागलक्षणम् । श्रा. | ३७८ |
| महात्मानः | = | प्रशस्तस्वभावाः । यो.बिं. | ६३ |
| महादानम् | = | अतिशायिवितरणम्, | |
| | * | वरवरिकारूपम् । अ. | २६/१ |
| महानयम् | = | प्रत्यपायपरिरक्षणोपायः । पञ्च. | १ |
| महानुभावाः | = | बाह्याभ्यन्तरयोगे समुचितप्रवृत्तयः आगमानुसारिणः महर्षयः । उ.र. | ९६ |
| | = | महाप्रभावाः । सा. | ६३ |
| महाभागः | = | प्रशस्ताचिन्त्यशक्तिः । यो.बिं. | २२७ |
| महामिथ्यादृष्टिः | = | पुद्गलपरावर्त्ताधिकसंसारः । ल.वि. | ३३५ |
| महावाक्यार्थः | = | आक्षिप्तेतरसर्वधर्मात्मकवस्तुप्रतिपादकानेकान्त-वादव्युत्पत्तिः । षो. | ११/८ |
| | = | प्रत्यवस्थापना । उ.र. | १५५ |
| | = | वस्त्वाकांक्षारूपः । द्वा. | २/१२ |
| महावीरः | = | दुर्गुणसुराधमसंगमकादिक्षुद्रजन्तुकृतोपसर्गवर्गसंसर्गेऽप्य-विचलितसत्त्वतया महान् बृहद्वीरः शूरो यः सो महावीरः, अपश्चिमतीर्थाधीश्वरः वर्द्धमाननामा । उ.प. | १ |
| | = | महावीर्यविराजनात् महावीरः । पं. | २/१ |
| | = | शूर-वीर विक्रान्तौ इति, कषायादिशत्रुजयाद् महाविक्रान्तो महावीरः । 'ईर गति प्रेरणयोः' इत्यस्य वा विपूर्वस्य विशेषेणेरयति कर्म याति वेह शिवमिति वीरः, महांश्चासौ वीरश्च महावीरः-वर्तमानतीर्थेश्वरः । यो.श. | १ |
| महासत्त्वः | = | अमरनरपर्षदक्षोभ्याज्ञारूचित्वावगुण्ठितयोगस्थैर्यगुणवत्वात् । उ.र. | २५ |
| | = | प्रशस्तपुरुषकारः । यो.बिं. | ३५३ |
| | = | अवैक्लव्याध्यवसायवन्तः । पं. | ११/४० |
| महोदयः | = | प्रशस्तमाहात्म्यलाभलक्षणः । | २४२ |
| | = | महान्-प्रशस्य उदयो निःश्रेयसाभ्युदयसंसिद्धि रूपः । यो.बिं. | १ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | = | अतिप्रशस्तफला । यो.बिं. | २२० |
| मात्सर्यम् | = | परप्रशंसाऽसहिष्णुत्वम् । षो. | ४/४ |
| माध्यस्थः (उपेक्षा) | = | परदोषोपेक्षणम् । षो. | ४/१५ |
| | = | अनाग्रहत्वम् । अ. | २१/८ |
| | = | क्रूरकर्मसु निःशङ्कं देवता-गुरुनिन्दिषु ।<br>आत्मशंषिसु योपेक्षा तन्माध्यस्थ्यमुदीरितम् ॥१२१॥ यो.शा. | ४/१२१ |
| | = | माध्यस्थ्यमौदासीन्यमुपेक्षेत्यनर्थान्तरम् । त.भा. | ७/६ |
| मानः | = | अहमिति प्रत्ययहेतुः । गु. | ४/२ |
| | = | दुरभिनिवेशारोहो युक्तोक्ताग्रहणं वा मानः । यो.शा. | १/५६ |
| | = | मानः स्तम्भः गर्वः उत्सेकः अहङ्कारः दर्पः मदः स्मयः<br>इत्यनर्थान्तरम् । त.भा. | ८/१० |
| | = | अभ्युत्थानादिक्रिया । षो. | ६/६ |
| माया | = | कपटम् - निकृतिः - परवञ्चनम् । सा. | २७ |
| | = | माया प्रणिधिः उपधिः निकृतिः आचरणं वञ्चना दम्भः<br>कूटम् अतिसन्धानम् अनार्जवमित्यनर्थान्तरम् । त.भा. | ८/१० |
| | = | स्वपरव्यामोहोत्पादकं शाठ्यम् । गु. | ४/२ |
| मार्गः | = | चेतसोऽवक्रगमनं भुजंगमनलिकायानतुल्यो विशिष्टगुण-<br>स्थानावाप्तिप्रगुणः स्वरसवाही क्षयोपशमविशेष इति ।<br>यो.बिं. | १७९ |
| | = | विशिष्टगुणस्थानावाप्तिप्रवणः स्वरसवाही जीवपरिणामः ।<br>द्वा. | ६/२६ |
| | = | सम्यग्दर्शनादिरूपं-निर्वाणनगरगमनपथम् । पं. | २/५ |
| | = | सारसिओ परिणामो, अहवा उत्तमगुणप्पणप्पवणो ।<br>हंदि भुजंगमनलिआ-यामसमाणो मओ मग्गो ॥१५॥ यति. | १५ |
| | = | चेतसोऽवक्रगमनं, भुजङ्गमगमननलिकायानतुल्यो<br>विशिष्टगुणस्थानावाप्ति प्रगुणः स्वरसवाही क्षयोपशमविशेषः ।<br>हेतु-स्वरूप-फलशुद्धा सुखेत्यर्थः । ल.वि. | १४० |
| मार्गगामी | = | कल्याणप्रापकपथयायी । यो.बिं. | २७२ |
| मार्गपतितः | = | चरमयथाप्रवृत्तिकरणभागभाक् । उ.र. | ६४ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| | = मार्गो हि चेतसोऽवक्रगमनं भुजंगमनलिकायानतुल्यो विशिष्टगुणस्थानावाप्तिप्रगुण: स्वरसवाही क्षयोपशविशेष:, तत्र प्रविष्टो मार्गपतित: । द्वा. | १४/२ |
| | = क्षयोपशमविशेषमार्गरूपनगराव्यवधानतो बहिर्भूता: । उ.र. | १८ |
| मार्गानुसारिणी | = मार्गं जिनोक्तज्ञानादिकं मोक्षपथमनुसरत्यनुगच्छतीत्येवंशीला । अ. | २२/१ |
| मार्गानुसारिता | = अनाभोगेऽपि सदन्धन्यायेन मार्गानुसरणशीलता । द्वा. | १८/३१ |
| मार्गानुसारिता हेतव: | = भवाभिनन्दिदोषप्रतिपक्षा गुणा एव हि नियता मार्गानुसारिताहेतव: । ध.प. | १६ |
| मार्गानुसारिभाव: | = 'निसर्गतस्तत्त्वानुकूलप्रवृत्तिहेतु: परिणाम:' आज्ञाया लक्षणं मुणेयव्वम् । ध.प. | १६ |
| | = चारित्रमोहनीयकर्मक्षयोपशमयोगात्, अस्य च तत्त्वाप्ति प्रत्यबन्ध्यकारणत्वात् । यो.श. | १५ |
| | = निर्वाणपथानुकूल: । यो.बिं. | १९९ |
| | = निसर्गतस्तत्त्वानुकूलप्रवृत्तिरपायहेतुक्लिष्टकर्मविघ्नोपशमात् । उ.र. | १० |
| | = मार्गं तत्त्वपथमनुसरति-अनुयातीत्येवंशीलो मार्गानुसारीनिसर्गतस्तत्त्वानुकूलप्रवृत्तिश्चारित्रमोहनीयकर्मक्षयोपशमात् । पं. | ३/६ |
| | = मार्गश्चेतसोऽवक्रगमनं भुजङ्गमनलिकायानतुल्यो विशिष्टगुणस्थानावाप्तिगुण: स्वरसवाही जीवपरिणतिविशेष: । उ.र. | ६ |
| | = मोक्षपथानुकूलोऽध्यवसाय: आगमानुसारी वा भाव: । पं. | ९/३८ |
| मार्गानुसारी क्रिया | = सुत्तायरणाणुगया, सयला मग्गाणुसारिणी किरिया । सुद्धालंबणपुन्ना, जं भणियं धम्मरयणं मि ॥५॥ यति. | ५ |
| | * मग्गो आगमणीई, अहवा संविग्गबहुजणाइन्नं । उभयाणुसारिणी जा, सा मग्गणुसारिणी किरिया ॥६॥ यति. | ६ |
| मार्गाभिमुख: | = चरमयथाप्रवृत्तिकरणभागभाक् । उ.र. | ६४ |
| | = मार्गप्रवेशयोग्यभावापन्न: । द्वा. | १४/२ |
| | = क्षयोपशमविशेषमार्गरूपनगरनिकटस्था: । उ.र. | १८ |
| मार्दव: | = नीचैर्वृत्त्यनुत्सैको मार्दवलक्षणम् । त.भा. | ९/६ |
| | = मृदुरस्तब्ध:, तस्य भाव: कर्म वा मार्दवं नीचैर्वृत्तिरनुत्सेकश्च । यो.शा. | ४/९३ |

| नाम | व्याख्या | गाथा |
| --- | --- | --- |
| | = जात्यादिभावेऽपि मानत्यागः । द्वा. | २७/२४ |
| माहात्म्यम् | = महिमा कलादिप्रावीण्यम् । त.उ. का. | १/१३ |
| मिच्छाकारसा. | = जो मिच्छ त्ति पओगो नियसंजमजोगदुप्पउत्तंमि । | |
| | सो खलु मिच्छाकारो तुह सिद्धंते समुवइट्ठो ॥२०॥ सा. | २० |
| | = मिथ्या-वितथमनृतमित्यनर्थान्तरं, मिथ्याकरणं मिथ्याकारः, | |
| | दुष्प्रयुक्तेः मिथ्याप्रयोग इत्यर्थः । सा. | ४ |
| मिच्छामिदुक्कडम् | = मि त्ति मिउमद्दवत्ते छ त्ति य दोसाण छायणे होइ । | |
| | मित्ति य मेराइठिओ दु त्ति दुगंच्छामि अप्पाणं ॥२४॥ | २४ |
| | * क त्ति कडं मे पावं ड त्ति य डेवेमि तं उवसमेणं । | |
| | एसो मिच्छादुक्कडपयक्खरत्थो समासेण ॥२५॥ सा. | २५ |
| मितभाषिता | = प्रस्तावे स्तोकहितजल्पनशीलता । द्वा. | १२/१५ |
| | = मितहितभाषणशीलता । यो.बिं. | १२८ |
| मित्रम् | = स्निग्धलोकः । उ.र. | १९४ |
| मित्रादृष्टिः | = मित्रायां दर्शनं मन्दं, यम इच्छादिकस्तथा । | |
| | अखेदो देवकार्यादावद्वेषश्चापरत्र तु ॥२१॥ यो.दृ. | २१ |
| मिथ्याचारः | = बाह्येन्द्रियाणि संयम्य च, आस्ते मनसा स्मरन् । | |
| | इन्द्रियार्थान् विमूढात्मा, मिथ्याचारः स उच्यते ॥ षो. | १/६ |
| | = संयम्य य आस्ते मनसा स्मरन् । | |
| | इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते ॥३२६॥ | |
| | ब्र.सि. | ३२६ |
| | = मोक्षमार्ग विपरीतसमाचाराः मिथ्यात्वाविरतिकषायदुष्टयोगलक्षणः, | |
| | * बाह्येन्द्रियाणि संयम्य, य आस्ते मनसा स्मरन् । | |
| | इन्द्रियार्थान् विमूढात्मा, मिथ्याचारः स उच्यते ॥ पं. | २/४३ |
| मिथ्याज्ञानी | = विपर्यस्तरूचित्वात् अयथावादकारिणः । पं. | ११/४६ |
| मिथ्यात्वम् | = अदेवे देवबुद्धिर्या गुरुधीरगुरौ च या । | |
| | अधर्मे धर्मबुद्धिश्च मिथ्यात्वं तद्विपर्ययात् ॥३॥ यो.शा. | २/३ |
| | = अनन्तसंसारहेत्वशुभनुबन्धस्य मूलम्, | |
| | * जीवादिपदार्थेषु तत्त्वमिति निश्चयात्मकस्य | |
| | सम्यक्त्वस्य प्रतिपक्षभूतम्, | |
| | * अनधिगमविपर्ययौ । ध.प. | ८ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| | = नास्ति १, न नित्यः २, न करोति ३, कृतं न वेदयति ४, नास्ति निर्वाणं ५, नास्ति निर्वाणोपायः ६ इति षड्भिः स्थानैस्तत्त्वार्थाश्रद्धानम् । गु. | ४/२ |
| | = विपरीतपदार्थश्रद्धानरूपम् । श्रा. | ३४१ |
| मिथ्यादृष्टिः | = पयमक्खरं पि इक्कं, जो न रोएइ सुत्तनिद्दिट्ठं । सेसं रोयंतो वि हु, मिच्छद्दिट्ठि मुणेयव्वो ॥ स.स. | ११ |
| | = विपर्यस्तरूचिः । पं. | ११/४६ |
| | = विपर्यस्तरूचिः । सा. | २८ |
| मिश्रप्रायश्चित्तम् | = सद्दाइएसु ईसिं पि इत्थ रागाइभावओ होइ । आलोयणा पडिक्कमणयं च एं तु मीसं तु ॥९॥ विं. | १६/९ |
| मीमांसा | = तत्त्वविचाररूपा । षो. | १६/१४ |
| | = सद्विचारणा । द्वा. | २४/१६ |
| मुक्तिः | = अखण्डशुद्धज्ञानसुखाद्यन्वय्यात्मद्रव्यरूपाप्य-शुद्धज्ञानाद्यभावरूपा । षो. | १६/३ |
| | = धर्मोपकरणेऽप्यमूर्छा । द्वा. | २७/२४ |
| | = मोक्षः, | ७/३ |
| | * जीवस्य स्वरूपेऽवस्थानम् । अ. | ७/३ |
| | = सा च बाह्याभ्यन्तरवस्तुषु तृष्णाविच्छेदरूपा लोभाभाव इत्यर्थः । यो.शा. | ४/९३ |
| मुक्त्युपाये उद्युक्तः | = मुक्तौ दृढानुरागितया तत्प्राप्तावन्तरालिकमुपस्थितं परीषहोपसर्गचक्रमगणयन् मुक्त्युपायानुसरणे दृढाभ्यासवान् । उ.र. | २५ |
| मुख्यम् | = मुखे भवं मुख्यम्, प्रधानं निरुपचरितम् । अ. | १०/३ |
| मुग्धाः | = गुणानालोचनपूर्वकविश्वासवन्तः । गु. | २/११५ |
| मुण्डाः | = श्रमणगुणमुक्तयोगिनः । उ.र. | १४६ |
| मुदिता | = सन्तुष्टिः । द्वा. | १८/५ |
| मुद्रा | = अङ्गविन्यासविशेषलक्षणा । पं. | ३/१ |
| मुनिः | = मन्यन्ते जीवादीन् पदार्थानिति मुनयो-विपश्चित्साधवः । ध्या. | ३६ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | = | मग्गाणुसारी सद्धो पन्नवणिज्जो कियावरो चेव ।<br>गुणरागी सक्कारंभसंगओ जो तमाहु मुणिं ॥१९९॥ उ.प. | १९९ |
| | = | मन्यते जगतस्त्रिकालावस्थामिति मुनिः । ध्या. | ११ |
| | = | मन्यते यो जगत्तत्त्वं, स मुनिः परिकीर्तितः । ज्ञा. | १३/१ |
| मुनिसामाचारी | = | साधुसम्बन्धीच्छाकारादिक्रियाकलापम्, ओघदशविधपद<br>विभागरूपक्रियाकदम्बम् । सा. | १ |
| मुनीन्द्रः | = | स्वतन्त्रवक्तृत्वरूपतत्सम्बन्धशाली । षो. | २/१४ |
| मुमुक्षुः | = | दीक्षितः । अ. | ७/१ |
| मुहूर्तः | = | सप्तसप्ततिलवप्रमाणः कालविशेषो भण्यते । ध्या. | ३ |
| मूढः | = | मूर्खः अनादिमोहात् । पं. | ८/१४ |
| | = | युक्तायुक्तविशेषानभिज्ञः । अ. | १२/२ |
| | = | अज्ञानाविष्टः । द्वा. | ३/१९ |
| मूढचित्तम् | = | क्रोधादिभिर्नियमितविरुद्धकृत्येषु यत्तमो द्राग् ।<br>कृत्याकृत्यविभागासंगतमेतन्मो मूढम् ॥५॥ अध्या. | २०/५ |
| मूलगुणाः | = | प्राणातिपातादिनिवृत्त्यात्मकाः । गु. | १/९४ |
| मूलप्रायश्चित्तम् | = | पाणवहाइं मि पाओ भावेणासेवियम्मि सहसा वि ।<br>आभोगेणं जइणो पुणो वयारोवणा मूलं ॥१४॥ विं. | १६/१४ |
| मूलाधानम् | = | मार्गानुसारीक्रियाजनितपुण्यानुबन्धिपुण्य-<br>लक्षणबीजन्यासः । षो. | १३/१३ |
| मृत्युः | = | प्राणत्यागस्वरूपः । यो.द्द. | ७९ |
| मृत्युघ्नम् | = | मासोपवासतपम् । द्वा. | १२/२० |
| मृत्युञ्जयजपः | = | परमेष्ठिनमस्कारः । द्वा. | १२/२० |
| मेधा | = | ग्रन्थग्रहणपटुः परिणामः, ज्ञानावरणीयकर्मक्षयोपशमजः<br>चित्तधर्म्म इति भावः । अयमपीह सद्ग्रन्थप्रवृत्तिसारः<br>पापश्रुतावज्ञाकारी गुरुविनयादिविधिवल्लभ्यो<br>महांस्तदुपादेयपरिणामः । ल.वि. | २७३ |
| | = | हेयोपादेयपरिज्ञानरूपा मर्यादावर्त्तिता वा । प्र. | २३ |
| मैत्री | = | उपकारिस्वजनेतरसामान्यगता चतुर्विधा । षो. | १३/९ |
| | = | परहितचिन्ता । षो. | ४/१५ |
| | = | प्रत्युपकारनिरपेक्षा प्रीतिः । शा.वा. | ६ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| | = *मा कार्षीत् कोऽपि पापानि मा च भूत् कोऽपि दुःखितः ।* | |
| | मुच्यतां जगदप्येषा मतिर्मैत्री निगद्यते ॥११८॥ यो.शा. | ४/११८ |
| | = सर्वसत्त्वेषु मित्रभावः । यो.बिं. | ५२ |
| | = सुखचिन्ता मता मैत्री । द्वा. | १८/३ |
| मैत्र्यादयः | = परे हितमतिर्मैत्री, मुदिता गुणमोदनम् । | |
| | उपेक्षा दोषमाध्यस्थ्यं, करूणा दुःखमोक्षधीः ॥५॥ यो.सा. | २/५ |
| मोक्षः | = निरुपमसौख्यः, सकलाबाधानिवृत्तेरुभयसिद्धत्वात् । श्रा. | |
| | = परित्यागः । श्रा. | ४० |
| | = आत्मनः स्वभावसमवस्थानम् । त.उ. | १/४ |
| | = कृत्स्नकर्मक्षयान्मोक्षो, जन्ममृत्वादिवर्जितः । | |
| | सर्वबाधाविनिर्मुक्त, एकान्तसुखसङ्गतः ॥१॥ अ. | ३२/२ |
| | * यन्न दुःखेन संभिन्नं, न च भ्रष्टमनन्तरम् । | |
| | अभिलाषापनीतं यत्तज्ज्ञेयं परमं पदं ॥२॥ अ. | ३ |
| | = कृत्स्नकर्मक्षयो मोक्षः । त.भा. | १०/३ |
| | = निःशेषकर्मविगमः । श्रा. | ८३ |
| | = पुण्य-पापक्षयलक्षणो न क्लेशबहुलो न वा विषयसम्पृक्तान्नवदापातरमणीयः परिणामदुःखदायी न वा ऐहिकाऽऽमुष्मिकफलाशंसादोषदूषित इति भवति परमानन्दमयश्चतुर्वर्गेऽग्रणीः । यो.शा. | १/१५ |
| | = मोक्षः कर्मक्षयो नाम भोगसंक्लेशवर्जितः । द्वा. | १२/२२ |
| | = सकलकर्मक्लेशक्षयलक्षणः । यो.बिं. | ३ |
| | = शाश्वतसौख्यः श्रा. | ३८९ |
| मोक्षमार्गः | = मोक्षस्य स्वभावसमवस्थानरूपस्य मार्गः शुद्धिरित्येके, | |
| | * मोक्षस्य सिद्धिस्थानस्य मार्गः पन्था इत्यपरे, | |
| | * मोक्षस्य कर्माष्टकक्षयलक्षणस्य मार्ग उपधायको हेतुरिति वयम् । त.उ. | १/१ |
| | = सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः । त.भा. | १/१ |
| मोक्षसाधनानुष्ठानम् | = स्मृतिमूलम्, स्मृतिमूलत्वाद्धर्मानुष्ठानस्य तदभावे तदभावात् । श्रा. | ३१२ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| मोक्षसुखम् | = | अपरायत्तमोत्सुक्यरहितं निष्प्रतिक्रियम् ।<br>सुखं स्वाभाविकं तत्र नित्यं भयविवर्जितम् ॥७॥ अ. | ३२/७ |
| मोक्षहेतुः | = | जं आणाए चरणं आहाकम्मादिणायतो सिद्धं ।<br>ता एयम्मि पयत्तो विन्नेओ मोहक्खहेउत्ति ॥ उ.प. | १८५ |
| | = | निवृत्तिनिमित्तः । यो.बिं. | ३ |
| | = | संसारहेतुत्वायोगः । गु. | १/९८ |
| | = | सकलकर्मक्षयकारणमपुनर्बन्धकाद्यवस्थासंभव-<br>शुभभावरूपम् । पं. | ३/१२ |
| मोक्षोपायः | = | दोसा जेण निरुब्भंति जेण खिज्जंति पुव्वकम्माइं ।<br>सो खलु मोक्खोवाओ रोगावत्थासु समणं व ॥७८२॥ उ.प. | ७८२ |
| मोहः | = | देहादिष्वात्मबुद्धिर्या मुक्तिमार्गोपरोधिनी ।<br>तत्राभिष्वङ्गभावेन सा मोह इति कीर्त्यते ॥ ब्र.सि. | ६८ |
| | = | अज्ञानम् । षो. | १३/९ |
| | = | अज्ञानलक्षणः । यो.श. | ५३ |
| | = | अज्ञानलक्षणः । श्रा. | ३९३ |
| | = | गारवमग्नता । द्वा. | ३/८ |
| | = | मुह्यतेऽनेनेति मोहवेदनीयं कर्म, आत्मनः<br>क्वचिदज्ञानपरिणामापादनात्, | |
| | * | मोहनं वा मोहः, | |
| | * | मोहवेदनीयकर्मापादितोऽज्ञानपरिणाम एव । पञ्च. | १ |
| | = | मूढता । अ. | १/२ |
| | = | सर्वक्लेशानां मूलमनात्मन्यात्माभिमानलक्षणः । द्वा. | २१/४ |
| | = | हेयेतरभावाधिगमप्रतिबन्धविधानान्मोह इति । ध. | ४९२ |
| मोहगर्भितवैराग्यम् | = | कुशास्त्रार्थेषु दक्षत्वं शास्त्रार्थेषु विपर्ययः ।<br>स्वच्छन्दता कुतर्कश्च गुणवत्संस्तवोज्झनम् ॥१२॥<br>आत्मोत्कर्षः परद्रोहः कलहो दंभजीवनम् ।<br>आश्रवाच्छादनं शक्त्युल्लंघनेन क्रियादरः ॥१३॥<br>गुणानुरागवैधुर्यमुपकारस्य विस्मृतिः ।<br>अनुबंधाद्यचिंता च प्रणिधानस्य विच्युतिः ॥१४॥ | |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | | श्रद्धामृदुत्वमौद्धत्यमाधुर्यमविवेकिता । | |
| | | वैराग्यस्य द्वितीयस्य स्मृतेयं लक्षणावली ॥१५॥ अध्या. | ६/१५ |
| मोहनाशः | = | अतत्त्वादौ तत्त्वाद्यध्यवसायलक्षणबोधहानिः । अ. | १२/७ |
| मोहनीयम् | = | मोहयतीति । श्रा. | १० |
| मोहमूलानुष्ठानम् | = | मोहवासनाऽवन्ध्यबीजरूपम् । द्वा. | २२/२८ |

**[ य ]**

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| यतना | = | जीए बहुयतरासप्पवित्तिविणिवित्तिलक्खणं वत्थुं । | |
| | | सिज्झति जओ सा जयणाणाइ विवइम्मि ॥७७१॥ उ.प. | ७७१ |
| | = | तदधिकदोषविनिवारिणी, निवृत्तिप्रधाना, | |
| | | अकुशलनिवृत्तिरूपा । पं. | ७/३२ |
| | = | बहुतरासत्प्रवृत्तिनिवृत्तिहेतुचेष्टालक्षणा । गु. | १/७८ |
| | = | रागद्वेषरहितः शास्त्राज्ञाशुद्धः प्रयत्नः, | ६/१६ |
| | * | हिंसानिवृत्तिफला । षो. | ६/१६ |
| | = | सा(यतना) पुण बहुतरयासप्पवित्तिविणिवित्तिसाहणी चेट्ठा । | |
| | | आणासुद्धा णेयाऽऽवइंमि नाणाइगुणबीअं ॥१२७॥ उ.र. | १२७ |
| यतिः | = | अर्हः अर्हसमीपे विधिप्रव्रजितो यतिः । ध. | २२८ |
| | = | एवं यः शुद्धयोगेन परित्यज्य गृहाश्रमम् । | |
| | | संयमे रमते नित्यं, स यतिः परिकीर्तितः ॥ ध. | २२ |
| | = | शक्तिनिगूहनं विना यतमान एव हि यतिरुच्यते । सा. | ७८ |
| यतिक्रिया | = | अप्रमत्तस्य साधोः सर्वस्या अपि क्रियायाः | |
| | | परार्थकरणत्वेनानुग्रहहेतुत्वं न्यायसिद्धमेव, | |
| | | तदाहुराचार्याः "विहितानुष्ठानपरस्य तत्वतो | |
| | | योगशुद्धिसचिवस्य । भिक्षाटनादि सर्वं | |
| | | परार्थकरणं यतेर्ज्ञेयम् ॥" | १/३० |
| यतित्वम् | = | भवस्वरूपविज्ञानात्तद्विरागाच्च तत्वतः । | |
| | | अपवर्गानुरागाच्च स्यादेतन्नान्यथा क्वचित् ॥ ध. | २७ |
| यतिधर्मः | = | खंती य मद्दवज्जव मुत्ती तव संजमे य बोद्धव्वे । | |
| | | सच्चं सोयं आकिंचणं च बंभं च जइधम्मो ॥२॥ विं. | ११/२ |
| यतिविश्रामणा | = | चारित्रिण एत एतदुद्यता इति नातः परं कृत्यम्, | |
| | | प्रकर्षोऽयं गुणानाम्, रक्ष्य एष काय आत्मनो | |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | | नियोगेन, तदुत्सर्पणोऽयम्, बीजमेतद् भावस्य, महावीर्यमेतत्, उचिता विश्रामणा इति महाविवेकसारसंवेगसारता । यो.श. | ३१ |
| यत्नः | = | आदरः । षो. | १३/१६ |
| | = | आदरः । अ. | ९/८ |
| यत्नातिशयः | = | अप्रमादभावनाजनितो विजातीयः प्रयत्नः । षो. | ३/८ |
| यथाच्छन्दः | = | उस्सुत्तमायरंतो, उस्सुत्तं चेव पण्णवेमाणो । एसो उ आहाछंदो इच्छाछंदु त्ति एगट्ठा ॥ गु. | ३/९९ |
| | = | यथाकथञ्चित्स्वमनीषिकया गुरुसिद्धान्त-निरपेक्षतया च सर्व्वधर्म्मकृत्येषु च्छन्दो मनोऽभिप्रायो येषां ते, | |
| | * | उक्तं च, उस्सुत्तमणुवइट्ठं सच्छन्दविगप्पियं अणणुवायं । परतत्ति पवत्तेंति तेण य इणमो अहाच्छन्दो ॥ स.स. | ११ |
| यथाविधिः | = | शास्त्रीयन्यायानतिक्रमेण । द्वा. | ७/१५ |
| यथाशक्तिः | = | यस्य यावती शक्तिः । यो.बिं. | ११३ |
| | = | शक्त्यनुरूपम् । पञ्च. | १ |
| | = | स्वसामर्थ्यानुरूपम् । यो.बिं. | २५३ |
| | = | करणाकरणयोः शक्त्यनुल्लंघनेन । यो.शं. | ५ |
| | = | पुरुषसंहननादिसामर्थ्यानुसारतः । अ. | ९/६ |
| | = | यथासमाधिः, शक्त्याद्यनुरूपम्, नासद्ग्रहेण । यो.श. | १४ |
| | = | शक्तिरनतिक्रमेण यथाशक्ति, उत्सर्गापवादाभ्यामिति । स.स. | १६ |
| | = | शक्तेः शरीरसामर्थ्यस्यानतिक्रमो यथाशक्तिः । अ. | १/६ |
| | = | शक्तेरनतिक्रमेण चित्तवित्तानुरूपम् । | २/३६ |
| | = | शक्त्यौचित्येन । यो.दृ. | ४३ |
| | = | स्वयोगसमाधानमनतिक्रम्य न पुनरसद्ग्रहेण । उ.र. | २३ |
| यथास्थितवस्तुवादिनः | = | यथास्थितमभिलाप्यानभिलाप्यत्वादिना प्रकारेण स्थितं वस्तु वदितुं शीलाः । पञ्च. | १ |
| यशः | = | पराक्रमकृतम् । श्रा. | २४ |
| युक्तस्वरता | = | परयोगानुपघातिशब्दता । ल.वि. | १५ |
| युक्तिः | = | उपपत्तिः । श्रा. | ४०१ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| योगः | = औचित्यादिविशेषरूपतया एकान्ततः सानुबन्धफलहेतुः चित्रभेदो गुरुविनयादिरूपः । यो.श. | १ |
| | = अन्यासामवतारोऽपि यथायोगं विभाव्यताम् । यतः समितिगुप्तीनां प्रपञ्चो योगः उत्तमः ॥ द्वा. | १८/३० |
| | = अप्राप्तलाभलक्षणः । ल.वि. | १०८ |
| | = आवश्यकानुष्ठानम् । उ.र. | २४ |
| | = कायवाङ्मनःकर्म योगः । त.भा. | ६/१ |
| | = धर्मविशेषः । यो.श. | २ |
| | = मनआदिको जीवव्यापारः । गु. | ४/९७ |
| | = मित्रादिलक्षणः । यो.दृ. | १ |
| | = मुक्खेण जोयणाओ जोगो सव्वो वि धम्मवावारो । परिसुद्धो विन्नेओ ठाणाइगओ विसेसओ ॥१॥ विं. | १७/१ |
| | = मोक्षहेतुः अनुष्ठानः । यो.बिं. | १ |
| | = मोक्षेण योजनात् सर्वोऽपि धर्मव्यापारः, * व्युत्पत्त्यर्थानुगृहीतमोक्षकारणीभूतात्मव्यापारत्वरूपयोगलक्षणः । यो.विं. | १ |
| | = मोक्षेण योजनाद्योगः, सर्वोऽप्याचारः इष्यते । विशिष्टा स्थानवर्णाथालम्बनैकाग्र्यगोचरः ॥१॥ ज्ञा. | २७/१ |
| | = युज्यते अनेन करणभूतेनात्मा कर्मणेति योगो व्यापार एव । श्रा. | ७९ |
| | = युज्यते वा अनेन केवलज्ञानादिना आत्मेति योगःधर्म-शुक्लध्यानलक्षणः । ध्या. | १ |
| | = सज्ज्ञानादिसम्बन्धरूपः । यो.श. | १ |
| | = सर्वत्रोचितानुष्ठानम् । यो.श. | २२ |
| | = तत्त्वत औदारिकशरीरसंयोगसमुत्था आत्मपरिणामविशेषव्यापाराः । ध्या. | ३ |
| | = मनोवाक्कायसम्बन्धादग्निसम्बन्धादिष्टकादे रक्ततेवाऽऽत्मनो वीर्यपरिणतिविशेषा योगा इत्युच्यन्ते । * योगो वीरिअं थामो उच्छाह परक्कमो तहा चेट्ठा । सत्ती सामत्थं चिय जोगस्स हवंति पज्जाया ॥ यो.शा. | ४/७४ |
| योगचिह्नम् | = अलौल्यमारोग्यमनिष्ठुरत्वं, गन्धः शुभो मूत्रपुरीषमल्पम् । | |

| नाम | व्याख्या | गाथा |
|---|---|---|
| | कान्तिः प्रसादः स्वरसौम्यता च, योगप्रवृत्तेः प्रथमं हि चिह्नम् ॥ यो.दृ. | १६१ |
| योगधर्माधिकारी | = औचित्यारम्भिणोऽक्षुद्राः प्रेक्षावन्तः शुभाशयाः ।<br>अवन्ध्यचेष्टाः कालज्ञा योगधर्माधिकारिणः ॥ यो.बिं. | २४४ |
| योगपूर्वसेवा | = पूर्वसेवा तु योगस्य गुरुदेवादिपूजनम् ।<br>सदाचारस्तपो मुक्त्यद्वेषश्चेति प्रकीर्तिताः ॥१॥ द्वा. | १२/१ |
| योगबीजम् | = जिनेषु कुशलं चित्तं तन्नमस्कार एव च ।<br>प्रणामादि च संशुद्धं योगबीजमनुत्तमम् ॥८॥ द्वा. | २१/८ |
| | = जिनेषु कुशलं चित्तं, तन्नमस्कार एव च ।<br>प्रणामादि च संशुद्धं, योगबीजमनुत्तमम् ॥२३॥ | २३ |
| | * मोक्षयोजकानुष्ठानकारणम् । यो.दृ. | २३ |
| योगबुद्धिः | = धर्मवासनापरिष्कृतमतिः । उ.र. | ७७ |
| योगमार्गः | = योग एव निर्वाणपुरप्रापकतया मार्गः । यो.बिं. | ३० |
| योगमाहात्म्यम् | = योगसामर्थ्यलक्षणम् । यो.बिं. | ३६ |
| योगवक्रता | = अनार्जवप्रणिधानं मायाचित्तं योगविपर्यास इत्यनर्थान्तरम् ।<br>त.भा. | ६/२१ |
| योगवशिता | = योगाभ्याससामर्थ्यलक्षणा । यो.श. | ७५ |
| योगवृद्धिः | = सम्यग्दर्शनादिमुक्तिबीजोत्कर्षरूपा । यो.बिं. | ५४ |
| योगशास्त्राः | = अध्यात्मग्रन्थाः पातञ्जलादयः । पं. | ३/२७ |
| योगसंग्रहाः | = साधुजनानुष्ठानसंग्राहकसिद्धांतालापकाः । उ.र. | ५५ |
| योगाङ्गानि | = यथोक्तं "यमनियमासनप्राणायामप्रत्याहारधारणा-<br>ध्यानसमाधयोऽष्टावङ्गानि" । यो.दृ. | १६ |
| योगावञ्चकयोगः | = सद्भिः कल्याणसम्पन्नैर्दर्शनादपि पावनैः ।<br>तथा दर्शनतो योग आद्यावञ्चक उच्यते ॥२१९॥ यो.दृ. | २१९ |
| | = सद्भिः कल्याणसंपन्नैर्दर्शनादपि पावनैः ।<br>तथादर्शनतो योग आद्यावञ्चक उच्यते ॥२९॥ द्वा. | १९/२९ |
| योगिचित्तम् | = एतद्दोष(क्रियाष्टदोषाः)विमुक्तं, शान्तोदात्तादिभावसंयुक्तम् ।<br>सततं परार्थनियतं, सङ्क्लेशविवर्जितं चैव ॥१२॥ षो. | १४/१२ |
| | * सुस्वप्रदर्शनपरं समुल्लसद्गुण-गणौघमत्यन्तम् ।<br>कल्पतरुबीजकल्पं शुभोदयं योगिनां चित्तम् ॥१३॥ षो. | १४/१३ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| योगिनः | = | अध्यात्मचिन्तकाः । अ. | १/४ |
| योगीश्वरः | = | योगाः-मनोवाक्कायव्यापारलक्षणः तैरीश्वरः प्रधानः । ध्या. | १ |
| योग्यता (जीवस्य) | = | कर्मपुद्गलग्राहकस्वभावत्वमनादिपारिणामिकभव्यभावलक्षणं सहजमलरूपम् । षो. | १६/६ |
| योजनम् | = | संयोगकरणम् । यो.बिं. | ३१ |
| यौवनम् | = | जोव्वणमविवेगो च्चिअ, विन्नेओ भावओ उ तयभावो । पं.व. | ६० |
| | | **[ र ]** | |
| रक्षा | = | रक्षा चेह तत्तत्स्वभावतया एवाभिध्यानतः क्लिष्टकर्मविगमेन शान्तिरिति । यो.श. | ५० |
| रत्नाधिकः | = | रत्नैर्ज्ञानदर्शनचारित्रैरधिको रत्नाधिकः, | |
| | * | रत्नैश्चरतीति रात्निकः । सा. | १२ |
| रसः | = | भुक्तपीतान्न-पानपरिणामजो निस्यन्दः । यो.शा. | ४/७२ |
| रसत्यागः | = | रसानां-दुग्धदध्यादीनां सर्वेषामन्यतरेषां वा त्यागः । पं. | १९/२ |
| रहस्याभ्याख्यानम् | = | रहः एकान्तस्तत्र भवं रहस्यं तेन तस्मिन् वा अभ्याख्यानम् । श्रा. | २६३ |
| रागः | = | अभिष्वङ्गलक्षणः । श्रा. | ३९३ |
| | = | अभिष्वङ्गलक्षणः । | १/१ |
| | * | जीवस्वरूपोपरञ्जनाद् रागः । अ. | १/१ |
| | = | अभिष्वङ्गलक्षणः । यो.श. | ५३ |
| | = | अविषयेऽभिष्वङ्गकरणाद् राग इति । ध. | ४९० |
| | = | इच्छा मूर्च्छा कामः स्नेहो गार्ध्यं ममत्वमभिनन्दः । अभिलाष इत्यनेकानि रागपर्यायवचनानि ॥१८॥ | १८ |
| | | मायालोभकषायश्चेत्येतद्रागसंज्ञितं द्वंद्वम् । प्रश. | ३२ |
| | = | निश्रा । ध.प. | ३ |
| | = | रज्यतेऽनेनेति रागवेदनीयं कर्म, आत्मनः क्वचिदभिष्वङ्गपरिणामापादनात्, | |
| | * | रञ्जनं वा, | |
| | * | रागवेदनीयकर्मापादितो भावोऽभिष्वङ्गपरिणाम एव । पञ्च. | १ |
| | = | रागो नाम कषायोदयोऽत्राधिकृतो न तु साभिष्वङ्गं चित्तम्, | |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | | अप्रमत्तादौ माध्यस्थ्यदशायां तदभावेऽपि सरागत्वस्यैव व्यवहारात् । गु. | ४/५० |
| | = | सुखोपाये सुखशादने तृष्णा सुखज्ञस्य सुखानुस्मृतिपूर्वो लोभपरिणामो रागः । द्वा. | २५/२९ |
| रागद्वेषौ | = | स्वरूपतोऽप्रशस्तावेव, पापप्रकृतित्वात् । अ.म. | १६ |
| रूग् | = | रोगः, पीडा, भङ्गो वा । षो. | १४/३ |
| रूपम् | = | चार्वङ्गावयवसंनिवेशः । त.उ. का. | १/१३ |
| रूपवान् | = | शुभशरीरसंस्थानः । यो.बिं. | १८७ |
| रूपस्थम् | = | रागद्वेषमहामोहविकारैरकलङ्कितम् ।<br>शान्तं कान्तं मनोहारि सर्वलक्षणलक्षितम् ॥८॥ यो.शा.<br>तीर्थिकैरपरिज्ञातयोगमुद्रामनोरमम् ।<br>अक्ष्णोरमन्दमानन्द-निस्यन्दं दददद्भुतम् ॥९॥<br>जिनेन्द्रप्रतिमारूपमपि निर्मलमानसः ।<br>निर्निमेषदृशा ध्यायन् रूपस्थध्यानषान् भवेत् ॥१०॥ यो.शा. | ९/१० |
| रूपाणि | = | रूपरसगन्धस्पर्शशब्दवन्ति । त.उ. | १/२६ |
| रूपातीतम् | = | अमूर्त्तस्य चिदानन्दरूपस्य परमात्मनः ।<br>निरञ्जनस्य सिद्धस्य ध्यानं स्याद्रूपवर्जितम् ॥१॥ यो.शा. | १०/१ |
| रेचकः | = | बहिर्वृत्तिः श्वासः । द्वा. | २२/१७ |
| | = | यत् कोष्ठादतियत्नेन नासा-ब्रह्मपुराननैः ।<br>बहिः प्रक्षेपणं वायोः स रेचक इति स्मृतः ॥६॥ यो.शा. | ५/६ |
| रोगः | = | विशुचिकाद्यातङ्कः । यो.दृ. | ७९ |
| रोचकसम्यक्त्वम् | = | रोचयतीति-विहितानुष्ठाने रुचिमात्रकरं तथाविधशुद्ध्यभावात् । श्रा. | ४९ |
| रौद्रः | = | विषविकारादिवद्दारुणः । उ.प. | १९४ |
| रौद्रध्यानम् | = | रोदयत्परानिति रुदो दुःखहेतुः,<br>तेन कृतं तस्य वा कर्म रौद्रम् । यो.शा. | ३/७३ |
| | = | हिंसाद्यतिक्रौर्यानुगतम् । ध्या. | ५ |

## [ ल ]

| | | | |
|---|---|---|---|
| लक्षणम् | = | लक्ष्यते तदितरव्यावृत्तं वस्त्वनेनेति । षो. | ३/१ |
| लाभरतिः | = | याञ्चाशीलः । यो.बिं. | ८७ |

...૩૧૨ ... મ.સા. ...ળાની પોળ, ...૩૮૦ ००१.

| नाम | व्याख्या | गाथा |
|---|---|---|
| लालसा | = अभिलाषातिरेकः । यो.दृ. | ४६ |
| लिङ्गम् | = मुणिगुणसंकप्पकारणं, | |
| | * मुनीनां गुणाः व्रतादयस्तेषु सङ्कल्पः, | |
| | अध्यवसायस्तत्कारणम् । गु. | ३/१७९ |
| | = लिङ्ग्यते-गम्यते स्वरूपमनेनेति लिङ्गम्, | |
| | तच्च बाह्याभ्यन्तरभेदं द्रव्ये भावे च भवति । गु. | ४/७१ |
| लिङ्गिनः | = व्रतसूचकतथाविधनेपथ्यवन्तः । यो.बिं. | १२२ |
| लेश्या | = कृष्ण-नील-कापोत-तेजः-पद्म-शुक्लवर्णद्रव्यसाचिव्यादात्मन- | |
| | स्तदनुरूपः परिणामः । यो.शा. | ४/८४ |
| | = सकलकर्मप्रकृतिनिष्यन्दभूतकृष्णादिद्रव्य- | |
| | साचिव्यादात्मनोऽशुद्धतमाऽशुद्धतराऽशुद्ध- | |
| | शुद्ध-शुद्धतर-शुद्धतमपरिणामरूपाः । अ.म. | ३ |
| लोकः | = लोक्यते केवलालोकलोचनबलेन केवलिभिर्दृश्यते | |
| | यः स लोकः, स च धर्माधर्मजीवपुद्गलास्ति- | |
| | कायोपलक्षित आकाशदेशः | १ |
| | * तदुक्तम्, "धर्मादीनां वृत्तिर्द्रव्याणां भवति यत्र तत्क्षेत्रम् । | |
| | तैर्द्रव्यैः सह लोकस्तद्विपरीतं ह्यलोकाख्यम् ॥" उ.प. | १ |
| | = स्वेच्छाकल्पिताचारसक्तम् । द्वा. | ७/३२ |
| लोकपंक्तिः | = लोकसदृशभावसम्पादनरूपा । यो.बिं. | ८६ |
| लोकविरूद्धः | = बहुजनविरोधहेतुभूतानुष्ठानविशेषः । पं. | २/४ |
| लोकसंज्ञा (लोकपंक्तिः) | = लोकाराधनहेतोर्या मलिनेनान्तरात्मना । | |
| | क्रियते सत्क्रिया सा च लोकपंक्तिरुदाहृता ॥६॥ द्वा. | १०/६ |
| | = गतानुगतिलक्षणा लोकहेरिः । ल.वि. | १८ |
| | = बहुभिर्लोकैराचीर्णमेवास्माकमाचरणीयमित्येवंरूपा । द्वा. | ७/३२ |
| | = भगवद्वचनप्रतिकूला, प्रभूतसंसाराभिनन्दिसत्त्वक्रियारूपा । पञ्च. | ४ |
| | = लोक एव प्रमाणं इत्येवंरूपां शास्त्रनिरपेक्षा मतिः । यो.विं. | १६ |
| | = लोकाचारादरश्रद्धा लोकसंज्ञेति गीयते ॥११॥ अध्या. | १०/११ |
| लोकहितम् | = लोकानामासन्नभव्यानां हितमभ्युदयनिःश्रेयः । त.उ. का. | १/१८ |
| लोकाचारानुवृत्तिः | = बहुजनरूढा विरोधिलोकव्यवहारानुपालनरूपा । यो.बिं. | १३० |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| लोभः | = | दानार्हेषु स्वधनाप्रदानं निष्कारणं परधनग्रहणं च लोभः । यो.शा. | १/५६ |
| | = | द्रव्यादिकाङ्क्षा । गु. | ४/२ |
| | = | लोभः रागः गार्ध्यं इच्छा मूर्च्छा स्नेहः काङ्क्षाऽभिष्वङ्ग इत्यनर्थान्तरम् । त.भा. | ८/१० |

**[ व ]**

| | | | |
|---|---|---|---|
| वक्रत्वम् | = | संज्वलनमायालक्षणम् । गु. | १/१२५ |
| वचनक्षमा | = | आगममेवालंबनीकृत्योपकारित्वादिनैरपेक्ष्येण क्षमां कुर्वतः । द्वा. | २८/७ |
| वचनानुष्ठानम् | = | वचनात्मिका प्रवृत्तिः सर्वत्रौचित्ययोगतो या तु । वचनानुष्ठानमिदं चारित्रवतो नियोगेन ॥६॥ षो. | १०/६ |
| | = | शास्त्रार्थप्रतिसंधानपूर्वा साधोः सर्वत्रोचितप्रवृत्तिः । यो.विं. | १८ |
| वन्दनकाध्ययनम् | = | गुणवतः प्रणामो यत्र वर्ण्यते तद् । त.उ. | १/२० |
| वन्दनम् | = | अभिवादनं प्रशस्तकायवाङ्मनःप्रवृत्तिरित्यर्थः । ल.वि. | २६२ |
| | = | देवपूजाषडावश्यकादिकरणम् । स.स. | ४१ |
| | = | प्रशस्तमनोवाक्कायप्रवृत्तिः । प्र. | २३ |
| वन्दिताः | = | त्रिविधयोगेन सम्यक् स्तुताः । ल.वि. | ३०६ |
| वरबोधिः | = | विशिष्टसम्यग्दर्शनलाभः । अ. | ३१/२ |
| वरबोधिसमेतः | = | तीर्थकरपदप्रायोग्यसम्यक्त्वसमेतः । यो.बि. | २७४ |
| वर्णनम् | = | सद्भूतगुणोत्कीर्तनम् । द्वा. | २९/८ |
| वर्णवादः | = | प्रशंसारूपः । यो.बिं. | १२७ |
| वर्त्तनम् | = | स्थिरीकरणम्=अधीतस्य सूत्रस्य संस्कारदार्ढ्यकारिपुनरुच्चारणम् । सा. | ७० |
| वर्त्तना | = | पूर्वगृहीतस्य पुनरुज्ज्वालनम् । गु. | २/२५२ |
| वर्धमानः | = | वर्त्तमानतीर्थाधिपतित्वेनासन्नोपकारिणं गर्भावतारसमयमारभ्यैव प्रवर्द्धमानधनधान्यादिविपुलविभवमनुविभाव्य प्रमुदिताभ्यां मातापितृभ्यां दत्तवर्द्धमानाभिधानं चरमतीर्थकरम् । | उ.र.१ |
| | = | स्वकुलसमृद्धिवृद्धिकारकत्वेन पितृभ्यां व्यवस्थापितैवंविधनामकं चरमतीर्थाधिपतिः । पं. | १/१ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| वर्षा | = | वंशा वर्षा वास्या इति चैषां गुणतः पर्यायनामानि भवन्ति । त.भा. | ३/१० |
| वस्तु | = | एए चेव य वत्थू, वसंति एएसु नाणमाईया । जं परमगुणा सेसाणि, हेउफलभावओ हुंति ॥३॥ पं.व. | ३ |
| | = | वसन्त्यस्मिन् गुण-पर्याया इति वस्तु चेतनादि । ध्या. | ३ |
| वस्तुस्वभावः | = | कार्यकारणरूपपदार्थस्वतत्त्वम् । ल.वि. | १२८ |
| वस्तुस्वरूपम् | = | हेयत्वज्ञेयत्वोपादेयत्वरूपम् । ध.प. | ५५ |
| वाक्यार्थः | = | चालना । उ.र. | १५५ |
| | = | प्रकृतवाक्यैकवाक्यतापन्नसकलशास्त्र-वचनार्थाविरोधिवचनार्थः । षो. | ११/७ |
| वाग्गुप्तिः | = | मौनावलम्बनेन सर्वथा वा तन्निरोधरूपा मुखवस्त्राच्छादितमुखेन संभाषणादिना वाक्संवृत्तिरूपा वा । अ.म. | ५७ |
| | = | वाचन-पृच्छन-प्रश्नव्याकरणेषु वाङ्नियमो मौनमेव वा वाग्गुप्तिः । त.भा. | ९/४ |
| | = | संज्ञादिपरिहारेण यन्मौनस्यावलम्बनम् । वाग्वृत्तेः संवृत्तिर्वा या सा वाग्गुप्तिरिहोच्यते ॥४२॥ यो.शा. | १/४२ |
| वाग्दुष्प्रणिधानम् | = | वर्णसंस्काराभावोऽर्थानवगमश्चापलम् । यो.शा. | ३/११५ |
| वाग्योगः | = | औदारिकवैक्रियाहारकशरीरव्यापाराहृतवाग्द्रव्यसमूह-साचिव्याज्जीवव्यापारः । ध्या. | ३ |
| | = | भाषायोग्यपुद्गलात्मप्रदेशपरिणामो वाग्योगः । त.भा. | ६/१ |
| वाग्योगप्रधाना पूजा | = | बीयाउसव्वमंगलनामा वायकिरियापहाणेसा । पुव्वुत्तविसयवत्थुसु ओचित्ताणायभेएण ॥४॥ विं. | ८/४ |
| वाचना | = | वाचनं वाचना विनेयाय निर्जरार्थे सूत्रादिदानम् । ध्या. | ४२ |
| | = | सूत्रदानलक्षणा । सा. | ३१ |
| वात्सल्यम् | = | समानधर्मवतां बहुमानकार्यकरणम् । पं. | १५/२४ |
| वादी | = | वाई पमाणकुसलो, रायदुवारेऽपि लद्धमाहप्पो, | ३४ |
| | * | परवादिविजेता । स.स. | ३८ |
| विकटनम् | = | शङ्काद्यतिचारालोचना स्वाभिप्रायनिवेदनमात्रम् । पं. | २/२७ |
| विकल्पनिवृत्तिः | = | अन्तःपरिणाममात्रसाध्या । अ.म. | ५७ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| विक्षिप्तचित्तम् | = | सत्त्वोद्रेकापरिहृतदुःखनिदानेषु सुखनिदानेषु ।<br>शब्दादिषु प्रवृत्तं तदेव चित्तं तु विक्षिप्तम् ॥६॥ अध्या. | २०/६ |
| विघ्नः | = | चिकीर्षितकार्यप्रतिबन्धकदुरितः । सा. | ४७ |
| विघ्नजयः | = | बाह्यान्तर्व्याधिमिथ्यात्वजयव्यंग्याशयात्मकः ।<br>कंटकज्वरमोहानां जयैर्विघ्नजयः समः ॥१३॥ द्वा. | १०/१३ |
| | = | मोक्षपथप्रवृत्तप्रत्यूहस्य जघन्यमध्यमोत्कृष्टस्याशुभभावरूपस्य प्रणिधानजनितशुभभावान्तरेणाभिभवः । पं. | ४/२९ |
| | = | विघ्नस्य जयोऽस्मादिति व्युत्पत्त्या धर्मान्तरायनिवर्त्तकः परिणामः । यो.विं. | १ |
| विचारः | = | अर्थव्यञ्जनयोगसङ्क्रान्तिः । त.भा. | ९/४६ |
| विचारयन् | = | शास्त्रानुसारिण्या सूक्ष्मप्रज्ञया प्रतिसंदधत् । उ.र. | ८२ |
| विचिकित्सा | = | चित्तविप्लवः यद्वा विचिकित्सा निन्दा । यो.शा. | २/१७ |
| | = | मतिविभ्रमो युक्त्यागमोपपन्नेऽप्यर्थे फलं प्रति संमोहः, | |
| | * | विद्वद् जुगुप्सा-विद्वांसः साधवो विदितसंसारस्वभावाः परित्यक्तसर्वसङ्गास्तेषां जुगुप्सा निन्दा । श्रा. | ८७ |
| | = | विचिकित्सा नामेदमप्यस्तीति मतिविप्लुतिः । त.भा. | ७/१८ |
| | = | विचिगिच्छा सफलं पइ संदेहो मुणिजणम्मि उ दुगंछा, | |
| | * | जिनवचनाराधनफलं प्रति सन्देहः, | |
| | * | विचिकित्सा क्रियाविषयैव । स.स. | ३० |
| विज्ञप्तिः | = | प्रज्ञागुणजननक्रमेण तत्त्वचिन्तया बोधिर्जन्यते,<br>इचं च करणत्रयव्यापाराभिव्यङ्ग्यं<br>प्रशमसंवेगनिर्वेदानुकम्पास्तिक्याभिव्यक्तिलक्षणं<br>सम्यग्दर्शनमुच्यते तदन्ये विज्ञप्तिमाहुः । अ.म. | ७० |
| विज्ञानन्दघनम् | = | स्वरूपप्रतिभासप्रशमसुखैकरसतामापन्नं<br>परिशुद्धमनुपहितस्फटिकरत्नवत् प्रकृत्यैव निर्मलम् । ध.प. | ९६ |
| विज्ञानम् | = | मोहसन्देहविपर्ययव्युदासेन ज्ञानम् । ल.वि. | १४७ |
| विज्ञाय | = | उपपत्तिगर्भाप्तोपदेशाद्विनिश्चित्य । अ. | १०/७ |
| वितथाभिनिवेशम् | = | अतत्त्वाध्यवसायम् । पञ्च. | २ |
| वितर्कः | = | श्रुतम् । त.भा. | ९/४५ |
| विद्या | = | ससाधना स्त्रीस्वामिका वा । यो.बिं. | ५७ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| विद्यावन्तः | = सिद्धो बहुविज्जमंतो, विज्जावंतो य उचियन्नु । स.स. | ३५ |
| विधानतः | = कषायनिरोधब्रह्मचर्यदेवपूजादिरूपात् । द्वा. | १२/२० |
| विधानम् | = परप्रयोजनस्य करणप्रतिज्ञा । सा. | ७ |
| विधिः | = अविरुद्धकर्त्तव्यार्थोपदेशकं वाक्यम् । ध.प. | ८७ |
| | = आगमनीतिः । पं. | ९/१३ |
| | = इहलोकपरलोकयोरविरुद्धफलमनुष्ठानम् । ल.वि. | १२ |
| | = उपस्थितस्य प्रश्नाचारकथनपरीक्षादिर्विधिरिति । ध. | २४८ |
| | = करणप्रकारः । यो.बिं. | १३२ |
| | = कल्पः । पं. | ८/२ |
| | = गिण्हति सयंगहीयं काले विणएण सम्ममुवउत्तो ।<br>अणुभासन्तो पइवत्थु, जाणगो जाणगसमासे ॥ अ. | ८/२ |
| | = निद्राविकथात्यागाञ्जलियोजनभक्तिबहुमानादिः । सा. | ८२ |
| | = योगवंदननिमित्तदिगाकारशुद्धिर्विधिरिति । ध. | १४७ |
| | = विधानं - प्रतिपत्तिक्रमम् । पं. | २/१ |
| | = सत्कारादिर्विधिर्निसङ्गता च । ध. | २०२ |
| विधिवत् | = सूत्रोक्तविधियुक्तं पुरुषाद्यपेक्षया । यो.द. | २६ |
| विधिविशेषः | = विधिविशेषो नाम देशकालसम्पत्<br>श्रद्धासत्कारक्रमकल्पनीयत्वमित्येवमादिः । त.भा. | ७/३४ |
| विधिसेवा | = सर्वाङ्गपरिशुद्धप्रवृत्तिः । षो. | ५/१२ |
| विनयः | = कर्मविनयनसमर्थोऽनुष्ठानविशेषः । पं. | ६/३६ |
| | = गुरुभक्तिव्यञ्जकक्रियाविशेषः । सा. | ३५ |
| | = गुरुभक्त्यभिमुखमनःपरिणामः । सा. | ४६ |
| | = भावप्रतिबन्धः । पं.व. | १००८ |
| | = मनोवाक्कायैः प्रणमनम् । स.स. | १० |
| | = विनीयतेऽपनीयते विलीयते वा ज्ञानावरणाद्यष्टविधं कर्म येन स विनय इत्यागमिकी व्युत्पत्तिः, यतः-जम्हा विणयइ कम्मं, अट्ठविहं चाउरंतमुक्खाय । तम्हा उ वयंति विऊ, विणओ त्ति विलीणसंसारा ॥ स.स. | १७ |
| विनियोगः | = अन्यस्य योजनं धर्मे विनियोगस्तदुत्तरम् ।<br>कार्यमन्वयसंपत्त्या तदवन्ध्यफलं मतम् ॥१५॥ द्वा. | १०/१५ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| | = सिद्धेः उत्तरकार्यम् । षो. | ३/११ |
| | = स्वप्राप्तधर्मस्थानस्य यथोपायं परस्मिन्नपि संपादकत्वम् । यो.विं. | १ |
| विनीतः | = अनुद्धतप्रकृतिः । द्वा. | २०/३२ |
| | = कुशलानुबन्धिभव्यतया । यो.दृ. | २११ |
| विपदः | = अध्यात्मिकाऽऽधिभौतिका-ऽऽधिदैविकलक्षणाः । यो.शा. | १/५ |
| विपर्ययः | = मतिभ्रंशरूपः, योगमार्गाऽप्रतिपत्तिरूपः । यो.बिं. | १०२ |
| विपश्चिद् | = सर्वत्र गुरुलाघवालोचनपूर्वकप्रवृत्तिक एव परमार्थतो विपश्चिद् । अ. | १२/८ |
| विपाकः | = अदृष्टकर्मफलानुभवो दृष्टानर्थपरम्परा वा, | |
| | * नरकादिगत-कर्म्मफलानुभवलक्षणम् । षो. | १०/१० |
| | = आयतिकालपरिणामः । गु. | १/७४ |
| विपाकक्षमा | = इहलोकपरलोकगतानर्थपरंपरालक्षणादालोच्यमानात् क्षान्तिर्विपाकक्षान्तिः । द्वा. | २८/७ |
| विपाकविचयः | = अशुभशुभकर्मपाकानुचिन्तनार्थः । प्रश. | २४८ |
| | = प्रतिक्षणसमुद्भूतो यत्र कर्मफलोदयः । चिन्त्यते चित्ररूपः स विपाकविचयो मतः ॥१२॥ यो.शा. | १०/१२ |
| विपाकसूत्रम् | = विपाकः कर्मणामनुभवस्तं सूत्रयति दर्शयति यत्तत् । त.उ. | १/२० |
| विभङ्गः | = मिथ्यादृष्टिपरिगृहीतोऽवधिः । त.उ. | १/३२ |
| विभुः | = सर्वगतज्ञानात्मा । त.उ. का. | १/१८ |
| विमलम् | = अतितीव्रमिथ्यात्वादिमलविकलम् । यो.बिं. | ९९ |
| | = अमलीमसम् । यो.बिं. | २०७ |
| विरतिः | = ज्ञात्वाऽभ्युपेत्याकरणम् । त.भा. | ७/१ |
| | = णाणस्स फलं विरती पावे... । उ.प. | ४४८ |
| | = प्रत्याख्येयार्थेषु निवृत्तिपरिणामः । पं. | ५/५० |
| | = समतासारम् । ध.प. | १०० |
| विरागः | = विगतो रागः प्रमादो यस्य स विरागः । अ. | १०/१ |
| विवादः | = छलजातिप्रधानोक्तिर्दुस्थितेनार्थिना सह । विवादोऽत्रापि विजयालाभो वा विघ्नकारिता ॥ द्वा. | ८/३ |
| | = जयप्राप्तावपि परलोकादिबाधको वादः, | १२/१ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | * | छलजातिप्रधानो वादः । अ. | १२/४ |
| विविक्तचर्या | = | स्त्री-पशु-पण्डक-कुशीलवर्जानवद्याश्रयाश्रयणम् । पं. | १९/२ |
| विविदिषा | = | सुखया तत्त्वचिन्तारूपमध्यवसानं जन्यते तदन्ये विविदिषामाचक्षते । अ.म. | ७० |
| विवेकः | = | कार्याकार्यज्ञानम् । द्वा. | ४/३० |
| | = | तानेवार्थान् द्विषतस्तानेवार्थान् प्रलीयमानस्य । निश्चयतो नानिष्टं न विद्यते किंचिदिष्टं वा ॥ इत्यादि निश्चयालोचनम् । द्वा. | १८/२२ |
| | = | नैरन्तर्येण भगवद्वचनपरिभावनम् । सा. | ६३ |
| | = | विवेचनं विशोधनं प्रत्युपेक्षणमित्यनर्थान्तरम् । त.भा. | ९/२२ |
| | = | हेयोपादेयज्ञानम्, | ३/१६ |
| | * | कृत्याकृत्यविचारणम् । यो.शा. | ४/१२ |
| विवेकप्रायश्चित्तम् | = | असणाइगस्स पायं अणेसणीयस्स कहवि गहियस्स । संवरणे संचाओ एस विवेगो उ नायव्वो ॥१०॥ विं. | १६/१० |
| विवेकिनः | = | लब्धपरमार्थविमर्शाः । यो.बिं. | ४०३ |
| विशदीकरोमि | = | निश्चितप्रामाण्यकज्ञानविषयतया प्रदर्शयामि । कू. | १ |
| विशिष्टसुखम् | = | परिणामसुन्दरस्य सुखस्यानुकूलविषयानुभवजन्य-शर्मलक्षणम् । उ.प. | ९७१ |
| विशुद्धः | = | निनानादिसकलकलङ्कविकलः । | ५/८ |
| विशुद्धयोगः | = | निरवद्यमनोवाक्कायव्यापारः । पं. | ७/३६ |
| विशुद्धात्मा | = | अत्यन्तापायहेतुमलरहितः । शा.वा. | १० |
| विशुद्धिः | = | बहुतरपर्यायपरिज्ञानकारणत्वम् । त.उ. | १/२६ |
| विशेषज्ञः | = | वस्त्ववस्तुनोः कृत्याऽकृत्ययोः स्व-परयोर्विशेषमन्तरं जानाति निश्चिनोतीति विशेषज्ञः । यो.शा. | १/५५ |
| विशेषतो गृहस्थधर्मः | = | अतिचाररहिताणुव्रतादिपालनम् । ध. | १६८ |
| विशेषश्रद्धा | = | उत्तरगुणातिशयोपादित्सा । गु. | १/६६ |
| विश्रोतसिका | = | संयम-शस्यमङ्गीकृत्याव्यवसायसलिलस्य विश्रोतो गमनमिति । श्रा. | ५९ |
| | = | संयमानुसारिचेतोविघातः । पं.व. | ९०८ |
| विषम् | = | स्थावरजङ्गमभेदभिन्नम् । यो.बिं. | १५५ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| विषयः | = | ज्ञानगम्यः पदार्थः । त.उ. | १/२६ |
| विषयप्रतिभासज्ञानम् | = | विषयकण्टकरत्नादौ बालादिप्रतिभासवत् । विषयप्रतिभासं स्यात्, तद्धेयत्वाद्यवेदकम् ॥२॥ अ. | ९/२ |
| | = | विषयप्रतिभास इत्याख्या यस्य, विषयस्यैव हेयत्वादिधर्मानुपरक्तस्य प्रतिभासो यत्र तत् । द्वा. | ६/२ |
| विषयानुरागः | = | शब्दादिविषयानुषङ्गः । अ.म. | २१ |
| विषयाभ्यासः | = | मोक्षमार्गस्वामिन्यर्हदादौ पूजादिकरणाभ्यासो विषयाभ्यासः । उ.र. | १८६ |
| | = | विषयेऽर्हल्लक्षणे मोक्षमार्गस्वामिनि योऽभ्यासः पूजादिकरणस्य सः । उ.प. | ९४९ |
| | = | विषयेऽर्हल्लक्षणे मोक्षमार्गस्वामिनि वा विनयादिवृत्तिः सः । ध.प. | १७ |
| विषादः | = | दैन्यम् । अ. | १०/३ |
| विषानुष्ठानम् | = | आहारोपधिपूजर्द्धिप्रभृत्याशंसया कृतम् । शीघ्रं सच्चित्तहन्तृत्वाद्विषानुष्ठानमुच्यते ॥३॥ अध्या. | १०/३ |
| | = | लब्ध्याद्यपेक्षातः क्षणात्सच्चित्तमारणात् यद् अनुष्ठानम् तद् । द्वा. | १३/१२ |
| विसंवादनम् | = | सत्यवदभ्युपगमे तदपह्नवोपाये व्युत्थापनम् । त.भा. | ६/२१ |
| विहारः | = | मासकल्पादिः । गु. | ३/१३७ |
| वीतरागः | = | क्षीणमोहादिगुणस्थानवर्ती मुनिः । उ.र. | ११४ |
| | = | वीतोऽपेतो रागो येषां ते । पञ्च. | १ |
| वीरः | = | महावीरनामधेयः । त.उ. का. | १/२२ |
| | = | विशेषेण ईरयति कर्म गमयति याति वेह शिवमिति वीरः । ध्या. | १ |
| | = | विशेषेण ईरयति क्षिपति कर्माणीति वीरः, विदारयति यत् कर्म तपसा च विराजते । तपोवीर्येण युक्तश्च तस्माद् वीर इति स्मृतः ॥ इति लक्षणाद् निरुक्ताद्वा वीरः । यो.शा. | १/१ |
| वीर्यः | = | वीर्यान्तरायकर्मक्षयक्षयोपशमप्रभवेणात्मशक्तिविशेषः । ल.वि. | २८४ |
| | = | आन्तरशक्तिविशेषः अथवा उत्साहः । सा. | ११ |
| | = | उत्साहः । त.उ. का. | १/१३ |
| | = | कर्मशत्रुविजयानुकूलः पराक्रमः । द्वा. | ९/८ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| | = चित्तोत्साहरूपम् । पं. | १५/२७ |
| | = वीर्यान्तरायक्षयोपशमादिसमुत्थो जीवपरिणामः । अ. | ८/२ |
| वीर्योल्लासः | = आत्मशक्तिस्फोरणम् । द्वा. | १०/२८ |
| वृत्तः | = एकवारं प्रकटीभूतः । गु. | २/३२ |
| वृत्तम् | = अनाचारपरिहारः सम्यगाचारपरिपालनं च । यो.शा. | १/५४ |
| | = विधिप्रतिषेधरूपं वर्तनम् । षो. | १/७ |
| वृत्तयुक्तः | = अणुव्रतमहाव्रतसमन्वितः । यो.बिं. | ३५८ |
| वृत्तिभिक्षा | = निःस्वान्धपङ्गवो ये तु न शक्ता वै क्रियान्तरे । | |
| | भिक्षामटन्ति वृत्त्यर्थं, वृत्तिभिक्षेयमुच्यते ॥ अ. | ५/६ |
| वृत्तिसंक्षयः | = अन्यसंयोगवृत्तीनां यो निरोधस्तथा तथा । | |
| | अपुनर्भावरूपेण, स तु तत्संक्षयो मतः ॥ यो.बिं. | ३६६ |
| | = विकल्पस्यन्दरूपाणां वृत्तीनामन्यजन्मनाम् । | |
| | अपुनर्भावतो रोधः प्रोच्यते वृत्तिसंक्षयः ॥ द्वा. | १८/२५ |
| | = मनोद्वारा विकल्परूपाणां शरीरद्वारा | |
| | परिस्पन्दरूपाणामन्यसंयोगात्मकवृत्तीनामपुनर्भावेन निरोधः । | |
| | यो.विं. | ३ |
| वृत्तिसंक्षेपः | = वृत्तेः भिक्षाचर्यायाः संक्षेपणम् अल्पताकरण् । पं. | १९/२ |
| वृत्तिसंज्ञिका भिक्षा | = क्रियान्तरासमर्थत्वेन प्रयुक्ता, न तु मोहेन | |
| | चारित्रशुद्धीच्छया वा भिक्षा । द्वा. | ६/१२ |
| वृद्धाः | = श्रुतवयोवृद्धलक्षणा । यो.बिं. | ११० |
| वेदना | = ज्ञानाख्या चेतना बोधः कर्म्माख्या द्विष्टरक्तता । | |
| | जन्तोः कर्मफलाख्या सा वेदना व्यपदिश्यते ॥४५॥ अध्या. | १८/४५ |
| वेदनीयम् | = सातासातरूपेण वेद्यत इति । श्रा. | १० |
| वेद्यसंवेद्यपदम् | = वेद्यं संवेद्यते यस्मिन्नपायादिनिबन्धनम् । | |
| | तथाऽप्रवृत्तिबुद्ध्यापि, स्त्र्याद्यागमविशुद्ध्या ॥७३॥ | ७३ |
| | * तत्पदं साध्ववस्थानाद्भिन्नग्रन्थ्यादिलक्षणम् । | |
| | अन्वर्थयोगस्तन्त्रे वेद्यसंवेद्यमुच्यते ॥७४॥ यो.दृ. | ७४ |
| वैक्रियम् | = विक्रिया विकारो विकृतिर्विकरणमित्यनर्थान्तरम् । त.भा. | २/४९ |
| वैनयिकीबुद्धिः | = भरनित्थरणसमत्था तिवग्गसुत्तत्थगहियपेयाला । | |
| | उभओलोगफलवई विणयसमुत्था हवइ बुद्धी ॥४३॥ उ.प. | ४३ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| वैयावृत्त्यम् | = अन्नपानौषधभैषजदानादिना पादधावनशरीरसंवाहनशयनासन-रचनादिना च साधुजनोपकारिणा चित्ररूपेण क्रियाविशेषेण व्यावृत्तभावः । उ.प. | २३५ |
| | = उपधिप्रतिलेखनाहाराद्यानयनादिकम् । सा. | १८ |
| | = व्यावृत्तभावलक्षणमाहारादिना । यो.दृ. | २६ |
| | = व्यावृत्तस्य भावः कर्म वा वैयावृत्त्यं तस्मिन् तत्प्रतिपत्तिविश्रामणाभ्यर्चनादौ । पं. | १/४ |
| | = व्यावृत्तस्य-अशनादिदानव्यापारवतो भावः कर्म वा । पं. | १९/३ |
| वैराग्यम् | = माध्यस्थ्यं वैराग्यं विरागता शान्तिरुपशमः प्रशमः । दोषक्षयः कषायविजयश्च वैराग्यपर्यायाः ॥१७॥ प्रश. | १७ |
| | = भवस्वरूपविज्ञानाद् द्वेषान्नैर्गुण्यदृष्टिजात् । तदिच्छोच्छेदरूपं द्राग् वैराग्यमुपजायते ॥१॥ अध्या. | ५/१ |
| | = विरागस्य भावो । ध्या. | ६० |
| | = वैराग्यं नाम शरीरभोगसंसारनिर्वेदोपशान्तस्य बाह्याभ्यन्तरेषूपधिष्वनभिष्वङ्ग इति । त.भा. | ७/७ |
| व्यञ्जनम् | = प्रतिनियताभिप्रायस्फुटीकरणम् । त.उ. | १/३५ |
| व्ययः | = भर्त्तव्यभरण-स्वभोग-देवताऽतिथिपूजनादिप्रयोजने द्रव्यविनियोगः । यो.शा. | १/५१ |
| व्यवस्था | = मर्यादा । अ. | १७/२ |
| व्यवहरणम् | = व्यवहारः स्नानपानदहनपचनादिका क्रिया । द्वा. | ८/१२ |
| व्यवहारः | = कारणस्यापि कार्यत्वोपचाररूपः । यो.बिं. | ३६९ |
| | = धर्मप्रधानः । ध. | १९७ |
| | = लौकिकसम उपचारप्रायो विस्तृतार्थो व्यवहारः । त.भा. | १/३५ |
| व्यवहारतः | = सामान्येन फलं प्रति योग्यतामधिकृत्य । यो.श. | ४ |
| व्यवहारनयः | = व्यवहारप्रधानो नयः । गु. | १/४८ |
| व्याख्याप्रज्ञप्तिः | = व्याख्याया जीवादिगताया यत्र नयद्वारेण प्ररूपणा क्रियते सा । त.उ. | १/२० |
| व्याधिः | = कुष्ठादिलक्षणः । यो.दृ. | ७९ |
| व्यापन्नदर्शनाः | = अर्हद्देवतादिवचोव्यवहारतः सम्यग्दृष्टिवदाभासमाना अपि निश्चयतो विनष्टसम्यग्दर्शनाः । गु. | १/६० |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | = | अनन्तधर्म्मात्मके वस्तुनि इतरधर्म्मप्रतिक्षे-पेणान्यतरधर्म्मस्वीकाराध्यवसायजनितैकेकनय-व्यामोहवशसञ्जातमिथ्यात्वोदयेन व्यापन्नं नष्टं दर्शनं सर्वनयमयवस्तुबोधरूपं सम्यक्त्वं येषां ते । स.स. | ११ |
| व्युत्सर्गप्रायश्चित्तम् | = | कुस्सुमिणमाइएसुं विणाऽभिसंधीइ जो अईयारो । तस्स विसुद्धिनिमित्तं काउस्सग्गो विउस्सग्गो ॥११॥ विं. | १६/११ |
| व्रतप्रतिमा | = | पंचाणुव्वयधारित्तमणइयारं वएसु पडिबंधो । वयणा तदणइयारा वयपडिमा सुप्पसिद्ध त्ति ॥५॥ विं. | १०/५ |
| व्रतम् | = | हिंसानृतस्तेयाब्रह्मपरिग्रहेभ्यो विरतिर्व्रतम् । त.भा. | ७/१ |
| व्रतस्थाः | = | हिंसानृतादिपापस्थानविरतिमन्तः । यो.बिं. | १२२ |
| व्रती | = | निःशल्यो व्रती । त.भा. | ७/१३ |
| | | **[ श ]** | |
| शकुनः | = | पूर्णकलशः, | ६/९ |
| | * | दधिदूर्वाक्षतभारोद्धृतमृत्तिकादिग्रहणम्, | ६/९ |
| | * | चित्तोत्साहानुगो मनःप्रत्ययानुसारी । षो. | ६/९ |
| शक्तिः | = | चित्तवित्तगतं सामर्थ्यम् । पं. | ९/६ |
| शक्यारंभः | = | स्वकृतिसाध्यधर्मादिप्रवृत्तिः । द्वा. | १८/३१ |
| शङ्का | = | देवे गुरूंमि तत्ते अत्थि नवत्थित्ति संसओ संका, | २९ |
| | * | सकलपदार्थभाक्त्वेन द्रव्यगुणविषया । स.स. | ३० |
| | = | अधिगतजीवाजीवादितत्त्वस्यापि भगवतः शासनं भावतोऽभिप्रपन्नस्यासंहार्यमतेः सम्यग्दृष्टेरर्हतोक्तेषु अत्यन्तसूक्ष्मेष्वतीन्द्रियेषु केवलागमगम्येष्वर्थेषु यः सन्देहो भवत्येव स्यादिति सा शङ्का । त.भा. | ७/१८ |
| | = | संशयकरणम् भगवदर्हत्प्रणीतेषु पदार्थेषु धर्मास्तिकायादिष्वत्यन्तगहनेषु मतिदौर्बल्यात्सम्यगनवधार्यमाणेषु संशयः । श्रा. | ८७ |
| | = | सन्देहः । यो.शा. | २/१७ |
| शठः | = | मायावी । यो.बिं. | ८७ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| शबलः | = | चारित्रसत्तापेक्षया शुद्धत्वादतिचारापेक्षया चाशुद्धत्वाच्छबल उच्यते । | ४/४१ |
| शब्दः | = | यथार्थाभिधानं शब्दः । त.भा. | १/३५ |
| शब्दनयाः | = | प्रायः ऋजुसूत्रसमानविषया एव । अ.म. | ४४ |
| शमः | = | कषायेन्द्रियजयः । यो.शा. | २/४० |
| | = | कषायेन्द्रियमनसां निरोधः । अ. | ११/८ |
| | = | प्रशमः क्रूराणामनन्तानुबन्धिनां कषायाणामनुदयः, | २/१५ |
| | * | अन्ये तु क्रोधकण्डू-विषयतृष्णोपशमः शम इत्याहुः, | |
| | * | अन्ये, सुपरीक्षितप्रवक्तृप्रवाच्यप्रवचनतत्त्वाभिनिवेशाद् मिथ्याभिनिवेशोपशमः शमः । यो.शा. | २/१५ |
| | = | विकल्पविषयोत्तीर्णः स्वभावालम्बनः सदा । ज्ञानस्य परिपाको यः स शमः परिकीर्तितः ॥१॥ ज्ञा. | ६/१ |
| शमसौख्यम् | = | अतिमन्दीभूतकषायविषदोषतया प्रशमशर्म । यो.बिं. | ५४ |
| शय्या | = | वसतिः सर्वाङ्गीणशयनं वा । पं. | १०/१६ |
| शय्यातरः | = | शय्यया-वसत्या तरति संसारसागरम् इति । पं. | १७/५ |
| शय्यातरपिंडभोजी | = | सिज्जाअरो त्ति भण्णइ, आलयसामी उ तस्स जो पिंडो । असणाई तं भुंजइ, सिज्जायरपिंडभोई उ ॥ गु. | ३/७३ |
| शरणम् | = | भयार्त्तत्राणं, तच्च संसारकान्तारगतानां अतिप्रबलरागादिपीडितानां दुःखपरम्परासंक्लेशविक्षोभतः समास्वा(श्वा) सनस्थानकल्पं, तत्त्वचिन्तारूपमध्यवसानं, विविदिषेत्यर्थः ल.वि. | १४६ |
| शरण्यः | = | गुणाधिकः, गुणाधिकत्वेनैव ततो रक्षोपपत्तेः । यो.श. | ५० |
| शान्तः | = | क्रोधाद्यबाधितः । यो.बिं. | १९३ |
| | = | तथाविधेन्द्रियकषायविकारविकलः । यो.बिं. | १८६ |
| | = | तालु-नासाऽऽननद्वारैर्निरोधः शान्त उच्यते । यो.शा. | ५/८ |
| शासनद्वेषः | = | आप्तवचनं प्रति मत्सरः । अ. | ७/५ |
| शासनमालिन्यम् | = | जिनप्रवचनस्य लोकविरुद्धाचरणेनोपघातः । अ. | २३/१ |
| शास्त्रज्ञानम् | = | हस्तस्पर्शसमम् । अ.उ. | १/१० |
| शास्त्रतत्त्वम् | = | पंडितैकगम्यम्, उत्सर्गादिसमन्वितं, प्रत्यक्षादिनाऽऽगमान्तरेण चाऽविरुद्धार्थं, तात्पर्यतः शुद्धम् । द्वा. | २/९ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| शास्त्रम् | = | तत्त्वतो ब्रह्मणः शास्त्रं लक्षकं न तु दर्शकम् । अ.उ. | २/४ |
| | = | पापमयौषधं शास्त्रं, शास्त्रं पुण्यनिबन्धनम् ।<br>चक्षुः सर्वत्रगं शास्त्रं, शास्त्रं सर्वार्थसाधनम् ॥ यो.बिं. | २२५ |
| | = | यस्माद्रागद्वेषोद्धतचित्तान्समनुशास्ति सद्धर्मे ।<br>संत्रायते च दुःखाच्छास्त्रमिति निरुच्यते सद्भिः ॥१८७॥ प्रश. | १८७ |
| | * | शासनसामर्थ्येन तु संत्राणबलेन चानवद्येन ।<br>युक्तं यत्तत्छास्त्रं तच्चैतत्सर्वविद्वचनम् ॥१८८॥ प्रश. | १८८ |
| | = | शासनात् त्राणशक्तेश्च, बुधैः शास्त्रं निरुच्यते ॥ ज्ञा. | २४/३ |
| | = | शासनात् त्राणशक्तेश्च, बुधैः शास्त्रं निरुच्यते ।<br>वचनं वीतरागस्य, तच्च नाऽन्यस्य कस्यचित् ॥१२॥ अ.उ. | १/१२ |
| | = | सुनिश्चिताप्तागमः । अ. | २/५ |
| शास्त्रयत्नः | = | शास्त्रादरपरः । यो.बिं. | २२४ |
| शास्त्रयोगः | = | यथाशक्त्यप्रमत्तस्य तीव्रश्रद्धावबोधतः ।<br>शास्त्रयोगस्त्वखंडार्थाराधनादुपदिश्यते ॥४॥ द्वा. | १९/४ |
| | = | शास्त्रयोगः पुनर्ज्ञेयो यथाशास्त्रं स एव हि ।<br>कायादिसंयमोपेतः अव्याक्षिप्तस्य भावतः ॥१९०॥ ब्र.सि. | १९० |
| | = | शास्त्रयोगस्त्विह ज्ञेयो यथाशक्त्यप्रमादिनः ।<br>श्रद्धास्य तीव्रबोधेन वचसाऽविकलस्तथा ॥२॥ ल.वि. | ४४ |
| | = | शास्त्रयोगस्त्विह ज्ञेयो, यथाशक्त्यप्रमादिनः ।<br>श्राद्धस्य तीव्रबोधेन, वचसाऽविकलस्तथा ॥४॥ यो.दृ. | ४ |
| शास्त्रवित् | = | तेन स्याद्वादमालम्ब्य, सर्वदर्शनतुल्यताम् ।<br>मोक्षोद्देशाऽविशेषेण, यः पश्यति स शास्त्रवित् ॥७०॥ अ.उ. | १/७० |
| शास्त्रार्थः | = | माध्यस्थ्यमेव शास्त्रार्थो, येन तच्चारु सिध्यति ।<br>स एव धर्मवादः स्यादन्यद् बालिशवल्गनम् ॥७१॥ अ.उ. | १/७१ |
| शिक्षः | = | अचिरप्रव्रजितः शिक्षयितव्यः शिक्षः । त.भा. | ९/२४ |
| शिक्षा | = | अन्योपदेशरूपा । त.उ. | १/२२ |
| शिक्षापदम् | = | शिक्षा परमपदप्रापिका क्रिया, तस्याः पदम् । श्रा. | २९२ |
| शिक्षाभ्यासः | = | शिक्षति ग्रहणसेवनरूपा । श्रा. | २९६ |
| शिक्षाव्रतम् | = | शिक्षा-ग्रहणासेवारूपा परमपदसाधिका विशिष्टचेष्टा<br>तत्प्रधानं व्रतम् । पं. | १/२५ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| शिल्पम् | = साचार्यकम्, नित्यव्यापारः । उ.प. | ३८ |
| शिल्पी | = वैज्ञानिकः । यो.बिं. | १८९ |
| शिवः | = सकलोपप्लवकलाविकलो देवताविशेषः । यो.बिं. | १ |
| शिष्टसमयः | = शिष्टाः क्वचिदिष्टे वस्तुनि प्रवर्तमानाः सन्त इष्टदेवतानमस्कारपूर्वकं प्रवर्तन्ते । यो.दृ. | १ |
| शिष्टाः | = शिष्यन्ते स्म शिष्टा वृत्तस्थ-ज्ञानवृद्धसेवोपलब्धविशुद्धशिक्षाः पुरुषविशेषाः । यो.शा. | १/४७ |
| शीलम् | = असङ्गतया समशत्रुमित्रता शीलम् । ध. | २६७ |
| | = चित्तसमाधिः । द्वा. | १८/८ |
| | = चित्तसमाधिः । यो.बिं. | ३५९ |
| | = परद्रोहविरतिलक्षणः । द्वा. | २३/३ |
| | = मद्य-मांस-निशाभोजनादिपरिहाररूपः समाचारः । यो.शा. | १/४७ |
| | = सुस्वभावता । यो.शा. | २/४० |
| | = अष्टादशशीलाङ्गसहस्रसंख्यम्, | |
| | * यदि वा महाव्रतसमाधानम् पञ्चेन्द्रियजयः कषायनिग्रहस्त्रिगुप्तिगुप्तता चेत्येतच्छीलम् । ध.प. | ६ |
| शीलवृत्तिः | = हिंसानृतादत्ताब्रह्मपरिग्रहविरमणरूपकुशलानुष्ठानवर्त्तनम् । अ. | २४/८ |
| शीलांगानि | = चारित्रांशरूपाणि । पं. | १४/१ |
| शुक्लध्यानम् | = स्वर्गापवर्गहेतुर्धर्म्यध्यानमिति कीर्तितं तावत् । अपवर्गैकनिदानं शुक्लमतः कीर्त्यते ध्यानम् ॥१॥ यो.शा. | ११/१ |
| | = शुचं क्लमयतीति शुक्लम् शोकं ग्लपयतीत्यर्थः । ध्या. | १ |
| | = शोधयत्यष्टप्रकारं कर्म-मलं शुचं वा क्लमयतीति शुक्लम् । ध्या. | ५ |
| शुक्लपाक्षिकः | = अपार्धपुद्गलावर्तान्तर्गतसंसारः । यो.बिं. | ७२ |
| शुचिः | = हस्तपादमुखप्रक्षालनशिरःस्नानरूपदेशसर्वभेदभिन्नद्रव्यस्नानम्, | |
| | * शुद्धाध्यवसायरूपभावस्नानम् । षो. | ९/५ |
| शुद्धचेतः | = विदलन्महामोहमलपटलमनः । अ. | |
| शुद्धदेशना | = क्षुद्रसत्त्वमृगयूथसंत्रासनसिंहनादः । पञ्च. | ४ |
| शुद्धधर्मः | = सर्वापाधिविशुद्धसिद्धिवधूदूतः अर्हत्मार्गः । स.स. | ५४ |
| शुद्धम् | = अनवद्यम् । यो.बिं. | २०७ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| | = अविध्यासेवनमलरहितम् । शा.वा. | २१ |
| | = निर्वाणावन्ध्यबीजकल्पम् । यो.बिं. | १८८ |
| | = पर्यायक्रमेण तेजोलेश्याऽभिवृद्ध्या शुक्लशुक्लाभिजात्यभावादतिनिर्मलम् । गु. | ४/१६० |
| शुद्धवचनम् | = पूर्वापराऽविरुद्धं निरवद्यं वचनम् । उ.र. | ९८ |
| शुद्धानुष्ठानभाक् | = परिशुद्धशुश्रूषाधर्मरागादिसमाचारभाक् । यो.बिं. | २०६ |
| शुद्धानुष्ठानसाधनम् | = निरवद्याचरणकारणम् । यो.बिं. | १८६ |
| शुद्धिः | = घातिकर्मणां पापानां क्षये या काचिन्निर्मलता । यो.विं. | १ |
| | = ज्ञानादिगुणविघातिघातिकर्मह्रासोत्थनिर्मलता । द्वा. | १०/१० |
| | = पापक्षयेण सम्यग् ज्ञानादिगुणविघातकघातिकर्मव्यपगमेन निर्मलता । षो. | ३/४ |
| | = मिथ्यात्वकषायनोकषायाद्यात्मकमलस्य शुक्लध्यानजलक्षालनेन निर्मलता । स.स. | १ |
| शुद्धोञ्छः | = द्विचत्वारिंशद्दोषविकलः स चासावुञ्छश्च भिक्षावृत्तिरूपः । उ.प. | ६७७ |
| शुद्धोञ्छजीवनम् | = आधाकर्मादित्यागेन सुपरिशुद्धं कल्पनीत्यनुसारतः । यो.श. | ३५ |
| शुभः | = कुशलसाधकः । शा.वा. | ७ |
| | = प्रशस्तः मोक्षाभ्युदयफलसाधकत्वात् । पं. | ३/३९ |
| शुभकर्मासेवनम् | = शुभं कर्मानुकम्पादर्शनविशुद्ध्यादिहेतुकं तस्यासेवनमभ्यासः । त.उ. का. | १/११ |
| शुभभावः | = प्रशस्तद्रव्यलेश्योपरञ्जितचित्तप्रसूतादध्यवसायः । सा. | ४७ |
| शुभभावाश्रयः | = परिशुद्धचित्तपरिणामस्थानम् । यो.बिं. | १८७ |
| शुभयोगः | = उपयुक्तया प्रत्युपेक्षणादिकरणम्, संयमस्वभावादेव । ध.प. | ५१ |
| शुभलेश्या | = प्रशस्तभावरूपा । पञ्च. | ४ |
| शुभाशयः | = प्रशस्ताध्यवसायः, | |
| | * शुभाभिसन्धिस्वभावः । अ. | ५/३ |
| | = स्वपुष्टिशुद्ध्यनुबन्धहेतवः शुभपरिणामाः । द्वा. | १०/१० |
| शुभोदयः | = तथाविधप्राग्भवोपात्ताऽद्भुतभूतपुण्यपरिपाकः । यो.बिं. | २८३ |
| | = प्रशस्तफलोद्गमहेतुः । यो.बिं. | ५४ |
| शुश्रूषणम् | = परिचरणम् । द्वा. | ४/१८ |
| शुश्रूषा | = श्रवणग्रहणधारणादेः सिद्धिः फलं यस्याः सा तथा । षो. | ११/२ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | = | श्रोतुमिच्छा, | |
| | * | सद्बोधावन्ध्यनिबन्धनधर्मशास्त्रश्रवणवाञ्छा । पं. | १/४ |
| | = | सद्धर्मशास्त्रविषया श्रोतुमिच्छा । यो.बिं. | २५३ |
| शुष्कवादः | = | परानर्थो लघुत्वं वा विजये च पराजये ।<br>यत्रोक्तौ सह दुष्टेन शुष्कवादः स कीर्तितः ॥ द्वा. | ८/२ |
| | = | शुष्क इव शुष्को निरसः गलतालुशोषमात्रफलः, | १२/१ |
| | * | विप्रतिपत्ति विषयमाश्रित्य प्रतिवादिना सह वदनं शुष्कवादः, | १२/१ |
| | * | अनर्थवादः । अ. | १२/२ |
| शोकः | = | इष्टवियोगान्मानसं दुःखम् । गु. | ४/२ |
| | = | उद्वेगम् । अ. | २१/२ |
| | = | तदत्ययादिचिन्ताप्रभावो दुःखभेदः । शा.वा. | १६ |
| | = | इष्टवियोगादिजो मनोविकारः । यो.दृ. | ७९ |
| शौचः | = | अलोभः । त.भा. | ९/६ |
| | = | द्रव्यतो भावतश्च-द्रव्यतः स्नातः श्रीचन्दनानुलिप्तगात्रः<br>सितवसननिवसनः शुचिविद्याक्लृप्तगात्रश्च, भावतस्तु<br>विशुध्यमानमानसः । पं. | २/२३ |
| | = | आलोयणाइदसविहजलओ पावमलखालणं विहिणा ।<br>जं दव्वसोयजुत्तं तं सोयं जइजणपसत्थं ॥१२॥ विं. | ११/१२ |
| | = | आचारशुद्धिः । यो.शा. | ३/१६ |
| | = | संयमं प्रति निरुपलेपता । यो.शा. | ४/९३ |
| | | **[ श्र ]** | |
| श्रद्धा | = | भवजलहिमहाणावं - णिरवेक्खा-साणुबंधा य ॥ पं. | २/६ |
| | = | इदमित्थमेवेति प्रतिपत्तिः । यो.विं. | ७ |
| | = | धृत्या मार्गानुसारितत्त्वरूचिर्जन्यते, सा एव श्रद्धा । अ.म. | ७० |
| | = | निजोऽभिलाषः मिथ्यात्वमोहनीयकर्मक्षयोप-<br>शमादिनजन्यश्चेतसः प्रसाद इत्यर्थः ।<br>अयञ्च जीवादितत्त्वार्थानुसारी समारोप-<br>विघातकृत् कर्म्मफलसम्बन्धास्तित्वादि-<br>संप्रत्ययाकारः चित्तकालुष्यापनायी धर्म्मः । ल.वि. | २७२ |
| | = | रुचिः धर्म्मप्रशंसादिरूपा । ल.वि. | १३८ |

| नाम | व्याख्या | गाथा |
| --- | --- | --- |
| | = रुचिस्तत्त्वमार्गानुगा । यो.बिं. | ५२ |
| | = वस्तुगुणदोषपरिज्ञानपूर्वकचारित्रेच्छा । द्वा. | ६/४ |
| | = विशुद्धचित्तपरिणामः । श्रा. | ३२५ |
| | = शुद्धमार्गरुचिः । ल.वि. | ३७० |
| | = शुद्धानुष्ठानगता तीव्ररुचिः । द्वा. | १८/३१ |
| | = स्वाभिप्रायः न बलाभियोगादिः । प्र. | २३ |
| श्रद्धेयम् | = प्रतिपत्तव्यम् । श्रा. | ४०१ |
| श्रमणभूतप्रतिमा | = इक्कारस मासे जाव समणभूयपडिमा उ चरिम त्ति । अणुचरइ साहुकिरियं इत्थ इमो अविगलं पायं ॥१७॥ विं. | १०/१७ |
| श्रमणलिङ्गम् | = श्रमणत्वज्ञापकं पञ्चमुष्ट्यावतारितनिःशेषकेशादिलक्षणम् । त.उ.का. | १/१६ |
| श्रवणं धर्मविषयम् | = उत्तमः श्रुतधर्मः, मोहतमोरविः, पापवध्यपटहः, पकर्षः श्रव्याणाम्, सेतुः सुरलोकस्य, भावामृतमयम्, देशकः शिवगतेः, जिनभावबीजम्, अभिव्यक्तो जिनेन, नातः परं कल्याणम् । यो.श. | ३१ |
| | = विचारसहितवाक्यश्रुतिजनितं ज्ञानम् । त.उ. | १/३ |
| | = श्रोत्रोपयोगः । ल.वि. | १४७ |
| श्रवणयोग्याः | = मज्झत्था बुद्धिजुआ धम्मत्थी ओघओ इमे जोगा । पं.व. | ९७३ |
| श्राद्धः | = तत्त्वं प्रति श्रद्धावांस्तत्प्रत्यनीकक्लेशह्रासातिशयादवाप्त-व्यमहानिधानतद्ग्रहणविधानोपदेशश्रद्धालुनरवत् विहितानुष्ठानरुचिर्वा । उ.प. | १९९ |
| | = तत्त्वं प्रति श्रद्धावान्, * विहितानुष्ठानरुचिः । उ.र. | १० |
| | = तथाविधमोहापगमात्संप्रत्ययात्मिकादिश्रद्धावान् । यो.दृ. | ४ |
| | = तथाविधमोहोपगमात् स्वसंप्रत्ययात्मिकादिश्रद्धावान् । ल.वि. | ४४ |
| | = योगरूढ्या श्रद्धाशालिनः श्रावकाः । सा. | ४३ |
| | = सन्मार्गश्रद्धालुः । यो.बिं. | २२७ |
| | = उत्तरोत्तरानुष्ठानचिकीर्षापरिणामवन्तः । उ.प. | ६७२ |
| | = तत्त्वं प्रति श्रद्धावान् तत्प्रत्यनीकक्लेशह्रासातिशयादवाप्त-व्यमहानिधानतद्ग्रहणविधानोपदेशश्रद्धालुनरवत्, | |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | * | विहितानुष्ठानरुचिः । पं. | ३/६ |
| श्रावकः | = | धम्मोवग्गहदाणाइसंगओ सावगो परो होइ ।<br>भावेण सुद्धचित्तो निच्चं जिणवयणसवणरई ॥१॥ विं. | ९/१ |
| | * | मग्गणुसारी सड्ढो पन्नवणिज्जो कियापरो चेव ।<br>गुणरागी सक्कारंभसंगओ देसचारित्ती ॥२॥ विं. | ९/२ |
| | = | परलोयहियं सम्मं जो जिणवयणं सुणेइ उवउत्तो ।<br>अइतिव्वकम्मविगमा सुक्कोसो सावगो एत्थ ॥२॥ पं. | १/२ |
| | = | प्रतिदिवसं यतिभ्यः सकाशात् साधूनामगारिणां च सामाचारीं<br>श्रृणोतीति । श्रा. | २ |
| | = | संपत्तदंसणाइं पइदियहं जइजणा सुणेई य ।<br>सामायारिं परमं जो खलु तं सावयं बिंति ॥ पं. | १/२ |
| श्रावकदिनकर्तव्यः | = | नवकारेण विबोहो अणुसरणं सावओ वयाइं मे ।<br>जोगो चिइवंदणमो पच्चक्खाणं तु विहिपुव्वं ॥१२॥ विं. | ९/१२ |
| | * | तह चेईहरगमणं सक्कारो वंदणं गुरूसगासे ।<br>पच्चक्खाणं सवणं जइपुच्छा उचियकरणिज्जं ॥१३॥ वि. | ९/१३ |
| | * | अविरुद्धो ववहारो काले विहिभोयणं च संवरणं ।<br>चेइहरागमसवणं सक्कारो वंदणाई य ॥१४॥ विं. | ९/१४ |
| | * | जइविस्सामणुमुचिओ जोगो नवकारचिंतणाईओ ।<br>गिहिगमणं विहिसुवणं सरणं गुरूदेवयाईणं ॥१५॥ विं. | ९/१५ |
| श्रावकधर्मः | = | पंच य अणुव्वयाइं गुणव्वयाइं च हुंति तिन्नेव ।<br>सिक्खावयाइं चउरो सावगधम्मो दुवालसहा ॥३॥ विं. | ९/३ |
| | = | अणुव्रताद्युपासकप्रतिमागतक्रियासाध्यः<br>साधुधर्माभिलाषातिशयरूपः आत्मपरिणामः । ल.वि. | १५५ |
| श्रुतज्ञानम् | = | आद्यं कोष्ठबीजाभं, वाक्यार्थविषयं मतम् ॥६५॥ अ.उ. | १/६५ |
| | = | शब्दशक्तिजन्यं ज्ञानम् । त.उ. | १/९ |
| | = | श्रुतेन निर्वृत्तम्, | १०/१२ |
| | * | स्वच्छस्वादुपथ्यसलिलास्वादतुल्यम्, | १०/१३ |
| | * | ऊहादिना रहितम्, | ११/६ |
| | * | वाक्यार्थमात्रविषयं कोष्ठकगतबीजसन्निभं ज्ञानम् । षो. | ११/७ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| | = सर्वशास्त्राविरोधिनिर्णीतार्थात् वाक्यात्, प्रमाणनयाधिगमरहिताद् उत्पन्नं ज्ञानम् । द्वा. | २/१० |
| श्रुतभक्तिः | = जिनाज्ञापुरस्कारलक्षणा । गु. | ३/९ |
| श्रुतम् | = श्रुतमाप्तवचनम् आगमः, उपदेश ऐतिह्यमाम्नायः प्रवचनं जिनवचनमित्यनर्थान्तरम् । त.भा. | १/२० |
| श्रुतव्यवहारः | = चउदसपुव्वधरेणं, निज्जूढं भद्दबाहुणा सुत्तं । ववहारो सुअणामा, दुवालसंगस्स णवणीयं ॥ गु. | २/१२ |
| श्रुतसामायिकम् | = जघन्योत्कृष्टभेदाद् द्विधा - जघन्यमष्टप्रवचनमातृपठनरूपं इतरच्च द्वादशाङ्गीपठनरूपम् । स.स. | १८ |
| श्रुताज्ञानम् | = मिथ्यादृष्टिपरिगृहीतं श्रुतम् । त.उ. | १/३२ |
| श्वासः | = बाह्यस्य वायोराचमनं श्वासः । यो.शा. | ५/४ |
| | **[ ष ]** | |
| षण्ढाः | = तृतीयवेदोदयवर्त्तिनो महामोहकर्माणः स्त्री-पुंस-सेवनाभिरताः । यो.शा. | १/३० |
| | **[ स ]** | |
| संक्लेशः | = तीव्ररागादिसंवेदनरूपः । पञ्च. | १ |
| | = आत्मनः स्वाभाविकस्वास्थ्यबाधनम् । अ. | १/१ |
| | = चित्तकालुष्यः । अ. | १६/२ |
| संज्ञा | = मुख-नयन-भ्रूविकाराङ्गुल्याच्छोदनादिका अर्थसूचिकाश्चेष्टाः । यो.शा. | १/४२ |
| | = साभिष्वङ्गं नैरन्तर्यादराभ्यां स प्रतिबन्धं चित्तम् । * तदुक्तं, "सञ्ज्ञानं सञ्ज्ञा, मोहाभिव्यक्तं चैतन्यमित्यर्थः" । गु. | ४/१२२ |
| संज्ञाज्ञानम् | = प्रत्यभिज्ञानम् पूर्वापरसंकलनात्मकम् । त.उ. | १/१३ |
| संज्ञाविष्कंभणम् | = आहारादिसंज्ञोदयवंचनलक्षणम् । द्वा. | १०/४ |
| संज्ञिनः | = ईहापोहयुक्ता गुणदोषविचारणात्मिका सम्प्रधारणसंज्ञा तां प्रति संज्ञिनो विवक्षिताः । त.भा. | २/२५ |
| संज्वलनाः | = ईषत्परीषहादिसन्निपातज्वलनात् इति । श्रा. | १७ |
| संपत्तिः | = तद्भावाभिमुख्यम् (तद्-तीर्थकृन्नामकर्मबन्धः) । प्र. | ३२ |
| संप्रार्थना | = भावविशुद्धिपूर्विका प्रार्थना । सा. | ६२ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| संमोहः | = | सन्निपातो युगपद्वातपित्तश्लेष्मसंक्षोभजन्यो व्याधिविशेषः । उ.प. | १९० |
| संयमः | = | आसवदारनिरोहो जमिंदियकसायदंडनिग्गहओ । पेहातिजोगकरणं तं सव्वं संजमो नेओ ॥१०॥ विं. | ११/१० |
| | = | इन्द्रियवशीकारः । यो.शा. | ३/१६ |
| | = | प्राणातिपातादिनिवृत्तिलक्षणः । ध्या. | ६८ |
| | = | योगनिग्रहः । त.भा. | ९/६ |
| | = | संयमो नाम धारणाध्यानसमाधित्रयमेकविषयम् । द्वा. | २६/५ |
| | = | संयमो विरतिर्व्रतमित्यनर्थान्तरम् । त.भा. | ६/२० |
| संयमासंयमः | = | संयमासंयमो देशविरतिरणुव्रतमित्यनर्थान्तरम् । त.भा. | ६/२० |
| संयमोद्युक्ताः | = | पञ्चाश्रवविरमणादिरूपे उत्तरोत्तरानुष्ठानचिकीर्षानुबद्धप्रवृत्तिमन्तः । उ.र. | ९१ |
| संरक्षणानुबन्धः | = | संरक्षणं हि सर्वैर्मारणाद्युपायैस्तस्करादिभ्यो निजवित्तस्य सङ्गोपनम्, तस्यानुबन्धः सातत्येन चिन्तनम् । अ.म. | ७ |
| संरम्भादिः | = | संरम्भः संकल्पः, परितापनया भवेत् समारम्भः । प्राणिवधस्त्वारम्भः, त्रिविधो योगस्ततो ज्ञेयः । त.भा. | ६/९ |
| संलीनता | = | संवृतस्य भावः संलीनता । पं. | १९/२ |
| संलेखना | = | संलिख्यते शरीरकषायादि यया तपःक्रियया सा संलेखना । पं.व. | २ |
| | = | संलिख्यतेऽनया शरीर-कषायादीति, तपोविशेषलक्षणा । श्रा. | ३७८ |
| संवरः | = | आस्रवनिरोधः संवरः । त.भा. | ९/१ |
| | = | सर्वेषामाश्रवाणां तु निरोधः संवरः स्मृतः । यो.शा. | ४/७९ |
| संवरणम् | = | पापव्यापारनिवारणनिरतीचारद्वादशव्रताङ्गीकरणम् । स.स. | ४१ |
| संविग्नः | = | मोक्षसुखाभिलाषी, न तु रिद्धिकामः । श्रा. | १०८ |
| | = | मोक्षार्थी । पञ्च. | २ |
| | = | संविग्नश्चासौ जनश्च संविग्नजनः संवेग १, निर्वेद २, धर्म्मश्रद्धा ३, गुरुसाधर्मिकशुश्रूषा ४, आलोचना ५, निन्दा ६, गर्हा ७, सामायिक ८, चतुर्विंशतिस्तव ९, वन्दन १०, प्रतिक्रमण ११, कायोत्सर्ग्ग १२, प्रत्याख्यान १३, स्तवस्तुतिमङ्गल १४, काल-प्रत्युपेक्षणा १५, प्रायश्चित्तकरण १६, क्षामणा | |

| नाम | व्याख्या | गाथा |
|---|---|---|
| | १७, स्वाध्याय १८, वाचना १९, परिप्रच्छन्ना २०, परावर्त्तना २१, ऽनुप्रेक्षा २२, धर्मकथा २३, श्रुताराधना २४, एकाग्रमनःसंनिवेशना २५, संयम २६, तपः २७, व्यवदानं २८, सुखाशय २९, अप्रतिबन्धता ३०, विविक्तशयनासनसेवना ३१, विनिवर्त्तना ३२, सम्भोगप्रत्याख्यान ३३, उपधिप्रत्याख्यान ३९, भक्तप्रत्याख्यान ४०, सद्भावप्रत्याख्यान ४१, प्रतिरूपता ४२, वैयावृत्त्य ४३, सर्वगुणसम्पूर्णता ४४, वीतरागता ४५, क्षान्ति ४६, मुक्ति ४७, मार्दव ४८, आर्जव ४९, भावसत्य ५०, करणसत्य ५१, योगसत्य ५२, मनोगुप्तता ५३, वाग्गुप्तता ५४, कायगुप्तता ५५, मनःसमाधारणा ५६, वाक्समाधारणा ५७, कायसमाधारणा ५८, ज्ञानसम्पन्नता ५९, दर्शनसम्पन्नता ६०, चारित्रसम्पन्नता ६१, क्षोत्रनिग्रह ६२, चक्षुर्निग्रह ६३, घ्राणनिग्रह ६४, जिह्वानिग्रह ६५, स्पर्शननिग्रह ६६, क्रोधविजय ६७, मानविजय ६८, मायाविजय ६९, लोभविजय ७०, प्रेमद्वेषमिथ्यादर्शनविजय ७१, शैलेश्यकर्मता ७२, इति द्वासप्ततिस्थानसेवकः साधुलोकः । स.स. | ४१ |
| | = संवेगवन्तः । द्वा. | ३/१ |
| संवेगः | = नरविबुहेसरसुक्खं दुक्खं चिय भावओ उ मन्नतो ।<br>संवेगओ न मुक्खं मुत्तूणं किंपि पत्थेइ ॥११॥ विं. | ६/११ |
| | = भवभयम्, | ९/६ |
| | * मोक्षाभिलाषः । षो. | ९/६ |
| | = भवभीरुतापरिणामः । सा. | ३३ |
| | = मोक्षाभिलाषः । यो.विं. | ८ |
| | = मोक्षाभिलाषः ।<br>सम्यग्दृष्टिर्हि नरेन्द्रसुरेन्द्राणां विषयसुखानि दुःखानुषङ्गाद् दुःखतया मन्यमानो मोक्षसुखमेव सुखत्वेन मन्यते अभिलषते च, | |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | * | भयम् । यो.शा. | २/१५ |
| | = | विरतिप्रतिपत्तिकारणभूतान्मोक्षाभिलाषरूपाध्यवसायः । पं. | ५/५० |
| | = | शेषगुणनिबन्धनः । श्रा. | ३ |
| | = | संवेगो मुक्खं पइ अहिलासो भवविरागो ऊ । स.स. | ४४ |
| | = | संसारभीतिः । त.उ. | १/२ |
| | = | "तथ्ये धर्मे ध्वस्तहिंसा प्रबन्धे, देवे रागद्वेषमोहादिमुक्ते ।" साधौ सर्वग्रन्थसन्दर्भहीने, संवेगोऽसौ निश्चलो योऽनुरागः ॥ यो.बिं. | २९० |
| संवेदनमात्रम् | = | तत्त्वपरामर्शशून्यस्पर्शाख्यम् ज्ञानम् । षो. | १२/१५ |
| संशयः | = | अनेकस्मिन् विषयेऽनिश्चयकतया प्रवृत्तिः । उ.प. | १९८ |
| संशुद्धम् | = | अनवद्यम् । यो.बिं. | ४ |
| | = | उपादेयधियात्यन्तं, संज्ञाविष्कम्भणान्वितम् । फलाभिसन्धिरहितं, संशुद्धं ह्येतदीदृशम् ॥२५॥ यो.दृ. | २५ |
| संसारः | = | नरकादिस्थानोत्पत्तिपर्यायलक्षणः । त.उ. | १/३ |
| | = | नरनारकादिपर्यायरूपः । यो.बिं. | ३४१ |
| | = | प्रतिसमयबन्धकसत्त्वसंसृतिरूपः । श्रा. | ४१ |
| | = | महापायः । यो.बिं. | १४९ |
| | = | संसरणं संसारः तिर्यग्नरनारकामरभवानुभवलक्षणः । ल.वि. | ३५० |
| संसारनैर्गुण्यम् | = | जरामरणादिव्यसनबहुलतयाऽसारतापरिज्ञानम् । यो.बिं. | ३४१ |
| संस्कारः | = | प्राच्यप्रयत्नजः । द्वा. | २४/२१ |
| संस्तवः | = | संवादजनितः परिचयः संवसन-भोजनालापादिलक्षणः । श्रा. | ८८ |
| | = | सोपधं निरुपधं च भूतगुणवचनमिति । त.भा. | ७/१८ |
| संस्तारकः | = | शय्यायाः लघुतरः । पं. | १०/१६ |
| संस्थानविचयः | = | अनाद्यन्तस्य लोकस्य स्थित्युत्पत्तिव्ययात्मनः । आकृतिं चिन्तयेद्यत्र संस्थानविचयः स तु ॥१४॥ यो.शा. | १०/१४ |
| | = | द्रव्यक्षेत्राकृत्यनुगमनम् । प्रश. | २४८ |
| संहननम् | = | शरीरद्रढिमा । त.उ. का. | १/१३ |
| सकामनिर्जरा | = | सह कामेन मोक्षाभिलाषेण वर्त्तते या सा । ध.प. | ३७ |
| सकृदावर्तनाः | = | सुकृदेकवारमावर्तन्त उत्कृष्टां स्थितिं बध्नन्ति ये ते । यो.बिं. | ३७० |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | = | सकृद् एकवामावर्तन्ते उत्कृष्टां स्थितिं बध्नन्ति ये ते सकृदावर्तनाः । यो.विं. | ३ |
| सकृद्बन्धकः | = | सकृद् एकदा मोहनीयकर्मोत्कृष्टस्थितिबन्धनं यस्य सः, | |
| | * | यो यथाप्रवृत्तकरणेन ग्रन्थिदेशमागतोऽभिन्नग्रन्थिः सकृदेवोत्कृष्टां सागरोपमकोटीकोटीसप्ततिलक्षणां स्थितिं भन्त्स्यत्यसौ सकृद्बन्धक उच्यते । पं. | २/४४ |
| | = | ये नाम यथाप्रवृत्तकरणेन ग्रन्थिदेशमागता अप्यभिन्नग्रन्थयः सकृदेवोत्कृष्टां सागरोपमकोटाकोटीसप्ततिलक्षणं स्थितिं भन्त्स्यन्ति । उ.र. | १८ |
| सङ्कल्पः | = | व्यापादनाभिसन्धिः । पं. | १/८ |
| | = | संकल्पो नाम स्त्रीगोचरो रागपरिणामः पुरुषाणां, स्त्रीणां त्वेतद्विपर्ययरूपः, | |
| | * | सङ्गतार्थविषयः समर्थभावः । उ.प. | १०३५ |
| सङ्खडी | = | सङ्खड्यन्ते प्राणिनामायूंषि यस्यां सा सङ्खडीविवाहाद्युत्सवरूपा । गु. | ३/७७ |
| सङ्ग्रहः | = | अर्थानां सर्वैकदेशग्रहणं सङ्ग्रहः । त.भा. | १/३५ |
| सङ्घः | = | गुणसमुदाओ संघो, पवयण तित्थं ति होंति एगट्ठा । पं.व. | ११३५ |
| | = | संघो गुणसंघाओ, संघायविमोअगो य कम्माणं ।<br>रागद्दोसविमुक्को, होइ समो सव्वजीवाणं ॥ | २/१२७ |
| | * | एगो साहू एगा, य साहूणी सावओ व सड्ढी वा ।<br>आणाजुत्तो संघो, सेसो पुण अट्ठिसंघाओ ॥ | २/१२९ |
| | * | परिणामियबुद्धीए, उववेओ होइ समणसंघो उ ।<br>कज्जे णिच्छियकारी, सुपरिच्छियकारगो संघो ॥ | २/१३१ |
| | * | गिहिसंघायं जहिउं, संजमसंघायगं उवगएणं ।<br>नाणचरणसंघायं, संघायंतो हवइ संघो ॥ गु. | २/१४० |
| | = | सम्यग्दर्शनादिसमन्वितप्राणिगणः । पं.व. | १ |
| | = | साधुसाध्वीश्रावकश्राविकासमुदायः । उ.प. | ४१९ |
| सचित्तवर्जनप्रतिमा | = | एवंविहो उ नवरं सचित्तं पि परिवज्जए सव्वं ।<br>सत्त य मासे नियमा फासुयभोगेण तप्पडिमा ॥१२॥ विं. | १०/१२ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| सतताभ्यासः | = | नित्यमेवोपादेयतया लोकोत्तरगुणावाप्तियोग्यताऽऽपादक-मातापितृविनयादिवृत्तिः । उ.प. | १४९ |
| | = | नित्यमेवोपादेयतया लोकोत्तरगुणावाप्तियोग्यतापादक-मातापितृविनयादि वृत्तिः । ध.प. | १७ |
| | = | नित्यमेवोपादेयतया लोकोत्तरगुणावाप्तियोग्यतापादक-मातापितृविनयादिवृत्तिः सतताभ्यासः । उ.र. | १८६ |
| सतां प्रवृत्तिः | = | उपसर्जनीकृतस्वार्थप्रधानीकृतपरार्थरूपा । षो. | ३/७ |
| सत्कर्मस्थाः | = | स्वसिद्धान्ताऽविरुद्धक्रियास्थिताः । यो.विं. | ४४ |
| सत्कारः | = | अभ्युत्थानासनदान-वंदनाद्यनुव्रजनादिः । श्रा. | ३२५ |
| | = | आसनप्रदानादिव्यापारः । षो. | ६/६ |
| | = | प्रवरवस्त्राभरणादिभिरभ्यर्चनम् । ल.वि. | २६३ |
| सत्क्रिया | = | शिष्टसमाचाररूपा । यो.बिं. | ८८ |
| सत्क्षयोपशमः | = | सानुबन्धमिथ्यात्वमोहादिमलप्रलयविशेषः । यो.बिं. | ३५० |
| सत्त्वः | = | सुकृतोत्साहः । ल.वि. | २५ |
| | = | अवैक्लव्यम् । त.उ. का. | १/१३ |
| | = | वीर्योत्कर्षः । द्वा. | १८/८ |
| | = | वीर्योत्कर्षः । यो.बिं. | ३५९ |
| सत्प्रतिज्ञत्वम् | = | प्रतिपन्नक्रियानिर्वाहणम् । द्वा. | १२/१४ |
| सत्यधर्मः | = | गुरुसुत्ताणुन्नायं जं हियमियभासणं ससमयम्मि ।<br>अपरोवतावमणघं तं सच्चं निच्छियं जइणो ॥११॥ विं. | ११/११ |
| सदनुष्ठानम् | = | आदरः करणे प्रीतिरविघ्नः संपदागमः ।<br>जिज्ञासा तज्ज्ञसेवा च सदनुष्ठानलक्षणम् ॥२४॥ द्वा. | २३/२४ |
| | = | आदरः करणे प्रीतिरविघ्नः सम्पदागमः ।<br>जिज्ञासा तज्ज्ञसेवा च सदनुष्ठानलक्षणम् ॥३६८॥ ब्र.सि. | ३६८ |
| | = | आदरः करणे प्रीतिरविघ्नः सम्पदागमः ।<br>जिज्ञासा तन्निसेवा च, सदनुष्ठानलक्षणम् ॥१२३॥ यो.दृ. | १२३ |
| | = | आदरः करणे प्रीतिरविघ्नसंपदागमः ।<br>जिज्ञासा तज्ज्ञसेवा च सदनुष्ठानलक्षणम् ॥२९॥ अध्या. | १०/२९ |
| | = | मोक्षफलम् । पञ्च. | ४ |
| सदाचारः | = | परिशुद्धबाह्ययतना । द्वा. | ७/३१ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | = | सर्वोपकारप्रियवचनाकृत्रिमोचितस्नेहादिका सज्जनचेष्टा । यो.बिं. | ५४ |
| सदाशयः | = | शुभभावः । प्र. | ५९ |
| सद्धर्मसाधकः | = | एवं गुणगणोपेतो, विशुद्धात्मा स्थिराशयः ।<br>तत्वविद्भिः समाख्यातः, सम्यग्धर्मस्य साधकः ॥१०॥ शा.वा. | १० |
| सद्बुद्धिः | = | सन् शोभनोऽयमिति बुद्धिर्मतिः । अ. | २९/७ |
| सद्योगः | = | सम्यक्त्वज्ञानचारित्रयोगः । पञ्च. | ४ |
| सद्योगारम्भकः | = | सानुबन्धयोगारम्भकः । यो.बिं. | २३८ |
| सन्तः | = | कल्याणसम्पन्नाः विशिष्टपुण्यवन्तः । यो.दृ. | २१९ |
| सन्दर्शकः | = | सम्यग्-आसेवनोपदेशद्वारेण दर्शकः । यो.श. | १ |
| सन्दिष्टः | = | 'त्वममुकं ग्रन्थं पठ' इति गुरूणा दत्ताज्ञः । सा. | ७२ |
| सन्धना | = | विस्मृत्याऽपान्तराले त्रुटितस्य पुनः सन्धानम् । गु. | २/२५२ |
| सन्ध्यानियमः | = | चैत्यगृहगमनादिः । यो.श. | ३० |
| सन्नीतिः | = | अन्वयव्यतिरेकशुद्धयुक्तिरूपा । यो.बिं. | १ |
| सभ्यः | = | सभायां साधु सभ्यः । ध्या. | १८ |
| समग्रश्रुतधारी | = | स्वभ्यस्तगणिपिटकोपनिषदः । द्वा. | ७/३० |
| समता | = | अध्यात्मध्यानायत्तत्वात् । ध.प. | १०० |
| | = | अविद्याकल्पितेषूच्चैरिष्टानिष्टेषु वस्तुषु ।<br>संज्ञानात् तद्व्युदासेन, समता समतोच्यते ॥ यो.बिं. | ३६४ |
| | = | अविद्याकल्पितेष्टानिष्टत्वसंज्ञापरिहारेण शुभाशुभानां<br>विषयाणां तुल्यताभावनम् । यो.विं. | ३ |
| | = | व्यवहारकुदृष्टयौच्चैरिष्टानिष्टेषु वस्तुषु ।<br>कल्पितेषु विवेकेन तत्त्वधीः समतोच्यते ॥ द्वा. | १८/२२ |
| समनोज्ञाः | = | सम्भोगयुक्ताः । त.भा. | ९/२४ |
| समभिरूढः | = | सत्स्वर्थेष्वसङ्क्रमः समभिरूढः । त.भा. | १/३५ |
| समयः | = | परमनिकृष्टः कालः । श्रा. | ४१ |
| समवायः | = | सम्यगवायनं वर्षधरनद्यादिपर्वतानां यत्र सः । त.उ. | १/२० |
| समाख्यातः | = | सम्यक् प्रकारेण विनयानुबन्धादिलक्षणेनाख्यातः-<br>कथित इत्यर्थः । सा. | ७५ |
| समाधिः | = | एकाग्रता । त.उ. का. | १/८ |
| | = | चित्तस्वास्थ्यम् । ल.वि. | ३७० |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | = | ध्यानफलभूतम् । द्वा. | २३/३ |
| समापत्तिः | = | क्षीणवृत्तेरभिजात्यस्येव मणेर्ग्राह्यग्रहीतृग्रहणेषु तत्स्थतदञ्जनता, | |
| | * | 'मयि तद्रूपं' स एवाहमित्थ्यादिध्यानोल्लिख्यमानवैज्ञानिक-सम्बन्धविशेषरूपा । षो. | २/१५ |
| | = | चन्दनगन्धस्थानीया स्वस्वदर्शनग्रहविमुख-सहजमाध्यस्थ्यपरिणतिः । गु. | १/३९ |
| | = | सर्वतन्त्रसमूहरूपस्वसमयव्युत्पत्तिकृतसर्वानुग्रहपरिणतिः । षो. | ११/१० |
| समाप्तकल्पः | = | परिपूर्णसमाचारः । पं. | ११/२९ |
| समाप्तासमाप्तकल्पौ | = | पणगं समत्तकप्पो, तदूणओ होइ असमत्तो ॥१३२९॥ पं.व. | १३२९ |
| समारम्भम् | = | अङ्गारकर्मादिरूपम् । पञ्च. | २ |
| समितिः | = | पञ्चानां चेष्टानां तान्त्रिकी संज्ञा, | |
| | * | सम्यक्प्रवृत्तिलक्षणा समितिः । यो.शा. | १/३४ |
| समुद्घातः | = | सं सामस्त्येन उत्-प्राबल्येन हननम्-आत्मप्रदेशानां बहिर्निःसारणं समुद्घातः । गु. | ४/१३६ |
| सम्भोगः | = | एकमण्डल्यां समुद्देशनादिरूपः । गु. | ३/३७ |
| सम्यक् | = | असम्भावनाविपरीतभावनानिरासेन । कू. | १ |
| | = | प्रवचनोक्तविधिः । पं.व. | १ |
| | = | यथावत् । यो.बिं. | ५८ |
| सम्यक्चारित्रम् | = | अथवा पञ्चसमिति-गुप्तित्रयपवित्रितम् । चारित्रं सम्यक्चारित्रमित्याहुर्मुनिपुङ्गवाः ॥३४॥ यो.शा. | १/३४ |
| | = | ज्ञानपूर्वकं सदसत्क्रियाप्रवृत्तिलक्षणम् । त.उ. | १/१ |
| | = | सच्चरणमणुट्ठाणं विहिपडिसेहाणुगं तत्थ ॥३॥ यो.श. | ३ |
| | = | सर्वसावद्ययोगानां त्यागश्चारित्रमिष्यते । कीर्त्तितं तदहिंसादिव्रतभेदेन पञ्चधा ॥१८॥ यो.शा. | १/१८ |
| सम्यक्त्वम् | = | निःशङ्किताद्याचारशमसंवेगादिलिङ्गाभिव्यङ्ग्यः कश्चिदात्मपरिणामः । उक्तं च - "से य सम्मत्ते पसत्थसम्मत्तमोहणीयकम्माणु-वेयणोवसमखयसमुत्थे पसमसंवेगाइलिंगे सुहे आयपरिणामे पन्नत्ते" त्ति । अ.म. | १४१ |
| | = | यद्देशकालसंहननरूपं यथाशक्तियथावदनुष्ठानं तत् । गु. | १/१३१ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| | = या देवे देवताबुद्धिर्गुरौ च गुरुतामतिः । धर्म्मे च धर्म्मधीः शुद्धा सम्यक्त्वमिदमुच्यते ॥२॥ यो.शा. | २/२ |
| | = वसन्त्यस्मिन्नणुव्रतादयो गुणाः इति । श्रा. | ७ |
| | = सकलकर्तव्येषु परमपदसम्पदुपादानकारणं संसारपारावारतारणम् । स.स. | १ |
| | = सम्मत्तं पुण इत्थं सुत्तणुसारेण जा पवित्ती उ, | |
| | * सूत्रानुसारेणैव सर्वज्ञागमानुसरणेनैव या चैत्यवन्दनादिरूपा प्रवृत्तिश्चेष्टा सम्यक्त्वम् । उ.प. | १९ |
| सम्यक्त्वसामायिकम् | = औपशमिकादिसम्यक्त्वाप्तिः । | १८ |
| सम्यग्ज्ञानम् (सज्ज्ञानम्) | = यथावस्थिततत्त्वानां संक्षेपाद् विस्तरेण वा । योऽवबोधस्तमत्राहुः गुरोरधिगमेन वा ॥१७॥ यो.शा. | १/१७ |
| | = लक्ष्यलक्षणव्यवहाराव्यभिचारात्मकं मत्यादिः । त.उ. | १/१ |
| | = सण्णाणं वत्थुगओ बोहो । यो.श. | ३ |
| | = सत्-शोभनं यथावत्पदार्थपरिच्छेदितया तच्च तज्ज्ञानं च बोधः सज्ज्ञानम्, | १/२ |
| | * सतां वा सद्भूतानामर्थानां ज्ञानं सज्ज्ञानम् । अ. | १/२ |
| सम्यग्दर्शनबीजः | = जिनशासनपक्षपातरूपशुभाध्यवसायलक्षणः । पं. | ९/२३ |
| सम्यग्दर्शनम् | = अनन्तानुबन्ध्यादिक्षयाद्युत्था रुचिः । त.उ. | १/१ |
| | = तत्त्वानां स्याद्वादमनतिक्रमस्य स्थितानाम्, अर्थानां श्रद्धानम्, इदमित्थमेव इति रुचिलक्षणम् । त.उ. | १/२ |
| | = दंसणमिह सम्मत्तं, तं पुण तत्तत्थसद्दहणरूवं । खइयं खओवसमियं, तहोवसमियं च नायव्वं ॥२॥ स.स. | २ |
| | = प्रशमसंवेगनिर्वेदानुकम्पास्तिक्याभिव्यक्तिलक्षणं तद् । ध. | १४० |
| | = प्रशमादिलिङ्ग आत्मपरिणामः । यो.दृ. | १० |
| | = प्रशस्तं दर्शनं सम्यग्दर्शनं, | |
| | * तत्त्वार्थश्रद्धानं सम्यग्दर्शनं, | |
| | * सङ्गतं वा दर्शनं सम्यग्दर्शनम्, | |
| | * प्रशमसंवेगनिर्वेदानुकम्पास्तिक्याभिव्यक्तिलक्षणं तत्त्वार्थश्रद्धानं सम्यग्दर्शनम् । त.भा. | १/२ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| | = रुचिर्जिनोक्ततत्त्वेषु सम्यक्श्रद्धानमुच्यते । जायते तन्निसर्गेण गुरोरधिगमेन वा ॥१७॥ यो.शा. | १/१७ |
| | = सद्दंसणं तु तत्थ रुई । यो.श. | ३ |
| | = सम्यक्त्वं बोधिः । यो.बिं. | २७३ |
| | = सम्यक्त्वमोहनीयकर्मक्षयोपशमात्सम्यग्देवगुरुधर्म्म-परिज्ञानसमुद्भूतशुभाध्यवसायरूपम्, | |
| | * यदागमः 'से य सम्मत्ते सम्मत्तमोहणीयकम्मोवसमखयसमुत्थे सुहे आयपरिणामे पन्नत्ते ।' स.स. | १ |
| | = सम्यगविपरीतं तत्त्वार्थश्रद्धानलक्षणं दर्शनं मोक्षादिसोपानम् । श्रा. | ३४१ |
| | = स्याद्वादरूचिरूपम् । उ.र. | १०२ |
| सम्यग्दर्शनयोग्यजीत्रः | = अवउज्झियमिच्छत्तो, जिणचेइयसाहुपूअणुज्जुत्तो । आयारमट्ठभेअं, जो पालइ तस्स सम्मत्तं ॥३॥ स.स. | ३ |
| सम्यग्दृष्टिः | = अर्हदभिहिततत्त्वश्रद्धायी । त.उ. | १/३५ |
| | = प्रक्षीणतीव्रसङ्क्लेश(मोह)ग्रन्थिविभेदतः । आस्तिक्यादिगुणोपेतः सम्यग्दृष्टिरुदाहृतः ॥७॥ ब्र.सि. | ७ |
| | = सती-समीचीना दृष्टिर्यस्यासौ । प्र. | १५ |
| सर्वज्ञः | = सर्वं जानाति इति । पञ्च. | १ |
| | = सर्वद्रव्यपर्यायान् जानन्ति विशेषस्ते । त.उ. | १/२० |
| सर्वथा रागः | = सर्वैः प्रकारैः, | १/१ |
| | * बन्धोदयसत्तालक्षणैः, | १/१ |
| | * विषयराग-स्नेहराग-दृष्टिरागरूपैः, | १/१ |
| | * द्रव्यक्षेत्रकालभावाभिष्वङ्गस्वाभावैर्वा । अ. | १/१ |
| सर्वनीतयः | = समस्तनैगमादिनयाः, | १/४ |
| | * समादिनीतयः वा । अ. | १/४ |
| सर्वसंपत्करी भिक्षा | = यतिर्ध्यानादियुक्तो यो, गुर्वाज्ञायां व्यवस्थितः । सदानारम्भिणस्तस्य, सर्वसम्पत्करी मता ॥ अ. | ५/२ |
| | = सदाऽनारंभस्य हेतुर्या भिक्षा, तद्धेतुत्वं च सदाऽऽरंभपरिहारेण सदाऽनारंभगुणानुकीर्तनाभि-व्यंग्यपरिणामविशेषाहितयतनया वा । द्वा. | ६/१० |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| सर्वाराधकः | = | ज्ञानदर्शनसम्पन्नः क्रियासम्पन्नश्च । ध.प. | १८ |
| सर्वाविराधकः | = | ज्ञानदर्शनासम्पन्नः क्रियाहीनश्च । ध.प. | १८ |
| सहजमलः | = | एवं चेव दिदिक्खा भवबीजं वासणा अविज्जा य । | |
| | | सहजमलसद्दवच्चं वन्निज्जइ मुक्खवाईहिं ॥१६॥ विं. | २/१६ |
| | * | एयं पुण तह कम्मेयराणुसंबंध जोगयारूवं । | २/१७ |
| | * | तत्तग्गहणसहावो आयगओ इत्थ सत्थगारेहिं । | |
| | | सहजो मलु त्ति भण्णइ, भव्वत्तं तक्खओ एसो ॥६॥ विं. | ४/६ |
| सहसाभ्याख्यानम् | = | अनालोच्याभिशपनमसदध्यारोपणम् । श्रा. | २६३ |
| सहाऽसहाः | = | सर्वप्रकारैः समर्थाः, असहाः असमर्थाः । गु. | २/३२८ |
| सांव्यावहारिकाः | = | ये निगोदावस्थात उद्वृत्त्य पृथिवीकायिकादिभवेषु वर्तन्ते | |
| | | ते लोकेषु दृष्टिपथमागताः सन्तः पृथिवीकायिकादिव्य- | |
| | | वहारमनुपतन्तीति । ध.प. | ९ |
| सांशयिकमिथ्यात्वम् | = | भगवद्वचनप्रामाण्यसंशयप्रयुक्तः शास्त्रार्थशंशयः, | |
| | * | सकम्पप्रवृत्तिनिबन्धनः । ध.प. | ८ |
| साकारोपयोगः | = | विशेषग्रहणाभिमुखः । गु. | ४/९८ |
| सातवेदनीयम् | = | आह्लादरूपेण यद्वेद्यते तत् । श्रा. | १४ |
| सात्मीकृतप्रवृत्तिः | = | सर्वांगीणैकत्वपरिणतप्रवृत्तिः । द्वा. | २४/२६ |
| साधनम् | = | अन्योन्यव्यावृत्त्यात्मकत्वज्ञप्तिः । त.उ. | १/३५ |
| साधवः | = | परमं पदं साधयन्तीति साधवः, उक्तं च | |
| | * | दशविधयतिधर्म्मरताः, समवगणितशत्रुमित्रतृणमणयः । | |
| | | जीवादितत्वविज्ञास्तीर्थकरैः साधवः प्रोक्ताः ॥ स.स. | ३ |
| | = | भावप्रधानाः । ध.प. | ३३ |
| | = | यदागमः-निव्वाणसाहए जोए, जम्हा साहंति साहुणो । | |
| | | समा य सव्वभूएसु, तम्हा ते सव्व(भाव)साहुणो ॥ स.स. | १९ |
| | = | कल्याणाशयः श्रुतरत्नमहोदधिः उपशमादिलब्धिमान् | |
| | | परहितोद्यत अत्यन्तगम्भीरचेतः प्रधानपरिणतिः विधूतमोहः | |
| | | परमसत्त्वार्थकर्ता सामायिकवान् विशुद्ध्यमानाशयः | |
| | | यथोचितप्रवृत्तिः सात्मीभूतशुभयोगः । ध. | ३६९ |
| साधुधर्म्मः | = | सामायिकादिगतविशुद्धक्रियाभिव्यङ्ग्यः | |
| | | सकलसत्त्वहिताशयामृतलक्षणःस्वपरिणाम एव । ल.वि. | १५५ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| साधुप्रयत्नम् | = | साधूनां माध्यस्थ्यप्रधानत्वात्, शुभानुबन्धित्वाच्च साधुनां प्रयत्नस्य । ध.प. | १०१ |
| साधुमातरः | = | एताश्चारित्रगात्रस्य जननात् परिपालनात् । संशोधनाच्च साधूनां मातरोऽष्टौ प्रकीर्तिताः ॥४५॥ यो.शा. | १/४५ |
| साधुसच्चेष्टा | = | गुरुविनयः स्वाध्यायो योगाभ्यासः परार्थकरणं च । इतिकर्तव्यतया सह विज्ञेया साधुसच्चेष्टा ॥१॥ षो. | १३/१ |
| साधुसमयसद्भावम् | = | समीचिनसिद्धान्तरहस्यम् । यो.विं. | १६ |
| साधुसेवा | = | गुणवृद्धोपासना । शा.वा. | ६ |
| साध्यः | = | योगाभ्यासनिष्पाद्यः मोक्षः । यो.बिं. | ३ |
| सानुबन्धः | = | अनुबन्धवान् । यो.बिं. | ३२ |
| | = | आमुक्तिप्राप्तेरत्रुटितः । यो.बिं. | ३३ |
| | = | भवान्तरानुयायी । उ.प. | ७८५ |
| सानुबन्धयोगः | = | अपायरहितो योगः । द्वा. | १९/१७ |
| सापाययोगः | = | निरुपक्रममोक्षपथप्रतिकूलचित्तवृत्तिकारणं प्राक्कालार्जितं कर्म अपायस्तत्सहितो योगः सापायः । यो.विं. | ११ |
| सापेक्षाः | = | गच्छवासिनः । गु. | २/३३० |
| सामर्थ्ययोगः | = | शास्त्रेण दर्शितोपायः फलपर्यवसायिना । तदतिक्रान्तविषयः सामर्थ्याख्योऽतिशक्तितः ॥५॥ द्वा. | १९/५ |
| | = | क्षपकश्रेणिद्वितीयापूर्वकरणभावी । षो. | १५/८ |
| | = | शास्त्रसन्दर्शितोपायस्तदतिक्रान्तगोचरः । शक्त्युद्रेकाद्विशेषेण, सामर्थ्याख्योऽयमुत्तमः ॥५॥ यो.दृ. | ५ |
| | = | शास्त्रोक्तं विधिमुल्लङ्घ्य विशेषेण शुभाशयात् । सामर्थ्ययोगोऽसावेव तीव्रावाच्यगुणोदयः ॥१९१॥ ब्र.सि. | १९१ |
| | = | सामर्थ्यप्रधानो योगः सामर्थ्ययोगः । यो.दृ. | ८ |
| सामाचारी | = | मुखवस्त्रिकाप्रत्युपेक्षणादिका क्रिया । श्रा. | २९८ |
| | = | विचित्रकर्मक्षयजनकः परिणामविशेषः । सा. | ३८ |
| | = | शिष्टाचरितक्रियाकलापरूपा । यो.श. | ३२ |
| सामान्यतो गृहस्थधर्मः | = | कुलक्रमागतमनिन्द्यविभवापेक्षया न्यायतोऽनुष्ठानमिति । ध. | ३ |
| सामान्येन | = | सूक्ष्मेक्षिकामनादृत्य । यो.दृ. | १८ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| सामायिकप्रतिमा | = | तह अत्तवीरिउल्लासजोगओ रयत्तसुद्धिदित्तिसमं ।<br>सामाइयकरणमसइ सम्मं सामाइयप्पडिमा ॥६॥ विं. | १०/६ |
| सामायिकम् | = | त्यक्तार्त्त-रौद्रध्यानस्य त्यक्तसावद्यकर्मण: ।<br>मुहूर्त्तं समता या तां विदु: सामायिकव्रतम् ॥८२॥ यो.शा. | ३/८२ |
| | = | सकलसावद्ययोगविरतिरूपम् । | |
| | * | आत्मपरिणामविशेष: । पं. | ५/१३ |
| | = | समस्य रागद्वेषकृतवैषम्यवर्जितस्य भावस्यायो लाभ:<br>समाय: स एव सामायिकं चारित्रम्, | |
| | * | मोक्षभवादिसकलभावोपेक्षालक्षणम् । अ. | २९/१ |
| | = | सामायिकं नामाभिगृह्य कालं सर्वसावद्ययोगनिक्षेप: । त.भा. | ७/१६ |
| | = | सावद्येतरयोगवर्जनासेवनास्वभावम् । पं. | १०/३ |
| | = | समस्य-रागद्वेषवियुक्तस्य जीवस्यायो-लाभ:<br>समाय:, समो हि प्रतिक्षणमपूर्वैर्ज्ञानदर्शनचारित्र-<br>पर्यायैर्निरुपमसुखहेतुभिरध:कृतचिन्तामणिकल्पद्रुमोप-<br>मैर्युज्यते, समाय: प्रयोजनमस्य क्रियानुष्ठानस्येति । पं. | १/२५ |
| | = | समो राग-द्वेषवियुक्तो य: सर्वभूतान्यात्मवत्पश्यति,<br>आयो लाभ: प्राप्तिरिति पर्याया:, समस्याय: समाय: । | |
| | * | समो हि प्रतिक्षणमपूर्वैर्ज्ञान-दर्शनचारित्रपर्यायैर्निरुपमसुखहेतुभिरध:-<br>कृतचिन्तामणिकल्पद्रुमोपमैर्युज्यते । स एव समाय: प्रयोजनमस्य<br>क्रियानुष्ठानस्येति । | |
| | * | सावद्येतरयोगानां यथासंख्यं वर्जनासेवनरूपमिति । श्रा. | २९२ |
| सामायिकाध्ययनम् | = | सामायिकं समभावो यत्राध्ययने वर्ण्यते तद् । त.उ. | १/२० |
| साम्प्रत: | = | नामादिषु प्रसिद्धपूर्वाच्छब्दादर्थे प्रत्यय: साम्प्रत: । त.भा. | १/३५ |
| साम्यम् | = | ध्यानरूपतायोग्यं त्वाभ्यासिकम् । यो.शा. | ४/११२ |
| | = | रागद्वेषयोरुभययोरपि प्रतिपक्षभूतम् । यो.शा. | ४/५५ |
| सार: | = | बलम् । त.उ. का. | १/१३ |
| सारणा | = | अपराधदण्डदानलक्षणा, | ३/२ |
| | * | संयमयोगेषु प्रवर्त्तना । गु. | |
| सालम्बनयोग: | = | शुभोपयोगरूपोऽयं, समाधि: सविकल्पक: । अ.उ. | २/१६ |
| | = | सहालम्बनेन चक्षुरादिज्ञानविषयेण प्रतिमादिना वर्तत इति । षो. | १४/१ |

| नाम | व्याख्या | गाथा |
|---|---|---|
| | = सहालम्बनेन चक्षुरादिज्ञानविषयेण प्रतिमादिना वर्तते इति । यो.विं. | १९ |
| सावद्यः | = अवद्येन सह, सपापो योगव्यापारः कृतादिरूपः । पञ्च. | १ |
| साश्रवयोगः | = सापायस्यैवापायवत एव योगः । द्वा. | १९/१८ |
| सास्रवः | = दीर्घसंसारफलकर्मबन्धयुक्तः । यो.बिं. | ३२ |
| सिंहासनम् | = देवनिर्मितसिंहोपलक्षितासनम् । षो. | १५/२ |
| सिद्धः | = संघाइकज्जसाहग-चुण्णंजण जोगसिद्धओ सिद्धो । स.स. | ३६ |
| | = सर्वथाकृतकृत्यश्च सूक्ष्मोऽव्यक्तो निरञ्जनः । सर्वकर्मफलाभावात् संसिद्धः सिद्ध उच्यते ॥२७॥ ब्र.सि. | २७ |
| | = सिद्ध्यति स्म, परमतत्त्वरूपः । पञ्च. | १ |
| | = मुक्तिभाजः । श्रा. | ६८ |
| | = सितं ध्मातं कर्म्म यैस्ते सिद्धाः, | |
| | * यदागमः - दीहकालरयं जं तु कम्मं से सियमट्टहा । सियं धंतंति सिद्धस्स, सिद्धत्तमुवजायए ॥ स.स. | १८ |
| सिद्धसुखम् | = जं सव्वसत्तु तह सव्ववाहि सव्वत्थ सव्वमिच्छाणं । खयविगमजोगपत्तीहिं होइ तत्तो अणंतमिणं ॥३॥ विं. | २०/३ |
| सिद्धानां समत्वम् | = सव्वे वि य सव्वन्नू सव्वे वि य सव्वदंसणिओ एए । निरुवमसुहसंपन्ना सव्वे जम्माइरहिया य ॥१९॥ विं. | १९/१९ |
| | * जत्थ य एगो सिद्धो तत्थ अणंता भवक्खयविमुक्का । अन्नुन्नमणाबाहं चिट्ठंति सुही सुहं पत्ता ॥२०॥ विं. | १९/१९ |
| सिद्धानां सुखम् | = परमानन्दभावश्च तदभावे हि शाश्वतः । व्याबाधाभावसंसिद्धः, सिद्धानां सुखमिष्यते ॥६९५॥ शा.वा. | ६९५ |
| | * सर्वद्वन्द्वाविनिर्मुक्ताः सर्वाबाधाविवर्जिताः । सर्वसंसिद्धसत्कार्याः, सुखं तेषां किमुच्यते ॥६९६॥ शा.वा | ६९६ |
| | * अमूर्त्ताः सर्वभावज्ञास्त्रैलोक्योपरिवर्त्तिनः । क्षीणसङ्गा महात्मानस्ते यदा सुखमासते ॥६९७॥ शा.वा. | ६९७ |
| सिद्धिः | = प्रधानफलं प्रव्रज्यापरिपालनस्य । पञ्च. | १ |
| | = विघ्नजयात् प्रस्तुतधर्मव्यापाराणां निष्पत्तिः । पं. | ४/२९ |
| | = सकलकर्मक्षयलक्षणा जीवावस्था । ल.वि. | १०३ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | = | सिद्धिस्तत्तद्धर्मस्थानावाप्तिरिह तात्त्विकी ज्ञेया । | |
| | | अधिके विनयादियुता हीने च दयादिगुणसारा ॥ षो. | ३/१० |
| | = | सिद्धिस्तात्त्विकधर्माप्तिः साक्षादनुभवात्मिका । | |
| | | कृपोपकारविनयान्विता हीनादिषु क्रमात् ॥१४॥ द्वा. | १०/१४ |
| | = | अतिचाररहिताधिकगुणे गुर्वादौ विनयवैयावृत्त्यबहुमानाद्यन्विता | |
| | | हीनगुणे निर्गुणे वा दयादानव्यसनपतितदुःखापहारादिगुणप्रधाना | |
| | | मध्यमगुणे चोपकारफलवत्यधिकृतधर्मस्थानस्याहिंसादेः प्राप्तिः । | |
| | | यो.विं. | १ |
| सिद्धिपथः | = | आज्ञाराधनातोऽन्यः न । पञ्च. | ३ |
| सिद्धियमः | = | परार्थसाधिका त्वेषा सिद्धिः शुद्धान्तरात्मनः । | |
| | | अचिन्त्यशक्तियोगेन चतुर्थो यम उच्यते ॥२८॥ द्वा. | १९/२८ |
| सिद्धियोगः | = | परार्थसाधकं त्वेतत्सिद्धिः शुद्धान्तरात्मनः । | |
| | | अचिन्त्यशक्तियोगेन चतुर्थो यम एव तु ॥२१८॥ यो.द. | २१८ |
| | = | सव्वं परत्थसाहगरूवं पुण होइ सिद्धि त्ति । यो.विं. | ६ |
| | = | सव्वं परत्थसाहगरूवं पुण होइ सिद्धि त्ति ॥६॥ विं. | १७/६ |
| सुकविः | = | भूयत्थसत्थगंधी, जिणसासणजाणओ सुकई । स.स. | ३६ |
| सुकृतः | = | परकृतानुमोदनरूपः । पञ्च. | १ |
| सुकृतानुमोदना | = | सकलसत्त्वसङ्गतं मोक्षानुकूलं यदनुष्ठानम् अनेकभेदभिन्नं | |
| | | तस्य महता पक्षपातेन स्वभावचिन्तासारा प्रशंसा । यो.श. | ५० |
| सुखदुःखे | = | सर्वं परवशं दुःखं, सर्वमात्मवशं सुखम् । | |
| | | एतदुक्तं समासेन, लक्षणं सुखदुःखयोः ॥१२॥ अ.उ. | २/१२ |
| | = | परस्पृहा महादुःखं, निःस्पृहत्वं महासुखम् । | |
| | | एतदुक्तं समासेन, लक्षणं सुखदुःखयोः ॥८॥ ज्ञा. | १२/८ |
| सुखम् | = | आह्लादलक्षणम् । शा.वा. | ३ |
| | = | दुःखप्रतिपक्षभूतः परिणामो हि सुखम् । | |
| | | दुःखं च यद्यत्पापप्रकृतिजन्यं तत्तदुपक्षये तत्तद्गुणान्तर्भविष्णु | |
| | | सुखमुत्पद्यते । निःशेषसुखं पुनरव्याबाधाख्यं सकलकर्मक्षये | |
| | | वेदनीयक्षये वा । अ.म. | ८७ |
| सुखा | = | श्रद्धया भुजङ्गमनलिकायानतुल्यो विशिष्टगुणस्थान- | |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | | रत्नप्रदानशौण्डः स्वरसवाही क्षयोपशमो विशेषो जन्यते यमन्ये सुखेत्याचक्षते । अ.म. | ७० |
| सुदाक्षिण्यम् | = | गम्भीरधीरचेतसः प्रकृत्यैव परकृत्याभियोगपरता । द्वा. | १२/१३ |
| | = | गम्भीरधीरचेतसो निर्मत्सरस्य च प्रकृत्यैव परकृत्याभियोगपरता । यो.बिं. | १२६ |
| सुधर्मः | = | पुण्यानुबन्धित्वाच्छोभनः कृपादिधर्मजन्यत्वाद्धर्मश्च इति । अ. | २४/१ |
| सुन्दरगुरुयोगः | = | सम्यग्ज्ञानसदनुष्ठानसंपन्नदीक्षादायकाचार्यसम्बन्धः । पं. | २/४ |
| सुनृतम् | = | वाङ्मनसोर्यथार्थत्वम् । द्वा. | २१/२ |
| सुनृतव्रतम् | = | प्रियं पथ्यं वचस्तथ्यं सूनृतव्रतमुच्यते ।<br>तत् तथ्यमपि नो तथ्यमप्रियं चाऽहितं च यत् ॥२१॥ यो.शा. | १/२१ |
| सुपात्रः | = | प्रतिहतप्रत्याख्यातपापकर्मा । द्वा. | १/२२ |
| सुपात्रदानविधिः | = | सद्धासक्कारजुयं सकमेण तहोचियम्मि कालम्मि ।<br>अन्नाणुवघाएणं वयणा एवं सुपरिसुद्धं ॥१५॥ विं. | ७/१५ |
| सुपात्रदानाधिकारिदाता | = | गुरुणाऽणुन्नायभरो नाओवज्जियधणो य एयस्स ।<br>दाया अदुत्थपरियणवग्गो सम्मं दयालू य ॥१६॥ विं. | ७/१६ |
| सुप्रणिधानम् | = | फलसिद्धौ प्रधानाङ्गरूपम् । पञ्च. | १ |
| सुशुकुनः | = | चित्तोत्साहानुगः । द्वा. | ४/६ |
| सूक्ष्मबुद्धिः | = | निपुणमतिः । अ. | २१/१ |
| सूक्ष्मबोधः | = | सम्यग्हेत्वादिभेदेन, लोके यस्तत्त्वनिर्णयः ।<br>वेद्यसंवेद्यपदतः, सूक्ष्मबोधः स उच्यते ॥६५॥ यो.दृ. | ६५ |
| सूक्ष्मसंपरायाः | = | श्रेणिद्वयमध्यवर्तिनः तथाविधलोभाणुवेदकाः । श्रा. | ३०६ |
| सूक्ष्मार्थदर्शी | = | पटुदृष्टिः, | |
| | * | ज्ञेयवस्तुविवेचकः । अ. | २१/५ |
| सूत्रकृतम् | = | सूत्रीकृता अज्ञानिकादयो यत्र वादिनस्तत् । त.उ. | १/२० |
| सूत्रग्रहणविधिः | = | पत्तं परियाएणं सुगुरुसगासाउ कालजोगेण ।<br>उद्देसाइकमजुयं सुत्तं गेज्झंति गहणविही ॥७॥ विं. | १२/७ |
| सूत्रदानविधिः | = | एसु च्चिय दाणविही नवरं दाया गुरूऽथ एयस्स ।<br>गुरुसंदिट्ठो वा जो अक्खयचारित्तजुत्तु त्ति ॥८॥ विं. | १२/८ |
| सूत्रम् | = | अर्थसूचकं वाक्यम् । अ. | ४/२ |
| | = | गणधरस्थानम्, तस्य तैर्दृब्धत्वात् । गु. | २/२१३ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| | = | परमपुरुषार्थानुकूलभावकलापसूचकस्याऽसारसंसारचारकावास-निर्वासनकालघण्टाकल्पस्याऽऽवश्यकप्रविष्टादिभेदभाक् । उ.प. | १९ |
| | = | रागादिविषघ्नतया परममन्त्रम् । पञ्च. | ४ |
| सूत्रविशुद्धिः | = | व्यञ्जनस्वरपदमात्राबिन्द्वादिभिरविकलपाठनेन वचनरूपागमनिर्मलता । उ.प. | ८५४ |
| सेवयितव्यः | = | शुश्रूषणीयाः भक्तिनिर्भरमनोभिः परमप्रमोदापूरितमानसैः । उ.प. | १०३४ |
| सेव्यत्वम् | = | भक्तिप्रयोजकसेव्यतावच्छेदकवीतरागादिगुणवत्त्वम् । त.उ. का. | १/७ |
| स्खलना | = | दुर्निमित्ताद्युपपातः । सा. | ५२ |
| | = | साधुसामाचारात् प्रच्युतम् । सा. | १६ |
| स्तेयम् | = | अदत्तादानं स्तेयम्, | ७/१० |
| | * | स्तेयबुद्ध्या परैरदत्तस्य परिगृहीतस्य वा तृणादेर्द्रव्यजातस्यादानं स्तेयम् । त.भा. | ७/१० |
| *स्थण्डिलम्* | = | *परानुपरोधी प्रासुको भूभागः । पं.व.* | २३० |
| स्थविरः | = | सीदतां स्थिरीकरणहेतुः । द्वा. | २९/७ |
| स्थानम् | = | ऊर्ध्वस्थानम्, अविरुद्धदेशकायोत्सर्गकरणम् । गु. | ३/१३७ |
| | = | स्थीयतेऽनेनेति स्थानम्-आसनविशेषरूपं कायोत्सर्गपर्यङ्कबन्धपद्मासनादि सकलशास्त्रप्रसिद्धम् । यो.विं. | २ |
| स्थानाङ्गः | = | यत्रैकानि पर्यायान्तराणि वर्ण्यन्ते तत् । त.उ. | १/२० |
| स्थापनाकुलोपजीवी | = | सो ठवणकुलुवजीवी, जो पविसइ लोगगरहियकुलेसु । सेह गिलाणादिट्ठा, ठविएसु व दायगकुलेसुं ॥ गु. | ३/७६ |
| स्थापनाजीवः | = | काष्ठादिन्यस्तः, | |
| | * | धर्मास्तिकायादेरपि स्थापना स्मारकलिप्याकारेणाभिप्रायिकी भवत्येव । त.उ. | १/५ |
| स्थितधीः | = | दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः । वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥६५॥ अध्या. | १६/६५ |
| स्थितिमत् | = | अविचलितस्वभावम् । यो.विं. | १ |
| | = | तत्सिद्धिं यावन्नियमितप्रतिष्ठं संस्कारात्मनाऽविचलितस्वभावं च । षो. | ३/७ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| स्थिरयमः | = | सत्क्षयोपशमोत्कर्षादतिचारादिचिन्तया ।<br>रहिता यमसेवा तु तृतीयो यम उच्यते ॥२७॥ द्वा. | १९/२७ |
| स्थिरादृष्टिः | = | स्थिरायां दर्शनं नित्यं, प्रत्याहारवदेव च ।<br>कृत्यमभ्रान्तमनघं सूक्ष्मबोधसमन्वितम् ॥१५४॥ यो.दृ. | १५४ |
| स्थिराशयः | = | चित्तस्थैर्यः । पञ्च. | ४ |
| | = | तथाविधचित्तप्रबन्धविस्रोतसिकाभावेन । यो.दृ. | २९ |
| स्थिरीकरणम् | = | स्वगतपरगतधर्मव्यापाराणां स्थिरत्वाधानम् । पं. | ४/२९ |
| स्थैर्यम् | = | जिनधर्मं प्रति चलितचित्तस्य परस्य स्थिरत्वापादनं स्वयं वा परतीर्थिकर्द्धिदर्शनेऽपि जिनशासनं प्रति निष्प्रकम्पता । यो.शा. | २/१६ |
| | = | प्रतिपन्ननिर्वाहणे स्थिरभावः । यो.बिं. | ५२ |
| स्थैर्ययोगः | = | तह चेव एयबाहगचिंतारहियं थिरत्तणं नेयं । यो.विं. | ६ |
| | = | तह चेव एयबाहगचिंतारहियं पिरत्तणं नेयं ॥ विं. | १७/६ |
| | = | विपक्षचिन्तारहितं यमपालनमेव यत् ।<br>तत्स्थैर्यमिह विज्ञेयं तृतीयो यम एव हि ॥२१७॥ यो.दृ. | २१७ |
| स्नातकः | = | शुक्लध्यानं-यत्पृथक्त्ववितर्कसवीचारैकत्ववितर्कावीचारलक्षणं तदेव जलं तेन स्नातः सन् यो विगतघातिकर्ममलो जातः स स्नातको निर्ग्रन्थ उच्यते । गु. | ४/३७ |
| स्नेहरागः | = | जनकादिस्वजनलोकालम्बनः । उ.प. | १८९ |
| | = | विषयाद्यनधीनोऽविनीतेष्वपि सुतबान्धवादिषु ममत्वपरिणामः । अ.म. | २१ |
| स्पर्शः | = | विवक्षितस्य वस्तुनस्तत्त्वमनारोपितं रूपं तस्याप्तिरूपलम्भः । षो. | १२/१५ |
| स्फीतम् | = | समृद्धम् । त.उ. का. | १/१५ |
| स्फूर्तिः | = | प्रतिक्षणप्रवर्धमानकान्तिः, | |
| | * | सन्निहितप्रातिहार्यत्वं वा । प्र. | १ |
| स्मरणम् | = | पूर्वोपलब्धार्थानुस्मृतिः । अ. | १६/६ |
| स्मृतिः | = | अनुभूतार्थविषया ज्ञानवृत्तिः । ल.वि. | ३७० |
| | = | अतीतकालावच्छिन्नार्थपरिच्छेदी । त.उ. | १/१३ |

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| स्याद्वादः | = | विभज्यवादः । उ.र. | ९९ |
| | = | सकलनयसमूहात्मकवचनम् । द्वा. | ६/२४ |
| | = | सप्तभङ्ग्यात्मकः । द्वा. | २/१२ |
| स्वकीयजनः | = | नालप्रतिबद्धादिः । षो. | १३/९ |
| स्वच्छन्दयतिपरिणामः | = | भगवदबहुमानगर्भतया संसारमोचकादिपरिणामवत् प्रत्यपायबहुलतयाऽशुभ एव । उ.र. | ५ |
| स्वप्नम् | = | निद्रासंवलितमनोविज्ञानविशेषरूपम् । पं. | २/१४ |
| | = | निद्रोपहतचित्तव्यापाररूपम् । यो.श. | ९४ |
| स्वरूपहिंसा | = | प्राणव्यपरोपणतः हिंसा । उ.र. | ४ |
| स्वसमयः | = | चरणकरणाद्यनुयोगभेदभिन्नः । उ.र. | १५० |
| स्वसमयप्रज्ञापकः | = | जो हेउवायपक्खंमि हेउओ आगमे य आगमिओ । सो ससमयपण्णवओ सिद्धंतविराहगो अण्णो ॥१५१॥ उ.र. | १५१ |
| | = | जो हेउवायपक्खम्मि हेउओ आगमे य आगमिओ । सो ससमयपन्वओ सिद्धंतविराहगो अण्णो ॥८५३॥ उ.प. | ८५३ |
| स्वाग्रहः | = | अनागमिकार्थभिनिवेशः, | |
| | * | भावशुद्धिविपर्ययलक्षणः । अ. | २२/४ |
| | = | अशास्त्रीयानुष्ठानाभिनिवेशः । पं. | १२/५० |
| स्वाध्यायः | = | प्रणवपूर्वाणां मंत्राणां जपः । द्वा. | २२/२ |
| | = | सुष्ठु आ-मर्यादयाऽध्यायः-अध्ययनम् । पं. | १९/३ |
| | = | सुष्ठु शोभनं आ-अभिव्याप्तयाऽध्ययनं स्वाध्यायः, | |
| | * | स्वं स्वकीयमध्ययनं वा । षो. | १३/३ |
| स्वानुभवः | = | स्वप्रातिभप्रमाणम् । प्र. | २ |
| स्वाभाविकम् | = | अविकृताभ्यन्तरपरिणतिप्रादुर्भूतम् । उ.र. | ६९ |
| स्वास्थ्यम् | = | स्वास्थ्यं तु निरूत्सुकतया प्रवृत्तेः । ध. | ५२८ |

**[ ह ]**

| नाम | | व्याख्या | गाथा |
|---|---|---|---|
| हरणम् | = | परकीयस्यादत्तस्यैव स्वीकारो हरणम् । अ.म. | ५१ |
| हर्षः | = | निर्निमित्तं परदुःखोत्पादनेन स्वस्य द्यूत-पापर्द्ध्याद्यनर्थसश्रयेण वा मनःप्रमोदो हर्षः । यो.शा. | १/५६ |
| हासः | = | विस्मयादिषु वक्त्रविकासात्मकः । गु. | ४/२ |
| हिंसा | = | प्रमत्तयोगात्प्राणव्यपरोपणं हिंसा, | |

| नाम | व्याख्या | गाथा |
|---|---|---|
| | * हिंसा मारणं प्राणातिपातः प्राणवधः देहान्तरसंक्रामणं प्राणव्यपरोपणमित्यनर्थान्तरम् । त.भा. | ७/८ |
| | = प्रमत्तयोगात्प्राणव्यपरोपणम् । अ. | २/७ |
| हितः | = अनुकूलविधिः । अ. | २७/२ |
| | = कल्याणावहम् । यो.बिं. | १०४ |
| | = पथ्यम् । कू. | १३ |
| | = भाव्यपायपरिहारसारत्वम् । षो. | २/९ |
| | = मोक्षसाधकम् । यो.विं. | १७ |
| हितकार्यम् | = परपीडापरिहाररूपम् । सा. | ९ |
| हितारंभः | = पारलौकिकप्रशस्तानुष्ठानप्रवृत्तिलक्षणः । द्वा. | २२/१ |
| हीनाः | = अभ्यन्तरशुद्धयोगरहिताः । उ.र. | ९६ |
| हेतुः | = अन्वय-व्यतिरेकलक्षणः । श्रा. | ४०१ |
| | = फलोपहितकारणम् । षो. | ५/९ |
| | = हिनोति गमयति जिज्ञासितधर्मविशिष्टानर्थानिति कारकः व्यञ्जकश्च । ध्या. | ४८ |
| हेतुस्वरूपानुबन्धाः | = हेउ विसुद्धा किरिया, एगग्गालंबणं सरूवं तु । अणुबंधो इह णेओ, जगहियवित्ती समावत्ती ॥ गु. | १/३९ |
| हेतुहिंसा | = अयतनाऽपरपर्यायात्प्रमादात् हिंसा । उ.र. | ४ |
| हेयम् | = जीवघाताद्याश्रवभूतम् । ध.प. | ५५ |

● ● ●

શાસન શિરતાજ-સૂરિરામચંદ્ર

100 Years

વિ.સં.૧૯૬૯-૨૦૬૯, પોષ સુદ ૧૩

દીક્ષાશતાબ્દી

એક...એવો ભયંકર સમય આવ્યો હતો
જ્યારે જૈન તરીકે જન્મેલાના જિગર પણ
દીક્ષા વિરોધી બની ચૂક્યાં હતાં!
નાનું બાળક દીક્ષા લે તો એ કહેતા કે-
આ ઉંમરમાં તો દીક્ષા હોતી હશે ?
બિચારાએ ખાધું શું અને પીધું શું?
યુવાન દીક્ષા લે તો એ કહેતા કે-
મોજ કરવાની આ ઉંમરે દીક્ષા ન જ લેવાય.
પ્રૌઢ દીક્ષા લે તો એ કહેતા કે-
માથાની જવાબદારી ખભે કરીને દીક્ષા ન જ લેવાય.
વૃદ્ધ દીક્ષા લે તો એ કહેતા કે-
આ ડોસો ત્યાં જઈ શું ઉકાળવાનો ?
આવા જનમાનસને પ્રવચન, દીક્ષાદાન,
કોર્ટની જુબાનીઓ આદિ દ્વારા બદલી
જન-જનના હૈયામાં દીક્ષાની સુપ્રતિષ્ઠા કરનારા
**દીક્ષાયુગપ્રવર્તક પૂ.આ.**
**શ્રી વિજય રામચન્દ્રસૂરીશ્વરજી મહારાજાની**
**દીક્ષા શતાબ્દી ઉજવી**
**ચાલો ! આપણે ય ધન્ય બનીએ...**

શાસનશિરતાજ
સૂરિરામચન્દ્ર
દીક્ષાશતાબ્દી
ગ્રંથમાળા
૩